नारायणात्मकम्



Edited And Published
By
Shripuram Trust

സംശോധകക്കുറിപ്പ്

നാരായണാത്മകം ഒരു കേരളീയ തന്ത്രഗ്രന്ഥമാണ്. ആരാണ് ഗ്രന്ഥകർത്താവെന്ന കാര്യത്തിൽ കൃത്യമായ തെളിവുകളില്ല. എങ്കിലും ഊഹിച്ചെടുക്കാവുന്നത് നാരായണൻ എന്നായിരിക്കാം ഇദ്ദേഹത്തിന്റെ പേരെന്നും കൂടാതെ ഇദ്ദേഹം ഇരിങ്ങാലക്കുട ഗ്രാമക്കാരൻ ആയിരുന്നുമെന്നുമാണ്. ഗ്രന്ഥാവസാനത്തിൽ ഇതു പകർത്തിയെഴുതിയ ആൾ കൃഷ്ണനെന്ന് സ്വയം നിർദ്ദേശിച്ചുകാണുന്നു.

നാരായണാത്മകം തന്ത്രസമുച്ചയത്തിനുമുൻപാണോ ശേഷമാണോ എന്ന് കൃത്യമായി നിർണ്ണയിക്കപ്പെട്ടിട്ടില്ല. മാത്രവുമല്ല കേരളീയതന്ത്രഗ്രന്ഥങ്ങളിലോ അവയ്ക്കുണ്ടായിട്ടുള്ള വ്യാഖ്യാനങ്ങളിലോ എവിടെയും നാരായണാത്മകത്തിന്റെ ഒരു പരാമർശവും കാണുന്നില്ല. ആകെ സംശയിക്കാവുന്നത് തന്ത്രസമുച്ചയവിവരണകാരൻ പേരെടുത്തുപറയാതെ പറയുന്ന ചില പക്ഷാന്തരങ്ങൾ നാരായണാത്മകത്തിലേതാണോ എന്നുമാത്രമാണ്. എവിടേയും ഉദ്ധരിച്ചുകാണാത്തതിനാൽ ഈ ഗ്രന്ഥം അത്ര പ്രശസ്തമായിരുന്നില്ലെന്ന് ഊഹിക്കാം. മാത്രവുമല്ല തന്ത്രിമാർക്കിടയിൽ പോലും ഈ ഗ്രന്ഥത്തെ കുറിച്ച് കേട്ടവരോ കണ്ടവരോ വിരളമാണ്.

ഈ ഗ്രന്ഥത്തെക്കുറിച്ച് ഞങ്ങൾക്ക് ആദ്യമായി സൂചനനൽകുന്നത് പ്രശസ്തതാന്ത്രികശ്രേഷ്ഠനും പണ്ഡിതനുമായ പടിഞ്ഞാറേ മന തരണനല്ലൂർ പദ്മനാഭൻ നമ്പൂതിരിപ്പാടാണ് (തൃപ്രയാർ ശ്രീരാമസ്വാമിക്ഷേത്രം തന്ത്രി). ഞങ്ങളുടെ കൈവശമുള്ള രണ്ട് പതിപ്പുകളിലൊന്ന് ദേവനാഗരി ലിപിയിലുള്ള പെയ്പ്പർ സ്ക്രിപ്റ്റും മറ്റേത് മലയാളലിപിയിലുള്ള താളിയോലയുമാണ്. ഇവരണ്ടിലും താളിയോലയിലുള്ളതാണ് ഏറെക്കുറേ പൂർണ്ണം. പക്ഷേ താളിയോലയിൽ പകർത്തിയെഴുതിയ ആളുടെ അനവധാനത ഉടനീളം മുഴച്ചുനിൽക്കുന്നുണ്ട്. അക്ഷരത്തെറ്റുകളും അവ്യക്തതകളുമാണ് താളിയോലയുടെ മുഖമുദ്ര. എന്നാൽ പെയ്പ്പർ സ്ക്രിപ്റ്റിലാകട്ടെ അക്ഷരത്തെറ്റുകൾ വളരെ കുറവാണ്, എങ്കിലും വലിയ ഒരു

ഭാഗം അതിൽ കാണാനേ ഇല്ല. രണ്ടിലുമുള്ള അപാകതകൾ ഇത് എഡിററുചെയ്യുമ്പോൾ പരിഹരിക്കാൻ ഏറെ പാടുപെട്ടിട്ടാണെങ്കിലും ശ്രമിച്ചിട്ടുണ്ടെങ്കിലും ഒരുപാട് അവ്യക്തതകൾ ഇപ്പോഴും നിലനിൽക്കുന്നുണ്ട്. ഇവ നാരായാണാത്മകത്തിന്റെ മററു പതിപ്പുകൾ കൂടെ ലഭ്യമായാലേ കൃത്യമാക്കാൻ സാധിക്കുകയുള്ളൂ. കുറച്ചൊക്കെ അപാകതകൾ ഉണ്ടെങ്കിൽപ്പോലും തന്ത്രസമുച്ചയത്തിൽ നിന്നും വ്യത്യസ്തമായ ഒരു താന്ത്രികപാരമ്പര്യത്തെ സംരക്ഷിക്കുന്നതിൽ ഞങ്ങളാൽ കഴിയുന്നത് ചെയ്തുവെന്ന വസ്തുത ഏറെ കൃതാർത്ഥതയുളവാക്കുന്നു.

നാരായണാത്മകത്തിൽ വിഷ്ണു (12 പടലങ്ങൾ), ദുർഗ്ഗ (4 പടലങ്ങൾ), ശാസ്താവ് (2 പടലങ്ങൾ), ശങ്കരനാരായണൻ (2 പടലങ്ങൾ), ബ്രഹ്മാവ് (1പടലം) എന്നിവരുടെ പൂജാദിക്രിയകളാണ് അടങ്ങിയിട്ടുള്ളത്. നാരദപുഷ്കരസംവാദരൂപത്തിലാണ് വിഷയങ്ങളെ അവതരിപ്പിക്കുന്നത്. ഗ്രന്ഥാരംഭത്തിൽ പുഷ്കരൻ ദേവദേവനായ വിഷ്ണുവിന്റെ ഭുക്തിമുക്തിഫലപ്രദങ്ങളായ പൂജാവിധാനം പറഞ്ഞുതരുവാൻ നാരദനോട് അഭ്യർത്ഥിക്കുന്നു. തുടർന്നുള്ള നാരദോപദേശമാണ് നാരായണാത്മകം എന്ന ഗ്രന്ഥം. ഭൂപരിഗ്രഹം തുടങ്ങി ആറാട്ടുവരെയുള്ള വിഷ്ണുവിന്റെ ക്രിയകളാണ് ആദ്യത്തെ പന്ത്രണ്ടുപടലങ്ങളിലായി നാരദൻ ഉപദേശിക്കുന്നത്. ഏറെ രസകരമായ വസ്തുത നാരായണാത്മകത്തിൽ വിഷ്ണുഭാഗത്തിലെ നല്ലോരുശതമാനം ശ്ലോകങ്ങളും വിഷ്ണുസംഹിതയിൽ നിന്ന് അതേപടി എടുത്തിട്ടുള്ളതാണെന്നാണ്. അത്രയേറെ വിഷ്ണുസംഹിത ഗ്രന്ഥകർത്താവിനെ സ്വാധീനിച്ചിട്ടുണ്ട്. ചിലയിടങ്ങളിൽ തന്ത്രസമുച്ചയത്തിലെ ശ്ലോകങ്ങളുമായും ചില സാദൃശ്യങ്ങൾ കാണുന്നുണ്ട്. എങ്കിലും തന്ത്രസമുച്ചയത്തിലെ ക്രിയാപദ്ധതിയുമായി തട്ടിച്ചുനോക്കുമ്പോൾ നാരായ-ണാത്മകത്തിന് ഒട്ടേറെ സവിശേഷതകളുണ്ട്. ഈ സവിശേഷതകളിൽ പലതും സംഹിതാപാരമ്പര്യവുമായി ബന്ധമുള്ളതാണ്. വിഷ്ണുസംഹിത ഒഴികെയുള്ള ഗ്രന്ഥങ്ങളുടേയോ അല്ലെങ്കിൽ താന്ത്രികപാരമ്പര്യങ്ങളുടേയോ സ്വാധീനം എത്രത്തോളം നാരായണാത്മകത്തിലുണ്ടെന്നറിയാൻ ഈ ഗ്രന്ഥം ഇനിയും ആഴത്തിൽ പഠിക്കേണ്ടിയിരിക്കുന്നു.

നാരായണാത്മകത്തിന്റെ ഒരു പ്രധാനപ്രത്യേകത തന്ത്രസമുച്ചയത്തിൽ പറഞ്ഞിട്ടുള്ള ക്രിയകളിൽ നിന്നുമുള്ള വ്യത്യാസങ്ങളാണ്. ആ വ്യത്യാസം മന്ത്രത്തിലും,

ധ്യാനത്തിലും തുടങ്ങി ആറാട്ടിന്റെ ക്രിയകളിൽ പോലും കാണാം. പ്രത്യേകിച്ചും ശാസ്താവിന്റെ ക്രിയാഭാഗത്തിലാണ് സമുച്ചയത്തിൽ നിന്നുള്ള വ്യതിചലനം ഏറെ പ്രകടമാകുന്നത്. കൂടാതെ, കേരളത്തിൽ ദുർഗ്ഗയുടെ ക്രിയകൾ പൊതുവേ വൈഷ്ണവവിധാനത്തിലാണ് ആചരിച്ചുകാണുന്നത്. എന്നാൽ നാരായണാത്മകത്തിലെ ദുർഗ്ഗാപടലം ശൈവവിധാനത്തിലുള്ളതാണ്. ഇത് വളരെ ശ്രദ്ധേയമായ ഒരു വസ്തുതയാണ്. വ്യത്യസ്തമായ ഒരു താന്ത്രികപദ്ധതിയെ പ്രതിനിധാനം ചെയ്യുന്ന ഒരു ഗ്രന്ഥം എന്ന നിലയിൽ നാരായണാത്മകത്തിന് ഏറെ പ്രസക്തിയുണ്ട്. കേരളതന്ത്രപാരമ്പര്യം പഠനത്തിന് വിധേയമാക്കുമ്പോൾ വേറിട്ട സ്വരമായ നാരായണാത്മകവും അതിൽ ഉൾപ്പെടുത്തേണ്ടതുണ്ട്. അപ്പൊഴേ കേരളതാന്ത്രികപാരമ്പര്യത്തിന്റെ വൈവിധ്യം മനസ്സിലാക്കാനാകൂ.

ഏതാണ്ട് ആറുമാസത്തോളം നിരന്തരം പ്രയത്നിച്ചാണ് ഞങ്ങൾ നാരായണാത്മകത്തിന്റെ ഈയൊരു പതിപ്പ് എഡിറ്റു ചെയ്തിട്ടുള്ളത്. ശ്രീപുരം താന്ത്രികഗവേഷണകേന്ദ്രത്തിന്റെ ചെയർമാനായ ശ്രീ. എൽ. ഗിരീഷ് കുമാറിന്റെ നിർദ്ദേശത്തിൽ ഇതിന് പിറകിൽ പ്രവർത്തിച്ചവർ കാരണത്ത് ശ്രീധരൻ നമ്പൂതിരി, ഡോ. അജിതൻ പി. ഐ, കണ്ണൻ കൊണ്ടമറുക്, വിഷ്ണു തേവണംകോട്, ദാമോദരൻ ചേറ്റക്കുളത്ത് ഭട്ടതിരി മന, മുരളീകൃഷ്ണൻ മുണ്ടാരപ്പള്ളി എന്നിവരാണ്. എഡിറ്റിങ്ങ് അതിന്റെ പൂർണ്ണ അർത്ഥത്തിൽ ആയിട്ടില്ലെങ്കിലും പറ്റാവുന്നത്ര വായിക്കാവുന്ന രീതിയിൽ ടൈപ്പ് ചെയ്തിട്ടുണ്ട്. ഇതിനുവേണ്ടുന്ന സഹായങ്ങൾ ചെയ്തുതന്ന എല്ലാവരേയും ഒരിക്കൽക്കൂടെ ഇവിടെ കൃതജ്ഞതാപൂർവ്വം അനുസ്മരിക്കുന്നു. ഇദം പ്രഥമമായി വെളിച്ചം കാണുന്ന ഈ ഗ്രന്ഥം കൈരളീഗ്രന്ഥസാഹിതിക്കുള്ള ഞങ്ങളുടെ എളിയ സമർപ്പണമാണ്.

ശ്രീപുരം

23-09-2020

विषयानुक्रमणिका

वैष्णवभागः

प्रथमपटलः

द्वितीयः पटलः

तृतीयः पटलः

चतुर्थः पटलः

पञ्चमः पटलः

५. श्वशान्तिः
६. दहनप्रायश्चित्तम्
७. अधिवासहोमः
८. महाकुंभः
९. जलसंप्रोक्षणम्
१०. सप्तदशकलशानि
११. अधिवासहोमः
१२. कलशाभिषेकः
१३. पञ्चविंशतिकलशानि
१४. संघातद्रव्याणि

षष्ठः पटलः

१. पञ्चविंशतिकलशानि
२. पञ्चदशपुटपद्मलेखनम्
३. पुष्पद्रव्याणि
४. उपमानद्रव्याणि
५. सप्तदशपुटे भेदान्तराणि
६. विजयबलिः
७. पद्मानां कुण्डानां च लक्षणानि
८. चक्राब्जपद्मलेखने मानानि नियमाश्च
९. स्रुवमानम्

सप्तमः पटलः

१. मन्त्रोद्धारविधिः
२. षडक्षरमन्त्रोद्धारः
३. जातिमन्त्राणां वर्णाः
४. कूटबीजमन्त्राणां लक्षणानि
५. मानसादिजपनिरूपणम्
६. केशवादीनां आयुधानि वर्णभेदाश्च
७. आचमनविधिः

५. मुक्तिदीक्षा
६. अधिकारिणी दीक्षा
७. दीक्षिताभिषेकः

द्वादशः पटलः

१. नरसिंहकल्पः
२. मोक्षोपायः
३. पञ्चविंशद्रव्याणि

दौर्गभागः

प्रथमः पटलः

१. यागमन्त्रः
२. ध्यानम्
३. आयुधानि
४. अग्निकार्यम्

द्वितीयः पटलः

१. प्रतिष्ठा
२. वास्तुहोमः
३. गर्भन्यासः
४. जलाधिवासः
५. तोरणदेवताः
६. तोरणकलशाः
७. अधिवासहोमः
८. नेत्रोन्मीलनम्
९. बिंबशुद्धिः

तृतीयः पटलः

१. अधिवासः
२. अधिवासहोमः
३. बीजन्यासः
४. रत्नन्यासः
५. चतुर्थस्नानकलशपूजा

६. द्वारप्रायश्चित्तम्

चतुर्थ पटलः

१. कुण्डलक्षणम्

२. उत्सवः

३. उत्सवबलिः

शास्तृभागः

प्रथमः पटलः

१. प्रतिष्ठा

२. मण्डपसंस्कारः

३. मन्त्राः

द्वितीयः पटलः

१. प्रतिष्ठा

२. फलानि

३. उत्सवः

शङ्करनारायणभागः

प्रथमः पटलः

१. मन्त्राः

२. ध्यानम्

३. षडाधारः

४. नेत्रोन्मीलनम्

५. ध्यानाधिवासः

द्वितीयः पटलः

१. अधिवासहोमः

ब्रह्मकल्पः

Abbriviations

PS	Paper script
PL	Palm leaf

नारायणात्मकम्

नारायणात्मके वैष्णवे

प्रथमः पटलः

जगज्जन्मस्थितिध्वंसहेतवे शक्तिचोदनात् ।
सद्भावनामात्रवपुषे ब्रह्मणे[१] नमः ।।
ओतं प्रोतं यया सर्वं दृश्यते सचराचरम् ।
तां नमामि परां[२] शक्तिमादिक्षान्तार्णविग्रहाम् ।।
हिरण्यगर्भाङ्गभुवं मुनिं पप्रच्छ पुष्करः ।
यजनं देवदेवस्य भुक्तिमुक्तिफलप्रदम् ।।

श्रीनारद उवाच –

यदाह भगवान् विष्णुर्मया पृष्टो रमापतिः ।
तदिदानीं शृणु ब्रह्मन् गदतो मे द्विजैः सह ।।
नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे ।
प्रवक्ष्यामि समासेन तन्त्रं नारायणात्मकम् ।।
वास्तुसंग्रहमारभ्य तीर्थस्नानावसानिकम् ।
कर्मकाण्डे तु निर्द्दिष्टं तदिदानीमिहोच्यते ।।
वर्णगन्धरसैर्युक्तां विशुद्धां कर्षणादिभिः ।

[1] PS विष्णवे
[2] PS रमां
[3] PL अश्म च
[4] PS प्रभुं
[5] PS सर्वा o
[6] PS र्दिक्पै o

भूतकूरबलिं दत्वा दृष्ट्वेमं मन्त्रमुच्चरेत् ।।

भूतानि राक्षसावापि येत्र तिष्ठन्ति केचन ।

ते सर्वे व्यपगच्छन्तु कुर्महे भवनं हरेः ।।

खात्वोर्वीं पुरुषमात्रेण धान्यंकुंभं निधाय च ।

आश्मञ्च[3] राजतं कूर्मं हैरण्यं स्थाप्य तन्मुखे ।।

खाते मृदाश्मभिः पूर्णे मुद्गरैः सुदृढीकृते ।

सुसमे गोमयांभोभिः सलिप्ते वास्तुमर्च्चयेत् ।।

राक्षोघ्नं वास्तुहोमं च हुत्वा वास्तुबलिं किरेत् ।

इष्टकाः स्थापयेद्दुर्व्यां हुत्वा होमञ्च शांकरे ।।

पक्वं गायत्र्याहुत्वा वक्ष्यमाणैश्च नामभिः ।

आज्याहुतीश्च गायत्र्या समिदादिचतुष्टयम् ।।

व्यस्तैरष्टाक्षरैरष्टौ व्याहृतीन्द्रादिलोकपैः ।

भूयोऽग्नये च सोमाय ग्रहेभ्यः प्रणवादिकैः ।।

देवताभ्यश्च सर्वाभ्यो विश्वेदेवेभ्य इत्यपि ।

विष्णवे व्याहृतीभिश्च स्वाहाकारसमन्वितैः ।।

समिदाज्यचरूनाज्यमष्टाधिकशतं शतम् ।

पञ्चपूर्णाहुतीर्हुत्वा द्विषट्केण समापयेत् ।।

द्वारदक्षिणशाखाधः स्थातव्याः प्रथमेष्टकाः ।

तन्मद्ध्ये गर्भपात्रं तु स्थातव्यमवटे दृढम् ।।

---

[3] PL अश्म च

चतुरश्रं चतुष्कोष्ठं कृत्वाग्न्यनिलकोष्ठयोः ।
पूर्वाग्रसूत्रे सौम्याग्रे तथैव निरृतीशयोः ।।
अश्वत्थशङ्कुनोल्लिख्य मूलेन प्रोक्षणेन च ।
प्रणवेन भुवं[4] ध्यात्वा कोष्ठेष्वष्टभिरक्षरैः ।।
अग्न्यादीशानपर्यन्तमष्टौ ताः सन्निधापयेत् ।
पादुकोपरि विप्राणां नृपतेस्तत्समं भवेत् ।।
अधस्ताद्वैश्य शूद्राणां वर्जयेन्निम्नमुन्नतम् ।
अष्टाङ्कुलं तदर्धोर्ध्वं पादहीनोत्तरछदम् ।।
ताम्रं सान्द्रं भवेत्छ्लक्ष्णं गर्भपात्रं सुशोभनम् ।
विभज्य वसुभिर्भित्तिं विहायान्तस्त्र्यं..शकम् ।।
बाह्ये वा चतुरो भागान्मध्येंशे तत्समं न्यसेत् ।
त्रिधा विभज्य चाद्यांशे कपाटार्गळयोगतः ।।
विन्यसेत् गर्भपात्रं तु गुप्तं भित्याधरातले ।
गोमूत्रपञ्चगव्यादिभिः संक्षाळ्य परिशोध्य च ।।
धारणाभिर्यथान्यायं तस्मिन् ध्यात्वाऽक्षरांबुजम् ।
प्रादक्षिण्येन कृत्वान्तं पूर्वं सागरमुद्धृतिम् ।।
दिग्वि दिक्षु च मध्येऽष्टौ गायत्र्या विन्यसेन्मृदम् ।
गिरितीर्थनदीभ्यश्च ह्रदात्कर्कटकालयात् ।।
वल्मीकखलदन्त्युक्षशृङ्गेभ्यश्चाहृताः क्रमात् ।

[4] PS प्रभुं

पङ्कजोत्पलयोर्मूलं कौमुदं लोहिताङ्गवम् ।।
मनःशिलां हरीतालमञ्जनं श्यामसीसकम् ।
सौराष्ट्रीं रोचनां चैव गैरिकं पारतं तथा ।।
वज्रमौक्तिकवैडूर्यं शंखस्फटिकपुष्यकम् ।
चन्द्रकान्तं महानीलं पद्मराग्ञ्च पूर्ववत् ।।
शालिनीवारकौ चैव कंङ्कुमाषकुलत्थकान् ।
निष्पावतिलमुद्गांश्च पाकपूर्णान् ससर्षपान् ।।
दिक्षुकाञ्चनरौप्यायस्त्रपूण्यथ हिरणमयम् ।
सुवर्णं कूर्मरूपं च शंखं चक्रं च कोणतः ।।
धनुर्गदांबुजम्मध्ये प्रत्येकं च हिरणमयम् ।
दिक्षु चाष्टाक्षरैर्मध्ये सप्ता[5]नष्टाक्षरेण वा ।।
अग्नेर्दक्षिणभागे तु सादयित्वा ततो हुनेत् ।
घृतं द्वादशभिर्वर्णो पक्वै[6]र्नारायणेन च ।।
बीजानि सर्वधातूनि सर्व[7]लोकाश्च पर्वताः ।
समुद्राः सर्वतीर्थानि नद्यश्चाथ ह्रदास्तथा ।।
पाताळाश्चैवनागाश्च दिग्गजा वृषभा अपि ।
व्याहृतीभिश्च तारेण घृतमन्यत्पुरोदितम् ।।
आज्यं समर्प्य तत्पात्रं पिधायाग्रकरस्थितम् ।

[5] PS सर्वा ०

[6] PS र्दिक्पै ०

[7] PL सप्त ०

जप्त्वा[8] मन्त्रान् भुवं ध्यात्वा प्राङ्मुखो निशि[9] देशिकः ।।

सुमुहूर्त्ते द्विजानुज्ञां प्राप्य तूर्यादिनिस्वनैः ।

शक्तिं ध्यात्वार्चयित्वास्यां गर्भभूतमिदं स्मरन्[10] ।।

ब्रह्माण्डं पार्थिवं तत्वं गृहमूर्तिं प्रसूतये[11] ।

ब्रह्माण्डाधिष्ठितं[12] ध्यायेत् सशैलांभोधिदिग्गजम् ।।

सर्वभूतधरे कान्ते पर्वत[13]स्तनमण्डिते

समुद्रपरिधाने त्वं देवि गर्भं समाश्रय[14]।।

एवं न्यस्ते तु गर्भे तु सर्वत्र च सुखं भवेत् ।

प्रासादं कारयेत्तत्र बिंबं तदनुरूपतः ।।

सप्तमान्नवमाद्वापि प्रागेवस्याच्छुभेऽहनि ।

पञ्चमाद्वाङ्कुरारोपस्त्रिकालोक्षार्चनान्वितः ।।

त्रिविधं पात्रमुद्दिष्टं मङ्कलाङ्कुररोपणे ।

पालिका घटिका चैव शरावश्चेति भेदतः ।।

प्रत्येकं द्वादशग्राह्याः पालिकाः षोडशैव वा ।

पञ्चविंशाङ्कुलोच्चास्तास्तद्वक्त्रं षोडशाङ्गुलम् ।।

षडङ्गुलं चतुष्कोच्चं पीठं तत्सन्धिरङ्गुलम् ।

घटिकामानमङ्गुल्यः षोडश द्वादशैव वा ।।

---

[8] PL दत्वा

[9] PS,PL दिशि

[10] PL स्मरेत्

[11] PL प्रसूयते

[12] PL ब्रह्मणोनुष्टितं

[13] PL सर्वत

[14] PL , PS समाश्रयम्

पञ्च वक्त्राणि दिक्षूर्ध्वं मितानि[१५] चतुरङ्गुलैः ।
पालिकापीठवत्पीठं नाळं च चतुरङ्गुलम् ।।
तालास्योच्चं शरावं तु चतुरङ्गुलपीठकम् ।
मृद्वालुकाकरीषैस्तु पूरयित्वोत्तरोत्तरम् ।।
दूर्वादिभिरलंकृत्य कूर्चान् विन्यस्य तन्मुखे ।
सूत्रेण दर्भदाम्ना च वेष्टयित्वा विशोध्य च ।।
प्रागग्राण्युत्तराग्राणि पञ्च तद्विगुणानि तु ।
पातयित्वाथ सूत्राणि धान्यकूर्चान् प्रविन्यसेत् ।।
त्रिपङ्तीकृत्य पात्राणि स्थापयेत् स्थान उत्तरे ।
अग्न्यादीशानपर्यन्तं पालिकादीनि खण्डशः ।।
यवमुद्गतिलव्रीहिमाषशिंबकुलत्थकान् ।
प्रियङ्गुसर्षपश्यामराजमाषाढकीयुतान् ।।
द्वादशाक्षरमन्त्रेण क्षाळ[१६]येत् क्षीरवारिभिः ।
पुण्याहं वाचयित्वेति मङ्गलाङ्कुरदेवताः ।।
प्रीयन्तां वापयेत्तानि पात्रेष्वष्टाक्षरेण तु ।
सवनेषु जितं तेन निशागन्धादिभिरुक्षणम् ।।
अर्चनं बीजदेवानां नामभिश्च बलिक्रियां ।
नामभिर्दिवसेशानामष्टदिक्षु निशासु च ।।
विष्णुर्ब्रह्माशिवश्चैते संपूज्याः पालिकादिषु ।

[15] PL मिताभि
[16] PL क्षार

यवसर्षपमुद्गेषु ब्रह्मा रुद्रो हरिः क्रमात् ।।

वायुः पूज्यस्तु निष्पावे स्कन्दः पूज्यः प्रियङ्गुके ।

माषेष्विन्द्रः कुलत्थेऽग्निः शालिष्वर्को यमस्तिले ।।

वरुणोराजमाषे श्रीराढक्यां श्यामगः शशी ।

भूतपितृयक्षनागब्रह्मशिवविष्णवश्च रात्र्यधिपाः ।

पायसचरुणाज्येन क्रमेण दिवसेषु दिक्षु बलिरेषाम् ।।

प्रथमं भूतकूरेण द्वितीयं तिलतण्डुलैः ।

धानोडुंबिकलाजैस्तु त्रितीयं हि चतुर्थकम् ।।

नाळिकेरपयः सक्तुशालिपिष्टविमिश्रितम् ।

पद्माक्षतैः पञ्चमस्यादपूपै षष्ठमेव हि[१७] ।।

पायसं सप्तमं गौळं कृसरं दिवसद्वये ।

प्रातः कर्मदिने दत्वा पश्चात्कर्मणि योजयेत् ।।

ध्वजं च स्थापयेदग्रे पश्चाद्वक्ष्यामि वोत्सवे ।

शयने सन्निवेश्यादौ बिंबन्तु सुपरीक्षितम् ।।

गृहीतं धनदानेन पूजयित्वात्र शिल्पिनम् ।

नयनोन्मीलनं तुष्टैः कारयित्वा यथाविधि ।।

प्रणवं प्लुतमुच्चार्य पादयोस्तां तदा स्पृशेत् ।

प्रक्षाळ्य वारिभिः पूर्वं दर्भैः सङ्घृष्य सर्वतः ।।

स्पृष्ट्वा गोबालकैश्चैनां घृताक्तां क्षाळयेज्जलैः ।

[17] PL ० स्यादपूपै षष्ठमेव हि

शमीपल्लवसंयुक्तानक्षतान् संस्कृतेऽनले ।।
भूरादिसत्यपर्यन्तैः प्रत्येकं जुहुयाच्छतम् ।
क्षिप्त्वा दूर्वाक्षतं मूर्ध्नि मंगळानि च दर्शयेत् ।।
अपराह्णे तु संप्राप्ते नीत्वा बिंबं जलाशयम् ।
दीपं छत्रं ध्वजं स्थाप्य तोयेऽस्मिन् वरुणं स्मरेत् ।।
संहृत्याग्निमयं ध्यात्वा बिंबं संहारमार्गतः ।
दर्भैर्वस्त्रैश्च संछाद्य फलकायां निवेश्य च ।।
योगपीठं स्मरन्[१८] ज्योतिर्बिंबमप्सु निवेशयेत् ।
लोकपालान् बहिर्ध्यात्वा पञ्चमन्त्रैस्तु शाययेत् ।।
त्रिरात्रमेवं वस्तव्यं पीठिकां पच्छिलामपि ।
भवने मुक्तमात्रे तु वेष्टयेद्धर्मतन्तुना ।।
अस्त्रेण दर्भदाम्ना च पुनः संक्षाळ्य वारिभिः ।
प्राभञ्जनेन संमृज्य[१९] बीजेन शकृदंबुभिः ।।
नैशाकरेण चालिप्य राजिः सिंहात्मना किरेत् ।
गन्धलेपमथाष्टार्णैः पञ्चगव्यन्तु पञ्चभिः।।
विकिरां द्वादशार्णेन विष्णुना कुसुमैः किरेत् ।
धूपदीपञ्च चक्रेण कुर्यात् पुष्पास्त्रमोचनम् ।।
एवं शुद्धौ तु सर्वत्र कुंभमस्त्रेण विन्यसेत् ।
राक्षोघ्नमसकृत्जप्त्वा सूक्तं दिग्बन्धमाचरेत् ।।

[18] PL स्मरेत्
[19] PL संमार्ज्य

आघारवदथाग्नेय्यां कृत्वा चाग्निमुखं पुनः ।
रक्षोहणादि मन्त्राभ्यां पक्वमाज्याहुतीर्हुनेत् ।।
कृणुष्वाष्टादशैर्मन्त्रैर्येदेवा इति पञ्चभिः ।
पञ्चभिर्जातवेदादैर्व्याहृतीभिरनन्तरम् ।।
अपामार्गसमित्सर्पिरन्नाज्यं चाक्रिकेण तु ।
अष्टाधिकं शतं हुत्वा पूर्णां वै द्वादशात्मना ।।
अपामार्गरसाज्यादि्भर्भवनं प्रोक्षयेत्कुशैः ।
होमान्ते हुतमन्त्रैश्च तस्मै दद्याच्च दक्षिणाम् ।।
तमेवैशेग्निमाधाय पूर्ववच्चानलं मुखम् ।
कृत्वाध्वर्युश्च तत्पूर्वे व्रीहितण्डुलवस्त्रकैः ।।
कुशदूर्वाशमीकूर्चैः क्लृप्ते पीठे घटौ न्यसेत् ।
रत्नहेमाम्बुपूर्णेतु विधिना शान्तिमर्चयेत् ।।
अपरं तण्डुलैः पूर्णं तत्प्राच्यां वाथ पश्चिमे ।
शन्नोदेवीतितन्मन्त्रं तत्पादैस्तु षडंगकम् ।।
वास्तोष्पतेतिमन्त्राभ्यां पक्वं हुत्वा घृतं हुनेत् ।
वास्तोष्पते ध्रुवेत्याद्यैः षड्भिर्दुर्गाभिरेव च ।।
प्रत्यृचं शन्नवर्गैश्च व्याहृतीभिरिति क्रमात् ।
शमीसमिद्घृतान्नाज्यं शान्त्या चाष्टोत्तरं शतम् ।।
तावन्मूलेन दूर्वाभिर्गव्याक्ताभिर्स्त्रिभिस्त्रिभिः ।
नमोरुद्राय तत्प्राच्यां हुतशेषं कुशेषु च ।।

हुतभस्माज्यगव्यादि्भः सशान्त्यदि्भर्गृहं हरेः ।

कुशाग्रैः प्रोक्षयेद्विद्वांस्त्वं विप्रस्त्वमिति ब्रुवन्[20] ।।

चतुरश्रं समं कृत्वा विभज्य नवधा पुनः ।

नवभिर्ब्रह्मणः क्षेत्रं षडि्भः षडि्भश्च दिक्ष्वथ ।।

क्षेत्रमार्यविवस्वाख्यमित्राणाञ्च[21] महीभृतः ।

कोष्ठाभ्यां चैव कोष्ठाभ्यामष्टौ क्षेत्राणि कोणतः ।।

अग्न्यादिसवितुः पूर्वं सावित्रस्याथ राक्षसे ।

इन्द्रस्येन्द्रजयस्याथ रुद्ररुद्रजयाह्वयोः ।।

आपापवत्सयोर्बाह्ये त्वेकैकेन पदेन तु ।

द्वात्रिंशदर्यमादीनां स्कन्दादीनां तथा बहिः ।।

अष्टौ क्षेत्राणि तेषां तु वक्ष्ये नामान्यनुक्रमात् ।

आदित्यो भगवान् सत्यो भृशश्चैवान्तरिक्षकः ।।

अग्निः पूषा च वितथो गृहक्षो यम एव हि ।

गन्धर्वो भृंगराजश्च मृगश्च पितरस्तथा ।।

दौवारिकश्च सुग्रीवः पुष्पदन्तो जलाधिपः ।

असुरः शोषरोगौ च वायुर्नागश्च मुख्यकः ।।

भल्लाटश्चाथ चन्द्राख्यश्चार्गळश्चादितिर्दितिः ।

ईशानश्चाथपर्जन्यो जयन्तेन्द्राविति क्रमात् ।।

शर्वस्कन्दोर्यमाह्वश्च जम्भकः पिलिपिञ्छकः ।

---

[20] PL ध्रुवं

[21] PL विप्राणाञ्च

चरकी च विदारी च पूतना पापराक्षसी ।।
दिग्विदिक्षु[२२] बहिस्तेषां ग्रहेभ्यो विकिरेद्बलिम् ।
ईशाद्याः पुनरापाद्याः द्वादश सपितामहाः ।।
अर्चनीयाश्च शर्वाद्या इति केचिद्वदन्ति हि ।
पुण्याहं वाचयेद्वाच्या गेहेऽस्मिन् वास्तु[२३]देवताः ।।
ब्राह्मणान् भोजयेद्रात्रौ शिवं वास्त्विति वाचयेत् ।
वेश्माग्रे मण्डपं कुर्याच्चतुर्द्वारं सुभूषितम् ।।
चतुरश्रायतं बिंबे बहुवीरे तु कल्पयेत् ।
पञ्चकुण्डसमायुक्तं सुप्रच्छन्नं सुवेदितम् ।।
त्रिधा संवेष्टयेत्सूत्रैर्दर्भदाम्ना शिवादिकम् ।
दर्भपल्लववस्त्रोद्यद्त्तोरणानि यथा दिशम् ।।
स्योनापृथिविमन्त्राद्यैर्नामभिः स्थाप्य पूजयेत् ।
सुशोभनाख्यमाश्वत्थं सुभद्राख्यमुदुंबरम् ।।
नैय्यग्रोथं सुकर्माख्यं सुहोत्रं प्लाक्षमेवहि ।
भूमौ हस्तप्रविष्टानि चतुर्हस्तोच्छ्रयाणि वा ।।
ऋगादिवेद[२४]रूपाणि तदधीशा दिगीश्वराः ।
तोरणाभ्यन्तरेस्थाप्या ध्वजाश्चाष्टौ यथादिशम् ।।
दर्भपल्लवदिक्पालचिह्नचीनांशुकोज्वलाः ।
नामभिः कुमुदादीनां स्थाप्यास्तैरेव पूजयेत् ।।

[22] PS दिवि दिक्षु
[23] PL वाच्य
[24] PS देव º

पद्मरागप्रवाळाप्सु प्राक्पूज्यौ पूर्णपुष्करौ ।
वैडूर्यपुष्यतोयस्थौ यमे चानन्दनन्दनौ ।।
वीरसेन सुषेणौ च नीले मरतकेऽपरे ।
संभवप्रभवौ सौम्ये मुक्तास्फाटिकतोययोः ।।
नामभिर्लोकपालानां पुनः कुंभचतुष्टयम् ।
गन्धतोयैश्च संपूर्य द्वारं प्रति समर्चयेत् ।।
तोरणध्वजदेवानां बलिं दत्वा स्वनामभिः ।
मार्जनालेपनाद्यैस्तु भूमिं संशोध्य वेश्मवत् ।।
ऐशान्यां पीठमभ्यर्च्य कलशं कर्करीयुतम् ।
अष्टाक्षरेण संपूर्य हेमरत्नाक्षतांबुभिः ।।
आहूय च हरिं तस्मिन्मूर्त्यंगपरिवारकैः ।
अभ्यर्च्याच्छाद्य वस्त्राभ्यामेकेन करकं ततः ।।
चक्रमिष्ट्वा तमादाय कुड्यशेषं प्रदक्षिणम् ।
अच्छिन्नधारया सिञ्चेत्तन्मार्गेण घटं नयेत् ।।
संहृत्य पात्रसंलग्नान् विकीर्णान्विकिरानपि ।
निक्षिप्य पद्मधान्येषु विन्यसेद्वैष्णवं घटम् ।।
स्वस्तिके च पुनस्तद्वत्सिद्धार्थोपरि वर्धनीम् ।
अनिलोदकयोर्मध्ये कुण्डं वानल[२५] सूर्ययोः ।।
संमार्ज्यालिप्य सिद्धार्थान् विकीर्य परिमार्ज्य च ।

[25] PS वानिल ०

आलिप्य गन्धपिष्टेन कृत्वा चोल्लेखनक्रियाम् ।।

संशोष्य दह्य संप्लाव्य बीजैः संशोष्य संदहेत्[२६] ।

संप्रोक्ष्य शकलं त्यक्त्वा स्थाप्य तारेण विष्टरम् ।।

इष्ट्वा तु वैष्णवं पीठमाहूयाभ्यर्च्य तां रमाम् ।

मथितं मणिजं वापि श्रोत्रियागारजं शुभम् ।।

शरावस्थं[२७] ततो वह्निमादायाभ्यर्च्य यादिना[२८] ।

ध्यात्वा तु वैष्णवं शुक्लं प्रादक्षिण्यक्रमेण तु ।।

जानुभ्यामवनिं गत्वा योन्यान्तस्यां विनिक्षिपेत् ।

तारादिवह्निजायान्तं व्याहृतीत्रयमुच्चरन् ।।

ससमूह्य परिस्तीर्य साधनानि च सादयेत् ।

स्रुवं च प्रोक्षणीपात्रमाज्यपात्रं पुनः स्रुचम्[२९] ।।

दर्भांश्च समिधोऽप्यष्टौ पालाशीः प्रोक्षणीक्रियाम्[३०] ।

आज्यस्य संस्कृतिं कृत्वा संपूज्य परिषिच्य तम् ।।

हृदा च समिधं हुत्वा[३१] तेनाष्टौ च घृताहुतीः ।

पूर्णाहुती द्विषट्केण गर्भाधानं कृतं स्मरेत्[३२] ।।

व्रतबन्धान्तमष्टार्णैः कर्म कुर्याद्विभावसोः ।

गर्भाधानं पुंसवनं सीमन्तं जातनामनी ।।

---

[26] PL बीजैः स्तत्तद्दहेत्समाधिना

[27] PS शरावगं

[28] PL लादिना

[29] PS स्रुवम्

[30] PL समिधः पालाशीः कुर्याच्च प्रोक्षणी क्रियाम्

[31] PL कृत्वा

[32] PL स्मरन्

अन्नाशनं पुनश्चौळं व्रतबन्धन्तु पूर्ववत् ।
मूलांगैः जुहुयादाज्यं जायमाने जनार्दने ।।
शयनं संस्तरेद्याम्ये[३३] स्वस्तिके धान्यराशिषु ।
तदुत्तरे तु यागार्थमालिखेच्चक्रपङ्कजम् ।।
स्वस्तिकेषु घटानष्टौ पूरयेद्दिग्विदिक्षु च ।
घृतपूर्णं तु सौवर्णं शिरस्थानेऽस्य पार्श्वयोः ।।
ताम्रपात्रं पयःपूर्णं मधुपूर्णं तु राजतम् ।
पादस्थानेऽर्घ्यपाद्यौ च सर्वान्विष्णवादिनामभिः ।।
अशक्तस्तैजसं कुर्यात् कर्म कुंभत्रयं विना ।
शिरस्थानेऽष्टगन्धादिभिः पूरयेत्तैजसं घटम् ।।
बिंबन्तु शयने स्थाप्य कलशे देवमर्चयेत् ।
अङ्गमूर्तिपरिवारैः वस्त्राभ्यां परिवेष्टयेत् ।।
द्वाराणां पार्श्वदेशेषु शय्यायाश्चाष्टदिक्षु च ।
मण्डलस्य च कुण्डानां स्तंभमूलेषु विन्यसेत् ।।
मङ्गलाङ्कुरपात्राणि श्य्यान्ते मङ्गलानि च ।
शंखं चक्रं पताकाञ्च श्रीवत्सं दर्पणं वृषम् ।।
मत्स्ययुग्मं च कुंभं च मङ्गलानि प्रचक्षते ।
शय्यायां पीठमभ्यर्च्य स्नानार्थं पूरयेत् घटम् ।।
ब्रह्मश्रीचंपकाशोकनीपाम्रबकुलार्जुनैः ।

[33] PS ० द्रम्यं

अश्वत्थोदुंबरवटप्लक्षोत्थैः पल्लवैर्नवैः ।।
मध्यमे नवके पूर्वं पूरयेद्वह्नि[३४]दिग्गतम् ।
पद्मकं रोचना दूर्वा दर्भस्तंबाच्छसर्षपान् ।।
चन्दने जातिरावर्तं कुन्दं राक्षसगोचरे ।
यवव्रीहितिला हेम रजतं कूलमृद्वयम् ।।
गोमयं भूम्यसंस्पृष्टं वायव्यकलशे न्यसेत् ।
सहदेवी विष्णुपर्णी[३५] भृंगराजमहौषधीः ।।
शमी शतावर्यमृता श्यामाकमपि शांकरे ।
कदळीनाळिकेरांम्रधात्रीपनसडाडिमैः ।।
सविल्वभव्यैरष्टांगं फलतोयं हि वारुणे ।
दक्षिणे पञ्चगव्यन्तु कषायं पूर्वदिग्दळे ।।
अश्वत्थोदुंबरवटब्रह्मशम्योत्थितं रसम् ।
सहदेवी वचा चैव शतमूली शतावरी ।।
कुमारी च गुळूची च सिंही व्याघ्रीति चोत्तरे ।
सप्तवल्मिकमृत्तोयैः पूरयेन्मध्यमं घटम् ।।
सोममन्त्रेण मध्यस्थकलशान् पूरयेदिति ।
ओं सों सोमाय वनस्पत्यन्तर्गतये नमः ।।
हिरण्यवर्णां हरिणीमिति तानभिमन्त्रयेत् ।
नवकेषु च मध्यस्थ कलशांद्दिक्क्रमेण तु ।।

34 PS ᴼ बहि
35 PS ᴼ पत्नी

अष्टार्णेनाष्टगन्धादिभिः द्विषड्केणापराञ्जलैः ।
अष्टोत्तरशतं चाज्यं हुत्वाष्टार्णेन तान् स्पृशेत् ।।
स्नानमण्डपमैशान्यां भूषयित्वा विशोधयेत् ।
प्रतिमार्थं तु निर्गच्छेच्छंखतूर्यादिनिस्वनैः ।।

इति नारायणात्मके प्रथमः पटलः

नारायणात्मके वैष्णवे
द्वितीयः पटलः

नमस्कृत्वा हरिं वक्ष्ये बिंबशुद्धिं द्विधा हरेः ।

मूलार्चां वाथ कर्मार्चां तथा तोयेऽधिवासिताम् ।।

उद्धृत्य[३६] विधृतां यत्नात् चतुर्भिर्मूर्तिधारकैः ।

दर्भपाणिस्थितो विद्वानुपतिष्ठेत संस्थिताम् ।।

नमस्तेऽर्चे सुरेशानि प्रतीके विश्वकर्मणः ।

प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः ।।

त्वयि संपूजयामीशं नरायणमनामयम् ।

रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव ।।

विज्ञाप्यैवं दुकूलांशुसिद्धार्थकयुतं शुभम् ।

ऊर्णासूत्रेण बध्नीयात् कौतुकं दक्षिणे करे ।।

अंगुष्ठानामिकाभ्यांतु सारयित्वा जितादिना ।

अष्टाक्षरेण संजप्तं सप्तधा विघ्नशान्तये ।।

ततोऽर्चितां सुवस्त्राढ्यां ब्रह्मयानेन तां नयेत् ।

शाकुनस्वस्तिसूक्ताभ्यां दशस्वस्तिभिरेव च ।।

त्रीणीत्यास्थाप्य पीठे तां भद्रंकर्णेति कीर्तयेत् ।

---

[36] PS उद्वर्त्य

तेजोऽसि शुक[37]मन्त्रेण घृतेनालिप्य सर्वतः ।।
चूर्णैरुद्वर्त्य चालिप्य मृदा मूर्धानमित्यृचा ।
समुद्रज्येष्ठा इति च संक्षाल्य स्नापयेन्मृदा ।।
कषायं यज्ञा यज्ञेति पञ्चगव्यं सुयोजितम् ।
पयः पृथिव्यामिति च याः फलिनीः फलोदकम् ।।
यादिव्या इति मन्त्रेण मूलमङ्गलवारि च ।
मधुवातेति संयोज्य सौवर्णे मधुसर्पिषी ।।
जप्त्वा हिरण्यगर्भेति सौवर्णकशलाकया ।
उल्लिख्य चित्रंदेवेति चाप्यायस्वेति पूरयेत् ।।
उन्मील्यमाने नेत्रे तु गां प्रदर्श्य प्रदापयेत् ।
स्नापयेत् कलशैः पश्चात् कोणस्थैः पल्लवादिकैः ।।
हंसः शुचिषदित्याद्यं परं विष्णोरराटया ।
सोमं राजानमिति च[38] विश्वतश्चक्षुरित्यपि ।।
मासूरपिष्टेनोद्वर्त्य द्रुपदादिति देशिकः ।
मुरमांसीयुतं पिष्ट्वा क्षीरेणामलकं फलम् ।।
आलिपे[39]द्देवमूर्धानं मानस्तोकेति मन्त्रवित् ।
गन्धोदकलशैः स्नानं कुर्याद्विष्णोरराटया ।।

---

[37] PL शुक्र ॰

[38] PS ॰ मित्याप ॰

[39] PL आलिंपे ॰

इदमापश्च शुद्धादि्भश्चानेनावाहयेद्विभुम् ।
एह्येहि भगवन् विष्णो लोकानुग्रहकारक ।।
यज्ञभागं गृहाणेमं वासुदेव नमो नमः ।
ततो हिरण्मयेत्यर्घ्यं पाद्यं तेनैव दापयेत् ।।
आचामं विष्णुगायत्र्या मधुपर्कं तयैव हि ।
बृहस्पतेति वासस्तु वेदाहमिति चोत्तरम् ।।
ऊर्णामयन्तु सौवर्णं तारेणास्योपवीतकम् ।
गन्धं माल्यं पवित्रं च इदं विष्णुर्विचक्रमे ।।
विश्वतश्चक्षुरित्येवं कुर्यात्सकलनिष्कलम् ।
ओषधयः समिति च पुष्पाणि विकिरेद्बुधः ।।
धूरसीति पुनर्धूपं समिद्ध इति चाञ्चनम् ।
रोचनां येनाकस्येति दीर्घायुत्वाय वर्चसे ।।
किरेत्पुष्पाणि माल्यानि पुनः पुण्याहमाचरेत् ।
पादुकं व्यजनं छत्रं वारिधारां च पादयोः ।।
पुष्पापकिरणं भूयो गायत्र्या विष्णुसंज्ञया ।
ततो रथन्तराख्येन वैराजेन समाहितः ।।
गयात्रसाम्ना पश्चात्तं स्तुवीत पुरुषोत्तमम् ।
अन्यथा वाभिषेकं तु सर्वमन्यच्च पूर्ववत् ।।
मृत्कषायौषधीतीर्थगव्यैर्व्यैस्तैः कुशांबुभिः ।

गव्यगन्धाब्जतोयैश्च चतुर्भिः पल्लवादिकैः ।।
नद्यास्तटाभ्यां संगृह्य मृदं वल्मीकजां तथा ।
कुळीरवासतः क्षेत्राद्विषाणाग्राच्च वेदितः ।।
शमीपलाशखदिरबिल्वाश्वत्थविकङ्गताम् ।
उदुंबरश्च न्यग्रोथः कषायांगानि चैव हि ।।
शंखपुष्पं प्रियंगुं च विष्णुक्रान्तिं शतावरीम् ।
दूर्वामृतवचादोषैरुक्तमौषधिमङ्गळम् ।।
सेव्यार्त्यंबुजटास्रायो मुरशीतैस्तु गन्धकम् ।
मध्यस्थनवकस्थांस्तु बाह्यखण्डेषु मध्यगान् ।।
दिक्विदिक्क्रमयोगेन तद्वच्छिष्टांस्तु वारिणा ।
हिरण्यवर्णाः शुचय इति पूर्वन्तु मृज्जलैः ।।
समुद्रज्येष्ठा इति च कषायेणाभिषेचयेत् ।
इदमापः प्रवहत इमं मे वरुणस्तथा ।।
सावित्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णोति वै दधि ।।
तेजोऽसि शुक्रमित्याज्यं[४०] देवस्य त्वा कुशोदकम् ।
पञ्चगव्यं पयस्वत्या यासां गन्धोदकं तथा ।।
आपोहिष्ठेति वै दद्यात् पद्मतोयं हि पूर्ववत् ।

---

[40] PS शुक्लमित्याज्यं, PL शुक्रमसीत्याज्यं

उन्मील्य नयने पश्चात् चतुर्भिः पल्लवादिकैः ।।

इदमापश्च शुद्धादिभिर्द्रव्यैः[४१] सह समापयेत् ।

उत्तिष्ठेति समुद्धाप्य रथे तिष्ठन् रथं नयेत् ।।

पौरुषेण तु सूक्तेन मण्डपस्य प्रदक्षिणम् ।

पाद्यमर्घ्यं जितं तेन दत्वा द्वारि प्रवेशयेत् ।।

द्वादशार्णेन संस्थाप्य सकळीकृत्य पूर्ववत् ।

शाययेच्चायं स अग्निः सर्वयोगेश्वरोमिति ।।

उपास्यापरसन्ध्यान्तु स्नानाचामादि पूर्वकम् ।

अधिवासं ततः कुर्यात्तत्ववित्परमात्मनः ।।

अस्त्रदग्धौ करौ जातावन्यौ तत्वमयौ स्मरेत् ।

रेचयित्वा ततो वायुं प्रविशेत्तत्र पूरके ।।

विद्याकोशं ततः पश्चादानुपूर्व्येण मन्त्रवित् ।

महाभूतमयं देहं धर्माधर्मसमन्वितम् ।।

शुष्कं दग्धं क्रमाध्यायेत् प्लावितं च स्वबीजकैः ।

बिन्दुरूपयुतं ध्यायेदात्मानं व्योम्न्यवस्थितम् ।।

यथासिक्तात्भवेत्बीजादंङ्कुरस्तद्वदात्मनः ।

प्रभवं चिन्तयेद्विद्वान् प्रणवत्वमुपागतम् ।।

लिप्यर्णैस्तत्वमन्त्रैश्च मूर्तिभिः स्वाक्षरैरपि ।

---

[41] PL गव्यैः

अङ्गैर्मुद्रागणैर्न्येस्त्वा ध्यात्वात्मानं समर्चयेत् ।।

ब्रह्मलिङ्गानि संकल्प्येष्ट्वान्तर्योगेण केशवम् ।

अधिवासं ततः कुर्यात्देवस्यास्मिन्ननन्यधीः ।।

प्रणवेन समायोज्य जीवमर्चाभिमानिनम् ।

उत्क्राम्यात्मैकतां नीत्वा स्वस्मिन् सर्वेश्वरे हरौ ।।

शुष्कदग्धाप्लुतोर्व्यप्सु ता वह्नौ सोऽनिले स खे ।

तन्मनोगर्वधीमायाः क्रमात्तारेश्वरं नयेत् ।।

तां स्वामव्याकृतिं मायामधिष्ठाय सिसृक्षया ।

नादात्मा परमेष्ठ्यादिपञ्चकं सकलं सृजेत् ।।

जातं लीनं यतो यस्मिन्नव्याकृतमवस्थितम् ।

यत्स्वरूपं विन्दु शक्तिं पारमेष्ठ्यात्मिकी हरेः ।।

तामेव वासुदेवाख्यां लभते शब्दकारणात् ।

तां स्वामव्याकृतिं मायामधिष्ठाय विलोड्य खम् ।।

पौरुषींमसृजच्छक्तिं ततः सङ्कर्षणात्मिकीम् ।

अव्याकृतमधिष्ठाय विलोड्य स्पर्शसंज्ञिकीम् ।।

विश्वात्मिकीं सुरूपां तां[४२] विदुः प्रद्युम्नसंज्ञिकीम् ।

स्वामधिष्ठाय संक्षोभ्य तैजसीमसृजत्प्रभुः ।।

निवृत्याख्यां रसोपेतामनिरुद्धात्मिकीं पराम् ।

---

[42] PL सुरूपानां

अधिष्ठाय स्वयं मायां रसमात्रां तदात्मनः ।।

सर्वात्मिकीं गन्धमात्रां सब्रह्मामसृजत् क्रमात् ।

चिच्छक्तिसर्वकार्यातिरवकाशकरी परा ।।

द्योतनात् कालशक्त्योर्या द्वितीया चादिविक्रिया ।

तृतीया विविधाभासा चतुर्थी विषयं गता ।।

विषयात्मिकी महाशक्तिर्विष्णोः सा हि जगन्मयी ।

यद्धाम परमं विष्णोर्न्नित्यं बुद्धमनामयम् ।।

तत्कालशक्तिमूलं स्याद्विदुस्तं परमेष्ठिनम् ।

ज्ञातृत्वमस्मिन्नेवेति यद्ज्ञानं पौरुषं विदुः ।।

ज्ञातारमहमस्मीति यत्तद्विश्वाख्यदीधितिम् ।

शक्तिः शक्तिमतोः सत्यं संशयित्वाऽत्र निश्चितम्[४३] ।।

तद्ज्ञानं तु निवृत्याख्यं निश्चित्य रमते परे ।

तदा[४४] सर्वात्मबोधं तत्पञ्चमं परमात्मनः ।।

पञ्चैताः शक्तयः प्रोक्ताः परस्य परमात्मनः ।

अशेषजगदाधाराः पदेत्वैशे व्यवस्थिताः ।।

स हि सर्वात्मको ब्रह्मा सिसृक्षुर्विविधं जगत् ।

ताभिस्तन्मात्रभूताभिरद्भिरण्डमथासृजत् ।।

तदण्डं पञ्चभूतात्मभूतं शुभ्रं हिरणमयम् ।

---

[43] PS निश्चयम्

[44] PS सदा

तत्र संक्रमते जीवशक्तिरात्मनि संहृता ।।

तन्मात्रपञ्चकाधारा संहृताशेषवृत्तिकी ।

जीवेनाधिष्ठितप्राणो लब्धवृत्तिस्तदा भवेत् ।।

सह्यव्याकृतसंज्ञस्तु प्राणोऽध्यात्मिक इष्यते ।

गुणत्रयममी[४५] बुद्धिर्जायते त्वष्ट[४६]वृत्तिकी ।।

अहंकारस्ततस्तस्मात् कर्तृशक्तिश्च जायते ।

शब्दाद्यर्थमयी वृत्तिर्मनस्तु समनन्तरम् ।।

संकल्पादिमयन्तस्मादर्त्था पञ्च विजज्ञिरे[४७] ।

शब्दं स्पर्शं च रूपं च रसं गन्धं च पञ्चकम् ।।

तैर्ज्ञानकर्मशक्तीनि खाद्यारब्धान्यतः परम् ।

श्रोत्रत्वक्चक्षुषी जिह्वा घ्राणं ज्ञानाख्यमिन्द्रियम् ।।

वाचं च पाणिपादाख्यौ पायूपस्थौ हि कार्मकम् ।

आकाशवायुवह्न्यापपृथ्वीत्येभिर्महद्वपुः ।।

तारं बीजं नमस्कारं परायेति पदं क्रमात्।

तत्वानां आत्मनेत्येवं सर्वाणि सनतीनि तु ।।

मादिकान्तानि बीजानि बिन्द्वन्तानि क्रमाद्विदुः ।

पुरुषः प्रकृतिश्चेति जीवप्राणसमाह्वयौ ।।

---

45 PS मयी

46 PS, PL तोष्ट ०

47 PL विरज्ञिरे

ध्यात्वा तौ व्यापकत्वेन विन्यस्य हृदये पुनः ।
बुद्ध्यहंकारचेतांसि मूर्ध्नि वक्त्रे ततो हृदि ।।
तन्मात्राणि पुनर्गुह्ये पादयुग्मेन्द्रियाणि हि ।
स्वगोचरेषु भूतानि मात्रास्थानेषु विन्यसेत् ।।
हृत्पुण्डरीकं शं विद्याद्धं सूर्यं[४८] द्वादशात्मकम् ।
द्वासप्ततिसहस्रेषु व्याप्य नाडीष्ववस्थितम् ।।
कलाषोडशकं सोमं तन्मध्ये संविचिन्तयेत् ।
तन्मध्ये रं महावह्निं ध्यायेद्दशकलात्मकम् ।।
जीवन्तमीशभावस्थं योजयेत्परमेष्ठिना ।
षों बीजेन ततो ध्यायेत् पौरुषं भावमाश्रितम् ।।
यं बीजेन ततो विश्वभावस्थं सर्वसाक्षिणम् ।
ध्यायेद्द्रामिति बीजेन सर्वज्ञं सर्वतोमुखम् ।।
अनुग्रहकरं भावं सविसर्गेण वेन तु ।
ध्यायेन्निवृत्तिसंज्ञां तु शान्तं शान्तेन चेतसा ।।
सर्वसंभूतिकर्तारं सर्वात्मानं पुनः स्मरेत् ।
लां बीजेन ततः पश्चात् सर्वसंहृतिकारणम् ।।
रक्षार्थं कोपतत्वं क्षौं सर्वसंयमकारणम् ।
शिरोललाटदृग्वक्त्रगळहृत्कुक्षिनाभिषु ।।

---

[48] PL सूक्ष्मं

द्वादशार्णान्यसेद्विद्वानूरुजानूगलांघ्रिषु ।

अष्टाक्षराणि षड्वर्णान् कदृग्वदनहृत्सु च ।।

सगुह्यपादयोर्विद्वानध्वभेदविकल्पितान् ।

पीतं रक्तं तथा गौरं श्यामं धूम्रं हि नीलतम् ।।

रक्तं शुक्लं सुकपिलं कृष्णं पीतं रविप्रभम्।

हृदयं च शिरश्चैव शिखा वर्मास्त्रलोचने ।।

उदरं च तथा पृष्ठं बाहू ऊरू च जानुनी ।

पादयुग्मं तथांगानि शिष्टयोर्वर्णयोगतः

करणानि च चत्वारि तन्मात्राण्यथ पञ्च वै ।

बुद्धिकर्मेन्द्रिये भूतैर्द्वादशाध्वा प्रकीर्तितः ।।

प्रकृतिर्लिङ्गशक्तिश्च कर्ता जीवेदवस्थिताम् ।

गन्धमात्रात्मकं तत्वं विकारैः संवृतं तदा ।

आत्मना पञ्चमात्राभिष्षोढा सुविहितं पुमान्[४९] ।।

एवं ध्यायेत्क्रमांन्यस्त्वा गन्धपुष्पैः सुरेश्वरम् ।।

अङ्गावरणसंयुक्तमर्चयेत् परमं पदम् ।

अर्चयेत् पङ्कजे धर्मं ज्ञानं वैराग्यमेव च ।।

ऐश्वर्यं कोणदेशेषु दिक्ष्वधर्मादिकं क्रमात् ।

[49] गन्धमात्रात्मकं तत्वं विकारैः संवृतं तदा
आत्मना पञ्चमात्राभिष्षोडासुविहितं पुमान् These lines are not found in PS

अज्ञानमप्यवैराग्यमनैश्वर्यं महोदयम् ।।
सत्वं रजस्तमो मायां विद्यां चानन्तमुज्ज्वलम् ।
कन्दं नाळं तथा पद्मं सूर्यं सोमं विभावसुम् ।।
अत्मानमन्तरात्मानं परमात्मानमेव हि ।
दिक्षुमध्ये च विमला वह्नौ चोत्कर्षणीमपि ।।
ज्ञानां तथा क्रियां योगां प्रह्वीं सत्यामथोत्तरे ।
ईशाञ्चानुग्रहामेवं पीठं चक्रं तथोपरि ।।
अक्षबीजन्तु वर्णान्त्यं पत्रकेसरकर्णिकम् ।
ह्रस्वाक्षराणि बीजानि नाभिस्थे सवनत्रये ।।
असंवृतस्वरैः कालमनुमासेषु योजयेत् ।
ऋतवो मूलबीजैस्तु वसन्ताद्या यथाक्रमम् ।।
मधुश्च माधवः शुक्रः शुचिश्च नभ एव हि ।
नभस्यश्शेष ऊर्जश्च सहश्चैव सहस्यकः ।।
तपस्तपस्यौ मीनाद्या मेषाद्या वाथ कालतः ।
अश्वयुक्प्रभृतीन्येषु नक्षत्राणि यथाक्रमम् ।।
बिन्द्वन्तैरादिकान्तैस्तु हादिमान्तैर्नवग्रहाः ।
अश्वयुग्भरणी चैव कृत्तिका रोहिणी तथा ।।
मृगशीर्षमधार्द्रा पुनर्वसू तिष्यमेवहि ।
आश्लेषमघफल्गुन्यस्तथा चोत्तरफल्गुनी ।।

हस्तश्चित्रा पुनः स्वाती विशाखा चानुराधका ।
ज्येष्ठामूलं तथाषाढा सोत्तरा श्रवणाह्वया ।।
श्रविष्ठाशतभिषक्पूर्वप्रोष्ठ[५०] पदं पुनः ।
एवमुत्तरमेतानि रेवत्या कथितानि हि ।।
सिंहेऽर्कः कर्कटे चन्द्रो मेष वृश्चिकयोः कुजः ।
बुधो मिथुनकन्याख्ये मीनधन्वाख्ययोर्गुरुः ।।
वृषतुलाह्वयोः शुक्रः सौरिः मकरकुंभयोः ।
राहुकेतू च संपूज्यौ यद्गतौ तौ विजानता ।।
बिन्द्वाद्यैः पञ्चदशभिरसि[५१]ते वामतः स्वरैः ।
आकाराद्यैर्विसर्गान्तैर्दक्षिणे तिथयः स्मृताः ।।
राशीनां मध्यतः पूज्याः स्वरेणाद्येन[५२] चाप्यमा ।
आदित्याः केशवाख्याभिरर्चनीया अरं प्रति ।।
प्रकृत्यादीनि तत्वानि पूजयेत् प्रथिषु[५३] क्रमात् ।
एवमिष्ट्वा हरिं तस्मिन्नाहूय परिपूजयेत् ।।
विधानमपरं वक्ष्ये चक्रपङ्कजपूजने ।
सितास्तरणपर्यन्तं पीठं धर्मादिकं यजेत् ।।
अधरोत्तरयोगेन तत्वानि प्रथिषु[५४] स्मरेत् ।

---

[50] प्रोष्ठ Missing in PS

[51] PS ० धि ०

[52] PL णाद्येन

[53] PL तिथिषु

सूर्यं द्वादशधा भक्त्वा द्वादशारेषु चिन्तयेत् ।।

स्वरैर्द्वादशभिश्चैव नपुंसकविवर्जितैः ।

सोमन्तुतिथि[५५]भिर्युक्तं पूर्ववत् प्रत्यरं यजेत् ।।

सवनानि क्रमान्नाभौ वर्णं[५६] त्यक्त्वाक्षमध्यगम् ।

कन्दं[५७] नाळं पुनर्ग्रन्थिकं नळैः परिपूजयेत् ।।

मण्डलान्यात्मयुक्तानि पत्रकेसरकर्णिकाः ।

यजेद्वाप्यस्थितान्योमैः शक्तिं केसरमध्यगाः ।।

केसरेषु तदंगानि दळमध्येषु मूर्तयः ।

अरगाः केशवाद्या स्युः सन्धिगाः स्युः श्रियादयः ।।

मेषादिविष्णुपूर्वा वा शक्त्याद्या वा तदुत्तरे ।

केशवनारायणमाधवगोविन्दविष्णवः ।।

मधुसूदनस्त्रिविक्रमो वामनश्रीधराह्वयम् ।

हृषीकेशः पद्मनाभो दामोदर इतीरिताः ।।

श्रीश्चवागीश्वरी कान्तिः क्रियाशक्तिर्विभूतयः ।

इच्छा प्रीतिरतिश्चेति मायाधीर्महिमेति च ।।

शंखं चक्रं हलं भूयो मुसलं च शरं धनुः ।

खड्गं च खेटकं दिक्षु परितो नेमिमण्डले ।।

---

[54] PL तिथिषु

[55] PS ० स्तुति ०

[56] PL वर्णां

[57] PS कुन्दं

वीथ्यामिन्द्रादयो दिक्स्थास्तद्बाह्ये कुलिशादयः ।
एवं संपूज्य नैवेद्यमुभयत्र निवेदयेत् ।।
शोधयित्वा पुरा दर्भमृक्त्वग्गव्यांबुभिः क्रमात् ।
संहृत्योत्पाद्य लिप्यर्णैः श्रीसूक्तेनापि विन्यसेत् ।।
श्रियं संपूज्य संच्छाद्य पिण्डिकामधिवासयेत् ।
तद्वद्ब्रह्मशिलां चापि रत्नानि शयने सह ।।
उपस्थानं चरेदग्नेरग्निं दूतं वृणीमहे ।
पूर्वाग्निं प्रणयेत्पूर्वमग्निना रयिमित्यृचा ।।
त्वमग्नेद्युभिरित्येवं दक्षिणं पश्चिमं पुनः ।
अग्न आयाहिमन्त्रेणाऽप्यग्निमग्निमथोत्तरम् ।।
तत्वैः शतं शतं हुत्वा न्यासवत् सेचयेद्घृतम् ।
आधिवासनिकान् होमाञ्जुहुयुर्गुरुमूर्तिपाः ।।
विष्णुना मूर्तिमन्त्रैर्वा स्वांगैर्वेदादिभिस्तथा ।
समिदाज्यचरून्लाजान् सर्षपांश्च यवांस्तिलान् ।।
व्रीहीनाज्यं च पालाश्यः समिधः क्षीरवृक्षजाः ।
घृतेन दध्ना पयसा मधुना इति तेन च ।।
अष्टाष्टाहुतयः कुर्यात्च्छान्तिकर्मणि पञ्चभिः ।
पादयुग्मं विभोर्नाभिं हृदयञ्च भ्रुवोत्तरम् ।।
सर्वगात्रन्तु मूर्ध्नादि संस्पृशेत्तैः स्रुवेण तु ।

एकस्मिन् वा समस्तेषु शान्तिं व्याहृतिमूलकैः ।।
चतस्रो धेनवस्थाप्या दक्षिणद्वारदेशतः ।
गंगाच यमुना चैव तथा गोदा सरस्वती ।।
नामभिः पूज्याः[५८] गायत्र्या दुहेत्ता श्रपये[५९]च्चरुम् ।
तया निवेदयेत् भागं मूलस्थायाथ चापरम् ।।
जुहुयाच्च तथा वह्नौ भागं त्रेधा विभज्य च ।
भागेन विकिरेद्बाह्ये बलिं तत्रावशेषितम् ।।
गुरुश्च यजमानश्च भक्षयेत् कायशुद्धये ।
ब्राह्मणान् भोजयेत्तत्र पायसं द्वादशोत्तमान् ।।
हिरण्यं दक्षिणां दद्याद्विष्णुर्मे प्रीयतां इति ।
आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।।
प्रसन्नाः परितुष्टास्ते प्रतिगृह्णन्त्विमं बलिम् ।
ये दक्षिणदिशि स्थिताः ये पश्चिमदिशि स्थिताः ।।
अद्याश्च कर्मजाश्चैव ये भूता उत्तरदिशि स्थिताः ।
प्रसान्नाः परितुष्टास्ते प्रतिगृह्णन्त्विमं बलिम् ।।
वृक्षेषु पर्वताग्रेषु ये वह्निदिशमाश्रिताः[६०] ।

58 PS, PL पूज्य
59 PL श्रयये
60 ये पश्चिदिशि........ ये वह्निदिशमाश्रिताः] Missing in PL

भूमौ व्योम्नि स्थिताये च तेऽपि गृह्णन्त्विमं बलिम् ।।

निरृतिदिशमाश्रिताः ये वायुदिशमाश्रिताः ।

वृक्षेषु पर्वताग्रेषु ये रुद्रदिशमाश्रिताः ।।

भूमौ व्योम्नि स्थिता ये च तेऽपि गृह्णन्त्विमं बलिम् ।

विनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः ।।

दिक्षु सर्वासु तिष्ठन्तः प्रतिगृह्णन्त्विमं बलिम् ।

अष्टदिक्ष्वमुना मन्त्रैस्त्रिरावृत्या ददेत् बलिम् ।।

अष्टाविंशतिसंख्यं वा शतमष्टोत्तरं हुनेत् ।

वज्रलेपविधौ चाज्यं नवभिर्विमलादिभिः ।।

समिदाज्यचरूनाज्यं मूलेनाष्टोत्तरं शतम् ।

रत्नानां चैव पीठस्य गायत्र्याज्यं शतं शतम् ।।

पालाशीः समिधः पूर्वं तावदष्टाक्षरेण तु ।

दिक्ष्वष्टासु निधायाग्निमष्टौ चाष्टाक्षरैर्घटान् ।।

पलाशखदिराश्वत्थप्ळक्षन्यग्रोधबिल्वजाः ।

औदुंबरः सकाष्ठव्यः सर्वाः पालाश्य एव वा ।।

अष्टाक्षरेण गायत्र्या पुनराज्यं समाप्य च

कुंभेभ्य स्तोयमाहृत्य प्रतिमामूर्ध्नि सेचयेत्

प्रोक्षयेत् बहिरन्तस्तैर्भवनं कलशोदकैः

त्रितारया वा गायत्र्या[६१] पक्वहोमं द्विरुक्तया ।
पूर्णाहुतिं द्विषट्केण वौषटन्तेन सर्वतः ।।
सप्त सप्त विभागेन गर्भागारे विभाजिते ।
ब्रह्मदेवमनुष्याणां पिशाचानां पदानि तु ।।
ब्राह्मं पञ्चदशांशः स्याद्देवभागांस्त्रेयोदश ।
एकादश नवांशाश्च शिष्टयोः पृष्ठ[६२]भागतः ।।
ब्रह्मांशे मध्यमं त्यक्त्वा द्वितीयमपि पृष्ठतः ।
स्थितैकबेरबिंबस्य त्रितीयं स्थानमिष्यते ।।
त्रिभक्ते द्वारविस्तारे त्रिसप्तांशे [६३] तु मध्यमे ।
मध्यार्धेनोत्तरं सूत्रं गमनाय प्रकल्पयेत् ।।
ब्रह्माङ्गुलियवं मध्यान्नीत्वेशे कल्पयेद्द्वयोः ।
किञ्जिन्मानुषमाश्रित्य कुर्यादासनमेव[६४] च ।।
देवमानवभागाभ्यां शयनं तद्वदेवहि ।
वेद[६५]गर्तसमायुक्तां शक्तिमाधारसंज्ञिकीम् ।।
स्थाप्य गायत्र्या चेदंशेनैर्विज्ञापयेद्गुरुः ।
त्वमेव परमाशक्तिस्त्वमेवासनधारिका ।।

---

[61] पुनराज्यं समाप्य च....... त्रितारया वा गायत्र्याः] Missing in PS
[62] PL पूर्व
[63] PL त्रिभक्तांशे
[64] PL कुर्यादयनमेव
[65] PL देव o

देवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा ।
स्थितं चराचरं यस्यां रत्नानां निधिरव्ययः ।।
सा त्वं ब्रह्मशिलारूपा तिष्ठात्र धरणी स्थिरा ।
रत्नान्यादाय पात्रेण[66] गुरुः पुण्याहपूर्वकम् ।।
ईशित्वादि क्रमाच्छक्तीर्ध्यात्वाष्टार्णैः प्रविन्यसेत् ।
वायुव्योमान्तरस्थानि यासां बीजानि वै विदुः ।।
प्रथमावरणे बीजं द्वितीये रत्नमेव च ।
धातुसंज्ञं तृतीये तु चतुर्थे लोहमेव हि ।।
सिद्धार्थं पत्मरागं च पारतं हेमपङ्कजम् ।
ब्रह्मस्थाने तु मूलेन संपातमपि सेचयेत् ।।
गायत्र्या पीठमभ्यर्च्य ध्रुवाद्यौरिति विन्यसेत् ।
तारांशगुणसंभिन्नान् स्वरस्पृक्व्यापकाह्वयान्।।
न्यस्त्वा मध्यादिवर्णांस्तु रमासूक्तं च विन्यसेत् ।
इष्ट्वा पीठं तु निर्गच्छेदानयनार्थं विभोस्तनुम् ।।
स्नात्वाचम्य शुचिर्भूत्वा विद्वान् सन्ध्यामुपास्य च ।
वस्त्रालंकारसंयुक्तः प्राणायामपुरःसरम् ।।
शुद्धिं कृत्वात्मनः पश्चादन्तर्यागमनन्यधीः ।
तारेणेद्धृत्य संस्थाप्य[67] शयनात् फलकोपरि ।।

66 PL पात्राणि

सिक्त्वा शान्त्युदकं मूर्ध्नि मूर्तिकुंभोपसंभृतम्[६८] ।

अभ्यर्च्याच्छाद्य वस्त्राभ्यां युवंवस्त्राणि चाब्रुवन् ।।

शान्तिं[६९] पूर्वं पठेदत्र स्थापिते चोत्तरामपि ।

उत्तिष्ठेति समुत्थाप्य[७०] शंखदुन्दुभिनिस्वनैः ।।

अतोदेवेति सूक्तेन प्रासादान्तं नयेच्छनैः ।

इति नारायणात्मके द्वितीयः पटलः

[67] PL संच्छाद्य
[68] PS संहृतम्
[69] PS शान्ति
[70] PL च संस्थाप्य

नारायणात्मके वैष्णवे
तृतीयः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे ।

प्रतिष्ठामथ वक्ष्यामि मन्त्रध्यानसमन्विताम् ।।

नीराजनं[७१] कर्करींञ्च कुभेशं कलशं पुरः।

गुरोः पृष्ठे विभोर्वेरं कर्तारं बन्धुभिः सह ।।

गेहं प्रदक्षिणीकृत्य पाद्याघ्यौं द्वारि दापयेत् ।

आत्मनः प्रतिमायाश्च लंघनं परिहृत्य च ।।

अन्तः प्रवेशयेच्छिष्यैः[७२] श्रीसूक्तेन हरिं हरिः ।

जितं ते पुण्डरीकाक्ष इति तारत्रयोपरि ।।

हृदं ते ते विश्व इति भावनेति सुपूर्वकम् ।

ब्रह्मण्यहृत्ततस्तेऽस्तु नमः पुरुषपूर्वज ।।

ओं त्रैलोक्यविक्रान्ताय त्रिविक्रमायोदीरयेत् ।

परमेष्ठ्यादिमन्त्रांश्च स्वस्वमूर्तिसमन्वितान् ।।

नामाष्टकं द्विषट्कस्थं विद्महे धीमहे पदम् ।

तन्नो विष्णुस्तदन्ते च चोदयात् प्रादि चोच्चरेत् ।।

अनेन स्थापयेद्देवं भूर्भुवस्वरोमिति ।

अष्टशक्तिमयं वेष्ट्यं[७३] तैलं चानुग्रहात्मकम् ।।

---

[71] PS , PL नीराञ्जनं

[72] PS प्रवेशयेच्छिष्टैः

सिकतोपलकार्पासलाक्षाचूर्णं समं स्मृतम् ।

द्विगुणं तु हरीतक्याः चूर्णन्तु द्विगुणं स्मृतम्[७४] ।।

तत्परं द्विगुणं[७५] सर्जं शंखमामलकं मनाक् ।

शक्तीर्जप्त्वा सपुण्याहं ध्रुवाद्यौरिति बन्धयेत् ।।

नाभेरधस्थादुत्थाप्य करणैश्च समन्वितम् ।

तन्मात्रदेहप्राणैश्च पञ्चभिर्व्याप्य विग्रहम् ।।

ऐश्वर्यं ज्ञानधर्मैश्च वैराग्येण समन्वितम् ।

स्फुरद्रश्मिप्रतानेन[७६] व्याप्ताशेषदिगन्तरम् ।।

दिवाकरसहस्राभमिडया ब्रह्मरन्ध्रगम् ।

स्थित्वा किञ्जिल्ललाटेऽन्तः प्रविशन्तं विचिन्तयेत् ।।

शीर्षण्यांस्तु दशप्राणांस्तत्रस्थो विनियोजयेत् ।

कर्णिकाद्वारमार्गेण प्रविश्य हृदयांबुजम्

वृत्तिपञ्चकभेदेन प्राणादींस्तत्र योजयेत्[७७]

पुर्यष्टकं हृदि न्यस्य तन्मध्ये पुरुषोत्तमम् ।।

पद्मकोशप्रतीकाशं ध्यात्वा पुर्यष्टकं परम् ।

तदन्ते सूर्यसोमाग्निबिन्दूनां मण्डलानि हि ।।

तन्मध्ये परमाकाशं तस्मिंश्च महिमात्मनः ।

अणोरणीयसी तन्वी पीता नीवारशूकवत् ।।

---

[73] PS वेष्यं

[74] PS हरीतक्यात् पूर्णं तद्विगुणं परम्

[75] PS त्रिगुणं

[76] PL प्रकाशेन

[77] कर्णिकाद्वारमार्गेण........ प्राणादींस्तत्र योजयेत्] Missing in PS

ज्ञानभावनयाऽप्येवं भावयेत् परमं पदम् ।
ततः पुर्यष्टकं ध्यायेदुत्पन्नं सृष्टिमार्गतः ।।
बिंबानुरूपं[७८] तं ध्यायेत्सर्वज्ञं सर्वतोमुखम् ।
न्यासादि सकलं कृत्वा मुद्राः सम्यक् प्रदर्श्य च ।।
कुंभेशशान्तिकुंभाभ्यामष्टार्णेनाभिषेचयेत् ।
लोकानुग्रहहेत्वर्थं स्थिरीभव सुखाय नः ।।
सानिद्ध्यं हि सदा देव प्रत्यहं परिवर्धय[७९] ।
मा भूत् प्रजाविरोधोस्मिन्यजमानः समृद्ध्यताम् ।।
स भूपालं तथा राष्ट्रं सर्वोपद्रववर्जितम् ।
क्षेमेण[८०] वृद्धिमतुलां सुखमक्षयमश्नुताम् ।।
पूजां गृहाण[८१] सततं मामुद्धर नमो नमः ।
अनेन विकिरेत् पुष्पमावाहनविधानवत्[८२] ।।
विश्वतश्चक्षुरित्येवं पठेत्तस्याग्रतः स्थितः ।
लेप्ये[८३]ऽधिवास्य कर्मार्चां प्रवेश्य सुरमन्दिरम् ।।
इयं सा देवते मूर्तिरोमित्युक्त्वा प्रविन्यसेत् ।
जीवन्यासादिसर्वन्तु मूलार्चायामिति स्थितिः[८४] ।।
द्वास्थादि सर्वदेवानां संस्थानं तत्र तत्र तु ।

[78] PL बिन्द्वानुरूपं
[79] PS , PL परिवर्तय
[80] PL क्रमेण
[81] PL ग्रहाण
[82] PL ० वित्
[83] PL लेख्ये ०
[84] PS स्थितः

संपूज्यान्नं निवेद्यास्मै हुत्वाग्नौ विकिरेत् बलिम् ।।
द्वास्थादीनां तु सर्वेषां निर्माल्यमपनीय च ।
न्यस्त्वा पुरुषसूक्तं तु श्रीसूक्तं पञ्चशक्तिजम् ।।
मूलत्रयञ्च तस्याग्रे स्थित्वा स्तोत्रेण तोषयेत् ।
प्रसीद भगवन्मह्यमज्ञानात् कुण्ठितात्मने ।।
तवांघ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ।
अज प्रसीद भगवन्नमितद्युतिपञ्चर ।।
अप्रमेय प्रसीदास्मद्दुःखहन् पुरुषोत्तम ।
स्वसंवेद्य प्रसीदा[85]स्मदानन्दात्मननामय ।।
अचिन्त्यसार विश्वात्मन् प्रसीदेश निरञ्जन ।
प्रसीद तुंग तुगांनां प्रसीद शिवशोभन[86] ।।
प्रसीद स्पष्टगंभीर गंभीराणाम्महाद्युते ।
प्रसीद व्यक्तविस्तीर्णानामणोरणौ ।।
प्रसीदार्द्रार्द्रजातीनां प्रसीदान्तोन्तदायिनाम्[87] ।
गुरोर्गरीयस्सर्वेश प्रसीदानन्यदेहिनाम् ।।
सृष्टिस्थितिविनाशानां मूलविच्छेदकारकः ।
जय माधव मायात्मन् जय केशव केशिहन् ।।
जय सुन्दर सर्वात्मन् जय शाश्वत शंखभृत् ।
जय शाङ्र्गधर श्रीमन् जय नन्दकनन्दन ।।

[85] PL स्वरूपा
[86] PL भावन
[87] PL प्रसीदान्तान्तयायिनाम्

जय चक्र[88]गदापाणे जया जेय जनार्दन ।
जय रत्नकराबद्ध किरीटाक्रान्तमस्तक ।।
जय पक्षिपतिछायानिरुद्धार्क कराकर ।
नमस्ते नरकाराते नमस्ते मधुसूदन ।।
नमस्ते नळिनापाङ्ग नमस्ते नयनाञ्जन ।
नमः पापहरेशान नमः सर्वभयापह ।।
नमः संभृतसर्वांग नमः संभृत कौस्तुभ ।
नमस्ते नयनातीत नमोऽतिक्रान्त वाक्पथ ।।
नमो विभिन्नज्ञेयांग नमः स्मृतिपथातिग ।
नमस्त्रिमूर्तिर्भेदेन सर्गस्थित्यन्तहेतवे ।।
नमस्ते[89] त्रिदशारातिजिष्णवे परमात्मने ।
चक्रभिन्नारिचक्राय चक्रिणे चक्रबन्धवे ।।
विश्वाय विश्ववन्द्याय विश्वभूतात्मने नमः ।
नमोस्तु योगिध्येयाय नमोस्त्वध्यात्मरूपिणे ।।
भक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ।
मनोवाक्कायचेष्टास्युर्ध्यानस्तुतिनमस्क्रियाः ।।
देवेशकर्मसर्वं मे भवेदाराधनं तव ।
यजमानः समृद्धा[90]त्मा नत्वा देवं गुरुं तथा ।।

---

88 PS शंख ०
89 PL विष्णवे
90 PL समृद्ध्या ०

देवस्वं दक्षिणां दत्वा मूर्तिपेभ्यः स्वशक्तितः ।
सदस्येभ्यः पुनश्चान्नं सार्वजन्यं प्रदाय च[९१] ।।
अष्टांगं प्रणमेत्भूमौ गुरुर्द्वारन्तु घट्टयेत् ।
नोद्घाटयेत्[९२] पुनर्द्वारं त्रीण्यहानि कथंचन ।।
कर्मशेषं प्रवक्ष्यामि देवदेवस्य चक्रिणः ।
प्रणीय वैष्णवं वह्निं जुहुयुर्दिक्षु वेश्मनः ।।
नामभिः कलशान्यष्टौ लोकेशानां प्रपूरयेत् ।
इन्द्रक्रतुमिति प्राच्यामग्निं दूतं हुताशने ।।
नाके सुपर्णं याम्यायां नैरृत्यां मोषुणः परा ।
यं रक्षन्तीति वारुण्यां वायवायाहि वायवे ।।
सोमं राजानमित्येवं सौम्ये शार्वे त्रियंबकम् ।
अमीभिः पञ्चताराद्यैर्जुहुयुः पक्वमृत्विजः ।।
समिद्रव्याणि चोक्तानि परिहोमेऽधिवासने ।
नामभिश्च दिशापानां होमस्नानं बलिक्रिया ।।
तन्तुवेष्टनमारभ्य जननान्तं विभावसोः ।
कर्म कृत्वा घृतं हुत्वा गायत्र्या सेचयेत् घटान् ।।
हेमरत्नाष्टगन्धादिभिरष्टार्णेन तु मध्यमम् ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च केरकम् ।।
द्रावितं कदळीतोयमैक्षवञ्च रसं शुभम् ।

[91] PS प्रदापय
[92] PS नोत्पाटयेत्

नवकाष्टकमध्यस्थान् विष्णुना दिग्विदिक्क्रमात् ।।

शिष्टान् गायत्र्या सर्वान् क्रमान्नद्युदकेन तु ।

अष्टाक्षरेण वा सर्वान् गन्धोदैर्द्वादशापरान् ।।

द्वादशार्णेन वा सर्वान् संपूज्याच्छाद्य वाससा ।

आधिवासनिकान् होमान् जुहुयुर्गुरुमूर्तिपाः ।।

शास्त्रोदितमिदञ्चास्तु स्नपनं देवनिर्मितम् ।

अनेन स्नपनेनास्तु प्रसन्नो भगवान् हरिः ।।

द्वारन्तु वायुनोद्घाट्य निर्माल्यमपकृष्य च ।

अस्त्रेण कौतुकं छित्वा स्नाप्य तैलेन शोधयेत् ।।

पीठमिष्ट्वा तमाहूय सकळीकृत्य पूर्ववत् ।

न्यासादि सकलं कृत्वा मधुपर्कं प्रदाय च ।।

त्रिरस्त्रेण च नीराज्य कलशैरभिषेचयेत् ।

पञ्चोपनिषदैर्गव्यैः फलतोयेन विष्णुना ।।

अष्टार्णेन द्विषट्केण कादलेनैक्षवेण च ।

नद्योदकैः पृथक् सर्वैरापोहिष्ठादिभिस्त्रिभिः ।।

गन्धोदकैः स्वगायत्र्या प्रोक्ष्याब्लिंगैश्च[९३] केशवम् ।

अतो देवेति सूक्तेन मध्यमेन स्वविद्यया ।।

नीराज्योद्वर्त्य संपूज्य बलिं दत्वा द्विजान्यजेत् ।

स्नपनान्ते प्रतिष्ठान्ते वत्सरे मासि मासि वा ।।

---

[93] PS , PL प्रोक्ष्यालिंगैश्च

द्वादशाहं नवाहं वा सप्ताहं चोत्सवं भवेत् ।
भेरीसन्ताटनं पूर्वं पुण्याहमपि चक्रिणः ।।
पुण्याहपूर्वं बीजानां पालिकादिषु वापनम् ।
ध्वजसंस्थापनं पश्चात् स्थापितं वा समर्चयेत् ।।
द्वारद्वादशकं मुक्त्वा दशद्वाराय तद्ध्वजम् ।
दर्भस्त्रक्पल्लवैश्चित्रं गरुडेन पताकया ।।
पुण्याहं वाचयित्वाद्भिः प्रोक्ष्योत्थाप्य समर्चयेत् ।
वज्राद्यायुधसंलग्नपताकाभिरलंकृतान् ।।
दिक्क्रमात् कुमुदादीनां ध्वजानष्टौ निधापयेत् ।
ग्रामान्ते चत्वरे चैत्ये पुण्योद्याने नदीतटे ।।
पीठिकाञ्च ध्वजंस्थाप्य रथ्यां संशोध्य भूषयेत् ।
मूलमन्त्रैस्तमभ्यर्च्य त्रिसन्ध्यं विकिरेद्बलिम् ।।
यद्यन्तर्द्वारमत्रापि पूज्यावानन्दनन्दनौ ।
नमस्ते द्वारपालाय चण्डायामिततेजसे ।।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये ।
ओं चण्डाय विष्णुपार्षदे नमः, ओं चण्डपार्षदेभ्यो नमः ।।
नमस्ते द्वारपालाय प्रचण्डायामितौजसे[९४] ।
नरसिंहतनूजाय शंखेनाङ्कितमौलये ।।
ओं प्रचण्डाय विष्णुपार्षदे नमः, प्रचण्डपार्षदेभ्यो नमः

[94] PL प्रचण्डायामिततेजसे

वाहनाय महाविष्णोस्ताक्ष्र्यायामित तेजसे ।

गरुडाय नमस्तेऽस्तु दुष्टसर्पेन्द्रमृत्यवे ।।

ओं पक्षिराजाय स्वाहा, गरुडाय नमः, वैनतेयाय नमः,

वैनतेयपार्षदेभ्यो नमः

शय्या यो जयतो धातुर्विष्णोर्विविधमायिनः ।

अनन्ताय नमस्तुभ्यमहीन्द्रनमितांघ्रये।।

अं अनन्ताय विष्णुपार्षदे नमः तत् ओं गं गणपतये विष्णुपार्षदे

नमः ओं स्त्रीं दक्षिणामूर्तये विष्णुपार्षदे नमः तत्

अग्रे पृष्ठे च देवस्य दक्षिणद्वारपार्श्वयोः ।

दत्वैतेषां बलिं दिक्षु मखादिसुरपुंगवान् ।।

दैत्यदर्पविनाशाय सहस्राक्षाय वृत्रहन् ।

कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो ।।

ओं लं इन्द्राय वज्रहस्ताय सुराधिपतये विष्णुपार्षदे नमः तत्

ओं नमो भूतेभ्यो भूतिकृद्भ्यः सर्वेभ्योरिष्टकृद्भ्यः सद्भ्योऽसभ्यः

सदसद्भ्यो विष्णुपार्षदेभ्यो नमो नमः स्वाहा

मुखं यः सर्वदेवानां येन हव्यञ्च नीयते ।

येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे ।।

ओं रं अग्नये शक्तिहस्ताय तेजोधिपतये विष्णुपार्षदे नमः , तत्

नमो भूतेभ्यः

येन संह्रीयते सर्वं येन धर्मश्च रक्ष्यते ।

यस्माद् बिभेति लोकोऽयं प्रेतनाथ नमोऽस्तुते[९५] ।।

ओं यमाय दण्डहस्ताय प्रेताधिपतये विष्णुपार्षदे नमः, तत्

ओं नमो भूतेभ्यः

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यम् ।

तस्मै निरृतिरूपाय रक्षसां पतये नमः ।।

ओं क्रों निरृतये खड्गहस्ताय रक्षोधिपतये विष्णुपार्षदे नमः, तत्

ओं नमो भूतेभ्यः

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रतिष्ठितम् ।

अमोघपाशहस्ताय तस्मैपां पतयेनमः ।।

ओं वं वरुणाय पाशहस्ताय जलाधिपतये विष्णुपार्षदे नमः, तत्

नमो भूतेभ्यः

पूर्यन्ते च ह्रियन्ते च येन प्राणादयः क्रमात् ।

भूतानां पतये नित्यं नमस्तस्मै मरुत्पते ।।

ओं यं वायवे ध्वजहस्ताय प्राणाधिपतये विष्णुपार्षदे नमः , तत्

नमो भूतेभ्यः

यं प्राश्यामरतां यान्ति देवाः यज्ञशरीरिणः ।

सोमाय गदिने तस्मै ज्योतिषां पतये नमः ।।

ओं सों सोमाय गदाहस्ताय नक्षत्राधिपतये विष्णुपार्षदे नमः, तत्

नमो भूतेभ्यः

95 PL नमो नमः

यत्प्रसादाज्जगत्सर्वं धनेन परिपूर्यते ।

यक्षगुह्यकनााथाय धननाथ नमोऽस्तु ते ।।

ओं धं धननाथाय गदाहस्ताय धनाधिपतये विष्णुपार्षदे नमः, तत्

वैश्रवणाय गदाहस्ताय यक्षाधिपतये विष्णुपार्षदे नमः[९६] तत्

नमो भूतेभ्यः

येन कालाग्निना लोको युगान्तेष्ववदह्यते ।

तस्मै ते ब्रह्मणः पुत्र विरूपाक्ष नमोस्तु ते ।।

ओं हौं[९७] ईशानाय शूलहस्ताय विद्याधिपतये विष्णुपार्षदे नमः,

तत्

नमो भूतेभ्यो भूतिकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्य सद्भ्योऽसद्भ्य

सदसद्भ्यो विष्णुपार्षदेभ्यो नमो नमः स्वाहा

स्तुतिमन्त्रैरुपस्थान[९८]नामादिमनुभिर्बलिम् ।

चण्डादीनां समुद्दिष्टं भूतकूरेण भौतिकम् ।।

पूर्वाद्यासु गुहादीनां शिवान्तानां दिशासु च ।

बलिं दत्वा परिभ्राम्य विष्वक्सेनं समर्चयेत् ।।

ओं नमः षण्मुखाय ओं नमः सनत्कुमाराय विद्महे षडाननाय

धीमहे तन्नः स्कन्दः प्रचोदयात् , तत् ओं हूं नमः पराय गोप्त्रे

---

[96] वैश्रवणाय गदाहस्ताय यक्षाधिपतये विष्णुपार्षदे नमः] Missing in PS

[97] PS हों

[98] PL ० रुपस्थानपूर्वन्नामा ०

नमः भूताधिपाय विद्महे भवपुत्राय धीमहे तन्नः शास्ता

प्रचोदयात्, तत्

वीरभद्रनमस्तेस्तु नमो विघ्नेश्वराय च ।

ब्राह्म्यादिभ्यश्च मातृभ्यः सर्वाभ्यो वै नमो नमः ।।

ओं वां वीं वूं वीरभद्राय सर्वमातृगणप्रियाय नमः, वीरभद्राय

विद्महे महाननाय धीमहे तन्नः शान्तः प्रचोदयात् । तत्

ओं गां गीं गूं गणपतये सर्वविघ्नविनाशनाय नमः, एकदंष्ट्राय

विद्महे गजाननाय धीमहे तन्नो दन्ती प्रचोदयात् तत्

ब्रां ब्रीं ब्रूं ब्रह्माण्यै नमः ब्रह्मभूतायै विद्महे कुशहस्तायै धीमहे

तन्नो ब्रह्माणी प्रचोदयात् तत्

हां हीं हूं माहेश्वर्यै नमः महेश्वरभूतायै विद्महे शूलहस्तायै धीमहे

तन्नः शांकरी प्रचोदयात् तत्

ओं क्रां क्रीं क्रूं कौमार्यै नमः स्कन्दभूतायै विद्महे शक्तिहस्तायै

धीमहे तन्नः कौमारी प्रचोदयात् तत् [९९]

हूं हूं हूं वैष्णव्यै नमः विष्णुभूतायै विद्महे चक्रहस्तायै धीमहे तन्नो

वैष्णवी प्रचोदयात् तत्

भां भीं भूं वाराह्यै नमः प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहे

तन्नो वाराही प्रचोदयात् तत्

[99] PL reads the next Mantra as ओं द्रां द्रीं द्रूं......... काळी प्रचोदयात् Here it seems misplaced.

ओं लां लीं लूं इन्द्राण्यै नमः इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहे तन्न इन्द्राणी प्रचोदयात् तत्

ओं द्रां द्रीं द्रूं भद्रकाळ्यै नमः रुद्रभूतायै विद्महे शक्तिहस्तायै धीमहे तन्नः काळी प्रचोदयात् तत्

ओं चांबादीनां गणाः सर्वे कोटिकोटिगणाधिपाः ।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः ।।

ओं हं खषोत्काय स्वाहा तत् ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः ओं हूं[100] वराहाय नमः तत्

ओं ह्रीं दुं दुर्गायै नमः तत्

श्रीधराय नमस्तेऽस्तु नमस्तेऽश्वमुखाय च ।
वागीश्वर्यादिमातृभ्यः सर्वाभ्यो वै नमो नमः ।।

ओं श्रीं श्रीधराय नमः। तत् ।।

ओं अं अश्वमुखाय नमः। तत् ।।

ओं वां वागीश्वर्यै नमः। तत् ।।

ओं क्रिं क्रियायै नमः। तत् ।।

ओं किं कीर्त्यै नमः। तत्।।

ओं लं लक्ष्म्यै नमः। तत्।।

ओं सृं सृष्ट्यै नमः। तत्।।

ओं विं विद्यायै नमः। तत्।।

[100] PL भूवराहाय

ओं कां कान्त्यै नमः। तत्।।

वागीश्वरी क्रिया कीर्तिर्लक्ष्मीः सृष्टिश्च पञ्चमी ।

विद्या कान्तिरिमे ज्ञेयाः शंखचक्रगदाधराः ।।

चतुर्थषष्ठौ बिन्द्वन्तौ द्वादशोऽथ त्रयोदश ।

आद्यश्चैकादशो ज्ञेयो द्वितीयश्चेन्द्रगाः स्वराः ।।

ओं शिवाय नमः तत्

ओं विष्वक्सेन नमस्तेऽस्तु देवनिर्माल्यधारिणे ।

शंखचक्रगदापाणे महापार्षदेश्वर ।।

ओं विष्वक्सेन वौं नमः, ओं शंखनिधये नमः, ओं पुष्पनिधये नमः, चक्राय नमः, ओं शंखाय नमः

गोपुरद्वारमासाद्य द्वारि संपूजयेन्निधी ।

चक्रशंखौ बहिर्द्वारि बहिर्निष्क्रम्य घोषयेत् ।।

ये समस्तं जगद्व्याप्य तिष्ठन्ति बलिकांक्षिणः ।

विष्णुपार्षदाः सर्वे गृह्णन्तु बलिमुत्तमम् ।।

अष्टदिक्षु ध्वजेशानां बलिं दद्यान्मुखादितः ।

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।।

शंकुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः

ओं कुमुदाय विष्णुपार्षदे नमः पञ्चाशद्गणेभ्य कुमुदपार्षदेभ्यः प्राक्स्थितेभ्यो नमः

ओं पञ्चाशत्गणेभ्यः कुमुदाक्षपार्षदेभ्योऽग्निदिक्स्थितेभ्यो नमः

ओं पञ्चाशत्गणेभ्यः पुण्डरीकपार्षदेभ्यो दक्षिणदिक्स्थितेभ्यो नमः ओं पञ्चाशत्गणेभ्यो वामनपार्षदेभ्यो निरृतिदिक्स्थितेभ्यो नमः

ओं पञ्चात्गणेभ्यः शंकुकर्णपार्षदेभ्यः प्रत्यक्स्थितेभ्यो नमः

ओं पञ्चाशत्गणेभ्यः सर्वनेत्रपार्षदेभ्यो वायुदिक्स्थितेभ्यो नमः

ओं पञ्चाशत्गणेभ्यः सुमुखपार्षदेभ्यो उदक्स्थितेभ्यो नमः

ओं पञ्चाशत्गणेभ्यः सुप्रतिष्ठितपार्षदेभ्यो ईशदिक्स्थितेभ्यो नमः

बलिपीठं समासाद्य पञ्चदिक्ष्वष्टदिक्ष्वपि ।

ये भूता इति मन्त्रेण दिक्ष्वैशान्यां बलिं हरेत् ।।

ये भूता पुरस्सदो निशाचरा रौद्राः सदसदो विरूपा विश्वरूपा महारूपा घोररूपाश्च मृगास्या विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदाश्च बलिमिच्छन्ति तेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यस्तेभ्यस्ताभ्यो नमो नमः एवं दक्षिणसदः पश्चिमसदः उत्तरसदः उपरिषदः

पूर्ववत् कुमुदादिभ्यः पीठिकास्वष्टदिक्षु च ।

मध्ये बलाय दत्वान्ते ग्रहेभ्यः सर्वदिक्षु च ।।

अमुना च बलिं दत्वा बलिशेषं समापयेत् ।

गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगाननाः ।।

ये क्रूरा येऽल्पसत्वाश्च भूतप्रेतनिशाचराः ।

वेताळाश्चैव मातंगा हीना हीनाश्च ये गणाः ।।

सर्वेषामेव तेषां च हरामि बलिमुत्तमम् ।
सर्वेभ्य एव तेभ्यस्तु सगणेभ्यो नमो नमः ।।
त्रिः प्रदक्षिणमावृत्य बलिना तोषयेद् गणान् ।
पञ्चाहं वाथ सप्ताहमेवमेव बलिं हरेत् ।।
पूर्वेद्युस्तीर्थयात्रायां निशि दद्यान्महाबलिम्।
विष्णुपार्षदेभ्यश्च प्रथमेभ्यो नमो नमः ।।
मातृभ्यस्तद्गणेभ्यश्च सर्वेभ्यो वै नमो नमः ।
पूर्वोक्तपीठिकास्वाभ्यां बलिं दद्यादितस्ततः ।।
अशक्तो नामभिर्नित्यं तेषां भूतबलिं हरेत् ।
कौतुकस्थं जगन्नाथं प्रवेश्य सुरमन्दिरम् ।।
मूलबिंबे समायोज्य सकळीकृत्य पूजयेत् ।
अलंकृत्य विभोरग्रमण्डपं सुपरिच्छदम् ।।
प्ररोहपालिकाद्यैश्च प्रदीपैरष्टमङ्गलैः ।
स्वस्तिके धान्यराशौ तु शयने पीठमर्चयेत् ।।
पुण्याहं वाचयित्वेदं विज्ञाप्याबद्ध्य कौतुकम् ।
तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरेश्वर ।।
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि ।
आवाह्य सकळीकृत्य मूलबिंबात्तु कौतुके ।।
शाययित्वार्चयित्वा तं क्षपयेदस्वपन्निशाम् ।
तात्कालिकीं क्रियां कृत्वा प्रातः संयोज्य केशवम् ।।

सकळीकृत्य संपूज्य हुत्वाग्नौ विकिरेत् बलिम् ।
उलूखलमलंकृत्य दासीभिश्चूर्णयेदिमान् ।।
सुवर्णं रजतं ताम्रमाषमुद्गयवान्निशाम् ।
घृतारोपणपूर्वन्तु तेन चूर्णेन चोन्मृजेत् ।।
पञ्चोपनिषदैर्हुत्वा दूर्वाग्रैः संस्पृशेद्धृतम् ।
के वक्त्रे हृदि गुह्ये च पादयोस्तैरनुक्रमात् ।।
क्षिप्त्वा पिप्पलपत्रे तु दिक्क्रमात् गौरसर्षपान् ।
दूर्वाक्षतयुतांस्तेषु पातयेन्मधुसर्पिषी ।।
वर्तिं प्रज्वाल्य विन्यस्य नीराज्याष्टाक्षरेण तु ।
आज्येन मधुनालिप्य सिद्धार्थान्मूर्ध्नि विन्यसेत् ।।
दूर्वाक्षतयुतं पश्चाच्चूर्णैरुद्वर्तयेद्विभुम् ।
द्रुपदादिति मन्त्रेण भक्तानां मूर्ध्नि तत् क्षिपेत् ।।
तच्चूर्णमुद्वहेत् भक्तः सोऽपि विष्णुपदं व्रजेत् ।
सविधानं समभ्यर्च्य होमकर्म समारभेत् ।।
हुत्वा पक्वं हुनेदाज्यं देवाग्रेऽग्निं निधाय च ।
कनिक्रदादिषड्भिस्तु पुनः स्वस्त्यादिपञ्चभिः ।।
वास्तोष्पतेतिमन्त्राभ्यां परमेष्ठ्यादिपञ्चभिः ।
अष्टार्णेनाष्टसंयुक्तं शतं तु समिदादिकम् ।।
यात्राहोमं समुद्दिष्टं यात्राकर्मणि सर्वदा ।
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता हरे ।।

तीर्थयात्रां कुरुष्वाद्य संक्रम्यानुग्रहाय नः ।
विज्ञाप्य सर्पिः संस्पृश्य मूलादादाय कौतुके ।।
नियोज्य सकळीकृत्य निधाय द्विजमूर्धनि ।
मंगळस्वस्तिवाक्यानि वाचयित्वा द्विजैः सह ।।
एकावृत्या बलिश्चान्तर्बहिरुत्पाट्य तान्ध्वजान् ।
वाहनं गरुडं ध्यात्वा शिबिकां वा रथं गजम् ।।
तमारोप्याप्रमादेन तेन तीर्थं नयेच्छनैः ।
समस्तवाद्यैर्वर्णैश्च वाहनैर्गणिकाजनैः ।।
वेदैस्तोत्रैश्च गीतैश्च नृत्तास्फोटैश्च संकुलम् ।
पूर्वे वा चोत्तरे[१०१] यत्र नदी प्राक्स्रोतसी भवेत् ।।
वाहनादवतार्येशं तीर्थतीरे परिश्रिते ।
पीठे विन्यस्य दत्वार्घ्यं तोये मज्जेत् त्रिरोमिति ।।
अब्लिङ्गैः पावमानीभिः पञ्चोपनिषदैरपि ।
प्रोक्षयेन्नामभिर्देवं कुशपाणिर्गदाग्रजम् ।।
पूर्वोक्तचूर्णपिष्टेन भस्मपूर्वं प्रलेपयेत् ।
पञ्चोपनिषदैर्हुत्वा शतं तद्धविषा तथा ।।
अघमर्षणसूक्तेन कृत्वा तोयेऽघमर्षणम् ।
सप्तभिर्विरजोमन्त्रैर्दुर्गाभिर्पञ्चभिर्वसुम् ।।
हस्ते निधाय शिष्यस्य पात्राण्याप्लावयेज्जलैः ।

[101] PS चोत्तरा

ऋग्भिः पुरुषसूक्तस्य तथा नारायणस्य च ।।

देवसूक्तस्य ऋग्भिस्तु गंगामन्त्रेण केशवम् ।

ओं श्री गंगे त्रिपथगे पुण्ये पवित्रे परमे शुभे ।।

अनेकजन्मकृत्पापान्मां व्यपोहय जाह्नवि ।

श्रीं ओं नमः उत्तीर्य स्थापयेत्पीठे परिधाप्य च वाससा ।।

निवेद्य पायसं चाग्नौ हुत्वा दिक्षु बलिं हरेत् ।

परिभुक्तानि यान्यत्र तोरणादीनि कर्मणि ।।

धनधान्यादिकं मुक्त्वा तानि तोये विनिक्षिपेत् ।

तीर्थेऽस्मिन् वैष्णवे पुण्ये स्नातोऽसि पुरुषोत्तम ।।

पुनस्त्वमनुगृह्णीष्व स्वस्थानोपाश्रयेण नः ।

इति संप्रार्थ्य यज्ञेशं स्तोत्रै स्तुत्वा नयेत् गृहम् ।।

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।

नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ।।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।

यज्ञेशाच्युतगोविन्द माधवानन्त केशव ।

कृष्ण विष्णो हृषीकेश नारायण नमोऽस्तु ते[१०२] ।।

स्तुत्वा प्रणम्य देवेशमादायास्थाप्य पूर्ववत् ।

सालं प्रदक्षिणीकृत्य प्रासादं शनकैर्नयेत् ।।

[102] PL वासुदेव नमो नमः

यात्राहन्येव संप्राप्य मूले संक्रम्य सुन्दरम् ।

हेमरत्नाष्टगन्धादि्भः पूरयेन्मध्यमं घटम् ।।

सुवर्णं रजतं रत्नं गन्धं पुष्पं कुशोदकम् ।

फलोदकं यवं दिक्षु विदिक्षु परिपूरयेत् ।।

पुनः षोडशशुद्धादि्भरष्टौ वा पूरयेत्घटान् ।

पीठमन्त्रैः स्त्रिभिर्मूलैर्मूत्यङ्गपरिवारकैः ।।

स्वहेतिभिर्दिशापालैस्तदस्त्रैर्जुहुयाद् घृतम् ।

अष्टाक्षरेण होतव्यं समिदादिचतुष्टयम् ।।

चतुर्गृहीतेन हुनेत्तावदि्द्वग्राहमादरात् ।

स्त्रुचि तद्वत् गृहीत्वाथ तिष्ठन्नेतामथाहुतिम् ।।

ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य च ।

व्याहृतीभिश्च तारेण पूर्णां हुत्वावशेषितम् ।।

संपाताज्येन संयुक्तं कलशे सेचयेत्पृथक् ।

द्वाभ्यां द्वाभ्यामथग्भ्यान्तु समस्ताभिः परस्य नु ।।

सूक्तस्य कलशैः स्नाप्य पूजयेत् परमं पदंम् ।

ब्राह्मणान् भोजयेद् भक्त्या भूयश्चान्नाद्यमुच्चकैः ।।

ताम्बूलमर्घ्यदानं च दत्वा स्तोत्रेण तोषयेत् ।

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।।

नमस्तेऽस्तु हृषीकेश नमः पुरुषपूर्वज ।

देवानां दानवानां च सामान्यमधिदैवतम् ।।

सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव[१०३] ।
एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ।।
अध्यक्षश्चानुमन्ता च गुणमायासमाहृतः ।
संसारसागरं घोरमनन्तं क्लेशभाजनम् ।।
त्वामेव शरणं प्राप्य निस्तरन्ति मनस्विनः ।
न ते रूपं न चाकारो नायुधानि न चास्पदम् ।।
तथा हि पुरुषाकारो भक्तानां त्वं प्रकाशसे ।
नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ।।
नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि कस्यचित् ।
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।।
योगानां परमां सिद्धिं परमं ते परं विदुः ।
अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयावहे ।।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ।
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।।
शरीरे च गते चापि वर्धते मे महत्भयम् ।
त्वत्पादकमलादन्यं न मे जन्मान्तरेष्वपि ।।
निमित्तं कुशलस्यास्मि येन गच्छामि सद्गतिम् ।
विज्ञानं यदिदं प्राप्तं यदिदं स्थानमार्जितम् ।।
जन्मान्तरेऽपि मे देव माभूदस्य परिक्षयः ।

[103] PS व्रज

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।।
इति नाशं न विन्देत तावतास्मि कृती सदा ।
न कामकलुषं चित्तं मम ते पादयोः स्थितम् ।।
कामये वैष्णवं तत्वं सर्वजन्मसु केवलम् ।
इत्येवमनया स्तुत्या स्तुत्वा देवं दिने दिने ।।
किं करोमीति चात्मानं देवायैव निवेदयेत् ।

इति नारायणात्मके तृतीयः पटलः

नारायणात्मके वैष्णवे
चतुर्थः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे ।
जीर्णोद्धारविधिं वक्ष्ये स्थापितस्याथ शार्ङ्गिणः ।।
विष्वक्सेनमथादित्यान्देवाग्रे च महाबलम् ।
गरुडं चापि तद्बाह्ये रक्षार्थं स्थापयेत्पुरा ।।
तारवौङ्कारयोर्मध्ये विष्वक्सेनपदं न्यसेत् ।
प्रणवानन्तरं बीजं तदन्ते नाम तस्य वा ।।
बीजान्ते वा च नामान्ते योजयेच्च नमः पदम् ।
विं वां हृदयमुद्दिष्टं ष्वं वीमित्येव तच्छिरः ।।
क्सें वूमिति शिखामन्त्रं विष्वं वै कवचं स्मृतम् ।
अस्त्रं वै क्सेनव इति विष्वक्सेन वौं दृग्द्वयम् ।।
विष्वक्सेनं विवृताक्षं शंखचक्रगदाधरम् ।
तर्जन्तं वामतर्जन्या नासाग्रासन्नया जगत् ।।
तोयादानीय मूलेन नामार्णैः पूरितैर्घटैः ।
गन्धपुष्पफलक्वाथपञ्चगव्यैः प्रपूरितैः ।।
अभिषिच्य तमादाय मण्डपे शयने न्यसेत् ।
संहृत्योत्पाद्य विन्यस्य तत्वान्यंगानि चार्चयेत् ।।
दिक्विदिक्षु पुरोऽङ्गानि वैष्णवास्त्राणि तद्बहिः ।

दिक्पालांश्च तदस्त्राणि गन्धाद्यैः परिपूज्य तम् ।।
क्षेत्रज्ञाख्येन मूलेन पञ्चोपनिषदैः शतम् ।
पृथगष्टाधिकं चाज्यं मूलेन समिदादिकम् ।।
एकस्मिन्नेव कुण्डे तु हुत्वाचार्यः समापयेत् ।
पच्छिलां स्थाप्य तन्मध्ये सौवर्णं विन्यस्येत् कजम् ।।
प्रनालमुत्तरे कृत्वा स्थाप्य पीठं समर्च्य च ।
आदाय स्थाप्य मूलेन वज्रलेपेन बन्धयेत् ।।
विष्णुमभ्यर्च्य तच्छिष्टमादायास्मै निवेदयेत् ।
यावदत्र जगन्नाथो बिंबमाश्रित्य तिष्ठति ।।
तावदत्रैव रक्षार्थं त्वं तिष्ठस्व प्रतर्दन ।
पञ्चषड्सप्तदण्डन्तु मुक्त्वा गर्भगृहाद् गुरुः ।।
कारयेदश्मभिः पीठमष्टदिक्ष्वपराणि च ।
गोमूत्रेण च गव्येन पीठानि क्षाळयेज्जलैः ।।
गन्धरत्नांबुभिः पश्चान्नवकुंभान् प्रपूरयेत् ।
भूतनाथाय विद्महे महाबलाय धीमहे तन्नः शक्तिः प्रचेदयात् ।।
अनया जुहुयात् पक्वं नामभिश्च शतं शतम् ।
अष्टाधिकं तदर्धं वा तदर्धं वा हुनेत् घृतम् ।।
पूर्णाहुतिश्च होतव्या नामान्यत्र[१०४] बलस्य हि ।
सर्वद्रव्याणि तेनैव समिदाज्यहवींषि च ।।

[104] PL नाम्ना चात्रा

लाजांश्च सर्षपांश्चैव पुनः सक्तून्यवांस्तिलान् ।
दधि क्षीरं तथा क्षौद्रं पुष्पाणि च फलानि च ।।
होमं समाप्य संपातं कलशेषु समर्पयेत् ।
पूर्वोदितैः पञ्चमन्त्रैर्दिक्षूर्ध्वं विकिरेद्बलिम् ।।
अन्तः प्रविश्य देवेशं सम्यक् संपूज्य गोपतिम् ।
विज्ञाप्यादाय तस्याज्ञां स्थापयित्वा बलादिकान् ।।
एकैकेन स्वमन्त्रेणार्च्यैकैकमभिषेचयेत्
गन्धाद्यैस्सम्यगभ्यर्च्य चरुन्तेभ्यो निवेदयेत्
प्रणवं पूज्यगोविन्दन्द्वास्थन्दिग्भ्यो बलिं हरेत्[१०५]
पुनस्तेषां बलिं दत्वा यजमानः सहायवान् ।
प्रणमेत् भूतनाथाय पुनर्विज्ञापयेदिदम् ।।
यावदत्रजगन्नाथो बिंबमाश्रित्य तिष्ठति ।
तावदत्रैवरक्षार्थं यूयं तिष्ठत सर्वदा ।।
दक्षिणान्नाद्यभूयिष्ठं तत्र कर्तव्यमुत्सवम् ।
तारान्ते पक्षिराजाय हुतान्तोऽष्टाक्षरो मनुः ।।
संबुद्धिरूप एव स्यादावाहनविसर्गयोः ।
तस्याष्टवर्णैरङ्गानि काश्यपो भगवानृषिः ।।
छन्दो दैव्यादिगायत्री देवता गरुडः स्वयम् ।
आजानुनाभिकर्णाग्रं सितपीतारुणासितम् ।।

[105] विज्ञाप्यादाय तस्याज्ञां............ पूज्यगोविन्दन्द्वास्थन्दिभ्यो बलिं हरेत्] Missing in PS

श्यामनासाग्रमारक्तपक्ष्मलोचनमूर्धजम् ।
अनन्ताद्यष्टनागेन्द्रभूषितं सिद्धिदायिनम् ।।
एवमक्षरलक्षन्तु ध्यात्वा मन्त्रं जपेत् पुनः ।
क्षीरवृक्षसमिद्गव्यतिलराजीपयोघृतम् ।।
दूर्वाभिर्गव्यसिक्ताभिः सहस्रं जुहुयात् पृथक् ।
पूजयेद्वैष्णवे पीठे स्वाङ्गमूर्त्यष्टलोकपैः ।।
सत्यः सुपर्णो गरुडस्ताक्ष्योऽथ विहगेश्वरः ।
वैनतेयश्च यज्ञात्मा गरुत्मानष्टमः स्मृतः ।।
कृत्वा लोहमयं बिंबं शुद्धिं कृत्वास्य भूयसीम् ।
मण्डपे स्थाप्य संहृत्य पुनरुत्पाद्य पञ्चभिः ।।
परमेष्ठ्यादिभिः प्रातः प्रासादं परिशोद्ध्य च ।
निक्षिप्य गारुडं रत्नं स्थापयेद्विनतासुतम् ।।
मालामन्त्रं समुच्चार्य कुंभेशेनाभिषेचयेत् ।
एवं कृत्वा ध्वजाग्रे तं स्थापयेद्वा विभोः पुरः ।।
ओं नमोष्टकुलनागभूषणाय नागशोणितलिप्ताङ्गाय
समस्तपाताळवासिजनविक्षोभणकराय
महाशैलसञ्चालनायारुणकनीयसे पुरुषोत्तमवाहनाय
विनतानन्दकराय त्रैलोक्यविक्षोभणाय देवदानवगन्धर्वोरगमन्थनाय
मातुरर्थे नागमोहनायामृतमन्थनाय हन हन विघ्नं नाशय नाशय
ओं पक्षिस्वाहा ।

स्थापिते ध्वजदण्डे तु पुनरुत्सवकर्मणि ।

पताकायां समुल्लिख्य यन्त्रेणारोप्यता ध्वजे ।।

घण्डाचामरसंयुक्तमवलंब्यार्चयेत् खगम् ।

ध्वजवाहनभूतोऽसौ विष्णोर्विष्णुपराक्रमः ।।

सुपर्णः प्रीयतां मह्यं विनताकुलनन्दनः ।

द्वास्थादिभ्यो बलिं दत्वा निवेद्यास्मै बलिं हरेत् ।।

अष्टदिक्ष्वष्टमूर्तीनामिदं विज्ञापयेच्छनैः ।

यावदत्रजगन्नाथो बिंबमाश्रित्य तिष्ठति ।।

तावदत्रैव रक्षार्थं यूयं तिष्ठत सर्वदा ।

पूर्वद्वारे जयन्तेवाप्यदित्यामल्पमन्दिरम् ।।

पश्चिमद्वारमन्यत्र शोषे मुख्ये पुरोमुखः ।

पीठं काष्ठमयं स्थाप्य शुद्धिं कृत्वा विभूषयेत् ।।

पूर्वस्थाने तु राक्षेघ्नं वास्तु होमञ्च तद्बलिम् ।

दूर्वादिकैस्त्रिमध्वक्तैर्जुहुयाद्वैष्णवेऽनले ।।

पञ्चोपनिषदैः शान्तिं सहस्रमयुतन्तु वा ।

तत्वैः शतं शतं हुत्वा घृतं संहारमार्गतः ।।

प्रकृत्यादिपृथिव्यन्तां साधिभूताधिदैवताम् ।

अध्यात्मसंहृतं ध्यात्वा पृथिव्यादिविलोमतः ।।

प्रकृतिं प्रक्रियाभेदैर्जीवेन समतां गताम् ।

ध्यायन् पूर्णाहुतिं हुत्वा जीवेशं कलशे न्यसेत् ।।

यात्राहोमन्तु होतव्यं पूर्वमेव मयोदितम् ।
संपूर्य हेमरत्नाभिः कलशं हेमादिनिर्मितम् ।।
देवाग्रे स्थाप्य संपूज्य वस्त्राभ्यां परिवेष्टयेत् ।
निर्गत्य पृच्छेदाचार्यः कर्तॄन् कालावधिं पुनः ।।
कियन्तं कालमत्रेशः प्रवासवसतिं वसेत् ।
मासादूर्ध्वं द्वादशाब्दादर्वाक्कालावधिः स्मृतः ।।
नार्वाङ्नोर्ध्वं क्लेशवासं वासुदेवोऽनुमन्यते ।
इति पृष्टास्तु ते ब्रूयुः कालावधिमसंशयम् ।।
कालं कर्तृभिरुद्दिष्टं तस्मै विश्रावयेच्छनैः ।
भक्तान् विप्रान् समाहूय तन्त्रज्ञान् वेदपारगान् ।।
तेषां प्रदक्षिणं कृत्वा प्रणमेद्देववत् क्षितौ ।
नमो ब्रह्मण्यमन्त्रेण यजमानः सहायवान् ।।
देवं च मनसा स्मृत्वा बद्धाञ्जलिरिदं वदेत् ।
पूजाबिंबमिदंविष्णोस्थापितं पूर्वसूरिभिः ।।
अनेन दूषणेनाद्य दूषितं चेह वर्तते ।
दुष्टबिंबस्य चोद्धारं कर्तव्यमिति शासनम् ।।
आगमस्य वयं कर्तुं व्यवसायमुपास्महे ।
तत्रेदं यदि कर्तव्यमागमार्थतया भवेत् ।।
भवन्तो नोऽनुजानन्तु भवेमाज्ञाकरा वयम् ।
क्रियतामिति निःशङ्कं ततो ब्रूयुर्द्विजोत्तमाः ।।

ततः शान्तिं वदेयुस्ते नत्वा[१०६] देवमधोक्षजम् ।

शान्तिरस्तु शिवं चास्तु पुष्टिरस्तु सुमङ्गलम्[१०७] ।।

स्वस्ति चास्तु समृद्ध्यस्तु सर्वेषां सन्तु संपदः ।

गोब्राह्मणेभ्यो क्षत्रेभ्यो विट्च्छूद्रेभ्यस्तथैव च ।।

लोकेभ्यः सर्वभूतेभ्यो राज्ञे जनपदाय च ।

ग्रामाय यजमानाय गुरवेऽस्मै गृहाय च ।।

बिंबोद्धारविधेरस्तु साकल्यमिह सर्वदा ।

गुरवे चास्त्वथर्त्विग्भ्यो ब्राह्मणेभ्यो महीं च गाम् ।।

सुवर्णं शयनं वस्त्रं यजमानो ददेच्छुचिः ।

ततो गर्भगृहं गत्वा मूर्तिपैः सहितो गुरुः ।।

पुण्याहं वाचयित्वाथ शान्त्यद्भिरभिषेचयेत् ।

श्रृण्वन्तु देवताः सर्वाः प्रासादमिममाश्रिताः ।।

यदुच्यमानमस्माभिरनुगृह्णन्तु तेन नः ।

पूर्वैः पूर्वं कृतमिदं देवालयमसारवत् ।।

प्राप्तं कालवशात् भूयो वयं तत्कर्तुमुद्यताः ।

कालेनैतावता भूयः प्रासादेऽस्मिन् पुनर्नवे ।।

प्रापयामो वयं सत्यमित्येवं गृहनाशने ।

भगवन् वास्त्वभिनवं बिंबं च तव शोभनम् ।।

कारयिष्यन्ति ते भक्तास्त्वमनुज्ञातुमर्हसि ।

---

106 PS न दत्वा

107 PS पुष्टिरस्त्वस्तुमङ्गलम्

क्लेशवासस्त्वया देव रोचनीयोऽल्पके गृहे ।।
यावन्नवं गृहं कृत्वा पुनः संस्थापयामहे ।
इति विज्ञाप्य तत्वानि सम्यगुच्चार्य साधकः ।।
लयक्रमेण तत्वानि स्नापयेत् भावयेत् परम् ।
प्रणवं प्लुतमुच्चार्य तेजसा व्याप्य मन्दिरम् ।।
संहृत्य बिंबे संयोज्य तस्मादुद्धृत्य केशवम्[108] ।
पञ्चोपनिषदैर्मन्त्रैर्विलोमाद् ब्रह्मविद्यया ।।
कलशे सकलीकृत्य पूजयित्वाभिवेष्टितम् ।
निर्गत्यादाय संस्थाप्य मूर्ध्नि कृत्वा प्रदक्षिणम् ।।
त्रिसूक्तैः शयने स्थाप्य कुर्यात्तत्राधिवासनम् ।
रत्नन्यासादिकं मुक्त्वा स्थाप्य बिंबं सुनिश्चलम् ।।
भगवन्नल्पगेहेऽस्मिन् वासः क्लेशोऽपि ते हरे ।
वस्तव्यो भगवंस्तावद्यावद् गेहं समाप्यते ।।
कारकस्य परामृद्धिमनुजानन्महोदयाम् ।
भक्तानामनुकंपार्थमिह त्वं स्थातुमर्हसि ।।
इत्युच्चार्याभिषेकेण जीवं तस्मिन्नियोजयेत् ।
सकळीकृत्य संपूज्य तस्मिन्नित्यं समर्चयेत् ।।
विसृज्य पीठिकाबन्धं सौवर्णैर्लांगलैर्नवैः ।
अष्टाक्षरेण निर्माल्यं विष्वक्सेनोऽहमुद्धरे ।।

---

108 PS केवलम्

इति कृत्वा स्थिरां बुद्धिं भूर्भुवस्वरोमिति ।
गर्तादुथापयेद् बिंबं बद्ध्वा गोवालरज्जुभिः ।।
पीठिकां ब्रह्मसंज्ञां च तद्वदुद्धृत्य दक्षिणे ।
सैकते स्थण्डिले स्थाप्य विकीर्य तिलतण्डुलान् ।।
तिलपुष्पाक्षतांभोभिः पूरयित्वाऽत्र वर्धनीम् ।
अच्छिन्नधारया सिञ्चेदपसव्यं त्रिधांबुभिः ।।
उद्धृत्य जुहुयात्तोये व्याहृतीभिरथाश्मजम् ।
पीठाद्यमथवारण्ये गोपयेद्वा महावटे ।।
अस्त्राग्नौ प्रदहेद्वार्क्ष[१०९] पुनः स्नानं समाचरेत् ।
पूर्ववत् भवनं बिंबं पीठं चैवोभयात्मकम् ।।
योनिश्रेष्ठं समुद्पाद्य समं वा नापरं नयेत् ।
प्रतिष्ठां पूर्ववत्कुर्यादधिवासनवर्त्मना ।।
पूर्ववत् कलशे योज्य केवलं शयने न्यसेत् ।
प्रतिमामग्रतो नीत्वा पृष्ठे देवघटं नयेत् ।।
जीवावाहनकाले तु तन्मन्त्रेणाभिषेचयेत् ।
अथवा पद्ममध्ये तु कुंभैर्द्वादशमूर्तिजैः ।।
प्रतिष्ठान्ते तमादाय सेचयेत्तत्वमुच्चरन् ।
पञ्चोपनिषदैर्मन्त्रैः सूक्तेन पुरुषात्मना ।।
विष्णोः क्रमोऽसि च त्रेधा मुखं चक्षुश्च नासिकाम् ।

[109] PS प्रदहेद्वार्थं

स्पृशेदेष विशेषोऽस्ति जीर्णोद्धारे प्रकीर्तितः ।।

प्रायश्चितन्तु कर्तव्यमन्यत् सर्वन्तु पूर्ववत् ।

पूर्ववच्छयने स्थाप्य दुष्टं त्यक्त्वा पुनर्नवम् ।।

सहाधिवास्य संस्थाप्य स्नापयेन्मन्दिरे नवे ।

पूर्ववद्बाल्पबिंबे तु संयोज्योत्पाद्य मन्दिरम् ।।

मासमेकमतिक्रम्य शुद्धिं कृत्वास्य भूयसीम् ।

अल्पबिंबगतं देवं मूलबिंबे नियोजयेत् ।।

प्रायश्चित्तानि सर्वाणि महास्नापनसंयुतम् ।

उत्सवं तीर्थयात्रां च एष उद्धरणक्रमः ।।

एवं वाभिनवे हृत्वा पूर्ववत्द्वेश्मदेवताम् ।

दर्भांबरैश्च संछाद्य योजयित्वात्र शिल्पिनम् ।।

कारयित्वा गृहं तेन पुनरादाय पूर्ववत् ।

तन्तुवेष्टनमारभ्य वास्तोः पुण्याहपश्चिमम् ।।

क्षाळनाद्यभिषेकान्तं कृत्वोत्पाद्यार्चयेद्विभुम् ।

उत्सवान्तं पुनः कुर्यात्[११०] प्रायश्चित्तादि पूर्ववत् ।।

पीठे भग्ने तु संहृत्य पुर्ववद्वेश्मदेवताः ।

पीठाव्यक्ते ततोव्यक्तं योजयेत्पुरुषे गुरुः ।।

तस्मिन् बिंबेऽथवा स्थाप्य कलशे वा त्रिरात्रकम् ।

अल्पबिंबेऽथवा जीवं पूर्ववत् स्थाप्य पीठिकाम् ।।

---

[110] PS कार्यं

शुद्धिं कृत्वा समुद्पाद्य कलशाद्वा नियोज्य तम् ।

अल्पबिंबात्समानीय हृत्स्थं वा पूर्वसंहृतम् ।।

संयोज्य सकळीकृत्य प्रायश्चित्तादि कारयेत् ।

बाहुच्छेदे परित्यागः पदच्छेदे तथैव च ।।

स्फुटिते वाथ भग्ने वा बिंबे तु शकलीकृते ।

यस्मिन्नवयवे भग्ने वैरूप्यं तत्र तां त्यजेत् ।।

यद्येका करशाखा तु भग्ना द्वे वा त्रिरेव वा ।

न त्याज्यं पादयोस्तद्वदत ऊर्ध्वं परित्यजेत् ।।

सौवर्णी साङ्गुली कार्या या भग्ना द्वे त्रिरेव वा ।

लोहादौ चेच्छिलाबिंबे ताम्रेण रजतेन वा ।।

हेतिमण्डनविच्छेदे सौवर्णं तत्र कल्पयेत् ।

बिंबे भग्ने विभोः पीठं पच्छिलां च परित्यजेत् ।।

तयोर्नाशे तु तत्रैव स्थाप्य यन्त्रेण केशवम् ।

द्वयं भूयः प्रतिष्ठाप्य वज्रलेपेन बन्धयेत् ।।

भग्नबिंबे तु देवस्य प्रासादो यत्र लक्ष्यते ।

तत्रापि कारयेत् बिंबं सौवर्णमपरं पुनः

लोहजं रत्नजं वाग्रे स्थापितं विधिनार्चयेत् ।

तदप्यमन्त्रकं पूज्यं रक्षयेन्न च संत्यजेत् ।।

पौराणिकेषु बिंबेषु देवादिस्थापितेष्वपि ।

न्यायोऽयमेव विज्ञेयः स्वयं वा यत्र ज्ञायते[१११] ।।

संशये महतीं पूजां कृत्वा देवाग्रतः स्वपेत् ।

आचक्ष्व देव देवेश प्रपन्नोऽस्मि तवान्तिकम् ।।

स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि नः ।

इति विज्ञाप्य सुप्तानां स्वप्नोऽत्रानुगुणो भवेत् ।।

एवं निश्चित्य कर्तव्यं तत्र कुर्याद्विचक्षणः ।

चोराद्यैराहृतं बिंबं यदि यत्नेन लभ्यते ।।

तत्रैव स्थापयेत्तच्च यदि भग्ने तथापरम् ।

प्रसूतिमरणोदक्य रुधिराद्यैर्दूषिते महीतले महीं विद्वान् संशोधयेत् खननादिभिः

श्वचोरव्रात्यपाषण्डिदेवलादि प्रवेशने

चण्डाळसूतिकोदक्य सुराविजनसंगमे[११२] ।।

शोधयेद् भगवद्बिंबं क्षाळनाद्यैश्च सप्तभिः ।

प्रायश्चित्तन्तु कर्तव्यं महास्नापनसंयुतम् ।।

छत्राकमधुवल्मीककृमिकीटादिसंभवे ।

स्वेदोष्णशीतलालापरोदहासादिचात्भुते ।।

शान्ति होमं च कर्तव्यं महास्नापनसंयुतम् ।

द्रव्यैरप्यथवा मन्त्रैः प्रदिषिद्धैः समर्चिते ।।

मरीचलवणोन्मत्तहिङ्गुपाषाणसर्षपैः ।

---

[111] PL जायते

[112] प्रसूतिमरणोदक्य रुधिराद्यैर्दूषिते...... सूतिकोदक्य सुराविजनसंगमे] Missing in PS

प्रयोगज्ञैः सुसंलिप्तेर्विष्णोर्बिंबे समाहिषैः ।।

त्रिरात्रमवगाहं स्याच्छुद्धिर्गव्यैश्च पञ्चभिः ।

खननं हरणं दाहः पूरणं गोनिवासनम् ।।

विप्रोच्छिष्टं च गव्यञ्च सप्तैता स्थानशुद्धयः ।

खादिरस्फ्येन चास्त्रेण खात्वा[११३] हस्तादिमानतः ।।

सदोषानखिलान् पांसून्[११४] पात्रैर्हृत्वा बहिः क्षिपेत् ।

कुशदर्भादिभिर्दग्ध्वा तद्भस्मादि पुनर्हरेत् ।।

सुमृद्भिः खातमापूर्य हस्तिपादैस्तु याज्ञिकैः ।

गोमूत्रसिक्तमाकोट्य विप्रपादोदकैस्तथा ।।

गां निवास्याशायेद्विप्रान् पायसं द्वादशावरान् ।

तदुच्छिष्टे हृते सिञ्चेत् गव्यैश्च विकिरैः किरेत् ।।

लिखित्वा पङ्कजं तत्र प्रयजेत्तं सुदर्शनम् ।

सम्मार्जालिप्य संवेष्ट्य शुद्धिं कृत्वाऽस्य वेश्मनः ।।

राक्षोघ्नं वास्तुहोमञ्च तद्बलिं बीजवापनम् ।

ध्वजसंस्थापनं कृत्वा बिंबन्तु परिशोधयेत् ।।

क्षाळनाद्यैर्विशोध्यादौ प्रायश्चित्तादि कारयेत् ।

क्षाळनप्लावनस्नानमार्जनानि यथाक्रमम् ।।

धारावगाहनं पश्चादभिषेकोऽत्र सप्तमः ।

क्षाळनं दर्भमृत्वग्भिस्तूष्णीं तोयैश्च शोधनम् ।।

---

113 PL कृत्वा

114 PS वास्तून्

गन्धपुष्पाक्षतोपेतैरमन्त्रैः प्लावनं जलैः ।
सकूर्चैर्गन्धपुष्पाढ्यैर्मन्त्रवत् स्नानमंबुभिः ।।
पात्रे यथोक्तमापूर्य तोयं मन्त्रैः प्रपूज्य च ।
कूर्चाग्रैः प्रोक्षयेत् बिंबं मन्त्रैस्तदिह मार्जनम् ।।
संस्थाप्य धान्यकूर्चस्थमैशान्यां लोहसंभवम् ।
वारुणं पात्रमापूर्य सकूर्चं सलिलैः शुभैः ।।
मत्स्यौ कूर्मौ च सौवर्णौ राजतौ चात्र निक्षिपेत् ।
समृणाळां सपुष्पां च पद्मिनीं क्षाळितां तथा ।।
पूजयेद्वरुणं तत्र तीर्थमावाह्य वैष्णवम् ।
पालाशादित्रिपादस्थं धारापात्रं तु लोहजम् ।।
सहेमच्छिद्रमापूर्य सकूर्चं प्रतिमोपरि ।
धाराछिद्रा तु कर्तव्या याममात्रं दिने दिने ।।
समन्त्रं वारुणात्पात्रात्तोयं हृत्वात्र पूरयेत् ।
पञ्चोपनिषदो जप्या वाग्यतैर्दर्भपाणिभिः ।।
स्पृशद्भिः पात्रमव्यग्रैर्ध्यायद्भिर्विष्णुमव्ययम् ।
पौरुषं पावमानं च सूक्तमन्यच्च वैष्णवम् ।।
धारान्ते पूजयेद्देवमुद्वास्य वरुणं ततः ।
न चाल्यं वारुणं पात्रं त्रिरात्रं यत्र जप्यते ।।
हृत्वांभः पुनरापूर्य पूर्ववत्सर्वमाचरेत् ।
संच्छाद्यार्चां सुवासोभिर्दर्भैरपि समन्त्रकम् ।।

संस्थाप्य याज्ञिकैः काष्ठैः कृत्वा पात्रं प्रमाणतः ।
गव्यैर्व्यस्तैः समस्तैश्च गन्धोदान्तैर्यथाक्रमम् ।।
एवं कृत्वावगाहन्तु पुनः संक्षाळ्य पूजयेत् ।
पञ्चकुंभान् समास्थाप्य सुकूर्चान् सूत्रवेष्टितान् ।।
गन्धपुष्पाक्षतांभोभिः पूर्णानुपनिषत्क्रमात्।
सपल्लवमुखान्यस्य चक्रिकाश्च सतण्डुलाः ।।
संपूज्य वाससावेष्ट्य तैरेवमभिमन्त्र्य च ।
पञ्चभिः स्नापयेद्देवमभिषेकविधिः स्मृतः ।।
उत्पातेषूपजातेषु न कार्यं पूजनं हरेः ।
अस्पृश्याः प्रतिमापीठप्रासादाः साङ्गदेवताः ।।
अकृतायान्तु निष्कृत्यां स्पृष्टाः कुप्यन्ति देवताः ।
तत्स्थाः प्रेता भयं कुर्युर्व्याधिचोरादिभिर्नृणाम् ।।
पूजने चिरलुप्तेतु विनश्येद्देवसन्निधिः ।
विनश्यन्ति तदा लोका राजराष्ट्रादिसंयुताः ।।
वैतानाग्निनिभं[११५] बिंबं विष्णोः सम्यक् प्रतिष्ठितम् ।
तस्मात् सर्वप्रयत्नेन निष्कृतिं कारयेद्द्रुतम् ।।
महद्बहुषु चाग्रेषु निमित्तेषु विशेषवित् ।
निमित्तेष्वल्पमल्पेषु सद्यो वा यत्र निष्कृतिः ।।
चत्वारो मूर्तिपा हीने मध्येऽष्टौ द्वादशोत्तमे ।

[115] PL वेदिकाग्निमुखं

षडंगविदुषः सर्वे होतारस्तन्त्रपारगाः ।।
प्रायश्चित्तमथैकं वा देवाग्रे वास्य दक्षिणे ।
कुण्डानि कारयेन्मध्ये क्रमाद्वादशराशिषु ।।
चतुरश्राणि सर्वाणि दिक्ष्वष्टासु क्रमेण वा ।
चतुर्द्दिक्ष्वथ वा तत्र चतुर्भेदयुतानि वा ।।
उत्पादयेत् गुर्वग्निं मध्यकुण्डे तु पूर्ववत् ।

इति नारायणात्मके चतुर्थः पटलः

नारायणात्मके वैष्णवे
पञ्चमः पटलः

नमस्कृत्वा प्रेमेयाय विष्णवे प्रभविष्णवे ।

उत्पातदोषशान्त्यर्थं प्रायश्चित्तं वदाम्यहम् ।।

द्वादशाक्षरबीजैर्वाप्यष्टार्णैः पूर्वभाषितैः ।

विहृत्याग्निं विनिक्षिप्य मध्यात्कुण्डेषु मूर्तिपाः ।।

कृत्वा चाग्निमुखं सर्वे पक्वं च जुहुयुः क्रमात् ।

त्रिसहस्त्रं घृतं हुत्वा पञ्चभिः सर्ववह्निषु ।।

ततः समिद्घृतंव्रीहितिललाजसहस्त्रकम् ।

अष्टाक्षरेण पालाशी शतं हि द्वादशोत्तरम् ।।

हुत्वा व्याहितिभिः सर्वे क्रमादष्टाधिकं शतम् ।

सावित्र्या जुहुयुः क्षीरं दध्याख्यं मधुसर्पिषी ।।

होमं समाप्य संपातकलशैः स्नापयेद्विभुम् ।

होमावसानं एतेभ्यो यजमानः स्वशक्तितः ।।

हिरण्यं दक्षिणां दद्यात्ततः स्वस्तिं च वाचयेत्।

षोडशद्वादशाष्टौ वा प्रत्येकं वैष्णवा द्विजाः ।।

वेदैस्त्रिभिश्चतुर्भिर्वा नादयेयुर्दिवानिशम् ।

अद्भुतेष्वीशकोणेऽग्निं संस्कृत्य जुहुयाच्चरुम् ।।

पञ्चभिर्द्वादशाष्टार्णगायत्रीजितपूरुषैः ।

चतुर्विंशतिशो हुत्वा शतशो वा पशोर्घृतम् ।।
अपामार्गसमिच्छिन्ना सहैन्द्री भद्रिकाञ्जलीः ।
दूर्वा सिद्धार्थकं व्रीहियवांस्तिलहविर्घृतम् ।।
तावत्संख्यन्तु तैर्मन्त्रैराज्याद्यन्तरितैर्हुनेत् ।
ततः स्विष्टकृतं हुत्वा संपातेनाभिषिच्य तम् ।।
तच्छिष्टादिभर्हदा सिञ्चेद्यत्र मध्यादिसंभवः ।
कुण्डं शोषे जयन्ते वा तस्मिन्नुत्पाद्य पावकम् ।।
कलशं दक्षिणे स्थाप्य हेमरत्नांबु पूरितम् ।
पीठन्यासक्रमेणैव वासुदेवं समर्चयेत् ।।
स्वगृह्योक्तेन मार्गेण कृत्वा चाग्निमुखं गुरुः ।
पीठाख्यमनुभिश्चाज्यं पक्वान्ते जुहुयात्पृथक् ।।
पञ्चविंशतिशो हुत्वा शतशो वा सहस्रशः ।
पञ्चविंशतितत्वानि पञ्चोपनिषदैस्तथा ।।
तत्वान्तरेऽपि जुहुयात्पृथक् पूर्णाहुतिं पराम् ।
समिदादिनवद्रव्यैश्चतुर्भिर्वा शतं शतम् ।।
अष्टाक्षरेण हुत्वाज्यं पूजामन्त्रैः सकृत्सकृत् ।
ततः स्विष्टकृतं हुत्वा समाप्योद्वास्य पावकान् ।।
कलशे वैष्णवं तत्वं नियोज्य परिपूज्य तम् ।
न्यस्त्वा तत्वानि तैरेव विभुं स्नाप्य[११६] पूनर्न्यसेत् ।।

[116] PL स्नाप्य तानि

यथाविधि समभ्यर्च्य भोजयेत् ब्राह्मणान् बहून् ।
यजमानोऽथ गां वस्त्रं हिरण्यं दापयेच्छुचिः ।।
होमत्रयं च सामान्यं[११७] निमित्तेष्वखिलेष्वपि ।
वैशेषिकमथो वक्ष्ये प्रायश्चित्तं यथातथम् ।।
श्वस्पृष्टां शोधयेदर्चां बहुशः क्षाळनादिभिः ।
अश्वत्थैः खादिरैः प्लक्षैः पलाशैः पाटलैर्वटैः ।।
सावित्र्या पञ्चभिश्चाग्नौ शतशोऽथ सहस्रशः ।
ऋग्भिः पुरुषसूक्तस्य पुनर्नारायणस्य च ।।
अतोदेवेति सूक्तस्य श्रीसूक्तस्य तथैव च ।
चतुर्विंशतिशो हुत्वा नासदंहोमुचस्तथा ।।
संसमित्भद्रपादेन तथारायीत्यनेन च ।
गायत्र्या पञ्चभिश्चात्र व्याहृतीभिर्घृतं हुनेत् ।।
ततः स्विष्टकृतं हुत्वा कलशेनाभिषेचयेत् ।
अनिमित्तेन निष्क्रान्तं पुनराशु प्रवेश्य च ।।
शान्तिहोमं तु कुर्वीत स्नपनं स्वस्तिवाचनम् ।
प्रसूते श्वसृगालाद्यैः शून्यं कृत्वा त्रिरात्रकम् ।।
पूर्वोक्तां कारयेच्छान्तिं शुद्धिं चापि पुरोदिताम् ।
दाहे[११८] पयस्वतीं धेनुं शान्तिनाम्ना समाह्वयेत् ।।
दूर्वादिकं निवेद्येष्ट्वा पद्मपत्रे पयो दुहेत् ।

[117] PL आसाद्य
[118] PL दोहे

अतप्य दधि निर्मध्य तत्संस्कृत्याज्यमाहरेत् ।।

अपरेद्युस्तथा दुग्ध्वा दधि चैवं प्रकल्पयेत् ।

त्रितीयेऽह्नि शकृन्मूत्रं क्षीरं चैव समाहरेत्[११९] ।।

पद्मपत्रेषु संपूज्य क्रमान्मूत्रादिपञ्चकम् ।

पञ्चमन्त्रैस्तु संयोज्य मथित्वा प्रणवेन तु ।।

संपूज्य पञ्चसाहस्रं पञ्चोपनिषदो जपेत् ।

तैरेव तेन संस्नाप्य तच्छिष्टैः प्रोक्षयेद् गृहम् ।।

गोनिवासादि कर्तव्यं प्रायश्चित्तं पुरोदितम् ।

चलं वा निश्चलं कुर्यादावाह्य कलशे गुरुः।।

अधिवास्य यथान्यायं कुर्याद्वाथ नवीक्रियाः

दुर्ज्जनस्पर्शनादौ तु शुद्धिं कृत्वास्य भूयसीम्

जलसंप्रोक्षणं कुर्यात् प्रायश्चित्तं पुरोदितम्[१२०]

चौराहतिस्तु दोषाणामग्रणीः परिकीर्त्यते ।

क्षाळनाद्यैर्विशोध्यार्चा जलसंप्रोक्षणेन च ।।

पुरुषसूक्तेन होतव्यं प्रत्यृचं हि शतं शतम् ।

क्षीरद्रुमसमिद्भिस्तु गायत्र्या च शतं घृतम् ।।

संपाताज्येन संस्नाप्य होमत्रयसमन्वितम् ।

स्नपनं चोत्सवं कुर्याद्यथा विभवविस्तरम् ।।

अलब्धेऽपहृते बिंबे तदा संशोध्य पीठिकाम् ।

---

119 दूर्वादिकं निवेद्येष्ट्वा............ क्षीरं चैव समाहरेत्] Missing in PL

120 चलं वा निश्चलं कुर्यादावाह्य.............. कुर्यात् प्रायश्चित्तं पुरोदितम्] Missing in PS

पच्छिलां तदभावे तु तदभावे तु मन्दिरम् ।।
बिंबस्थानात्समाहूय कलशे पूर्ववत् गुरुः ।
अल्पबिंबे समायोज्य सर्वमुत्पाद्य योजयेत् ।।
संक्रान्तस्य विनाशे तु कर्तव्यं मूलनाशवत् ।
घृतं पुरुषसूक्तेन होतव्यमिह पूर्ववत् ।।
पूजने चिरलुप्ते तु पूजिते[१२१] वा त्वदीक्षितैः ।
पञ्चगव्येन संस्नाप्य पञ्चोपनिषदैर्घृतम् ।।
हुत्वा पञ्चशतं पञ्चकलशैरभिषेचयेत् ।
गव्यगन्धांबुपुष्पाद्यैद्रव्यैः[१२२] पर्युषितैर्विभुम् ।।
अज्ञानादर्चयेद्यस्तु तदा संक्षाळ्य वारिणा ।
होतृभिः सकलैर्मन्त्रैः क्रमाच्छान्तिकपौष्टिकैः ।।
ततः पुण्याहमुद्दिष्टं पूजयेत्तदनन्तरम् ।
तप्त[१२३]कारुजनैः स्पृष्टे क्षुद्रमन्त्रैः समर्चिते ।।
महापातकसंयुक्तैः स्पृष्टे वा परिलोपिते[१२४] ।
वर्णजैश्चोरमार्गेण तेषां स्त्रीभिरथान्त्यजैः ।।
स्पृष्टे शुद्धिं क्रमात्कृत्वा जलसंप्रोक्षणान्वितम् ।
सहस्रं दशहोत्राज्यं तावत्सावित्र्या तिलान् ।।
पालाशीः समिधः पूर्वं हुत्वाष्टार्णेन चान्ततः ।

[121] PL पूजने
[122] PS गव्यैः
[123] PS सप्त o
[124] PL परिलेपिते

द्वादशाक्षरमन्त्रेण हुत्वाज्यं च समापयेत् ।।
स्पृष्टे तु सूतिकोदक्यं कुण्डगोळकदेवलैः ।
चतुर्होत्रा हुनेदाज्यमन्यत्सर्वन्तु पूर्ववत् ।।
अविज्ञातेषु दोषेषु विज्ञातेष्वथवा गुरुः ।
गव्यस्नानं तु पुण्याहं पञ्चमन्त्रैर्घृताहुतिम् ।।
महोपनिषदैर्ज्जापं ब्राह्मणानां च भोजनम् ।
बलिदानन्तु[१२५] कर्तव्यमात्माभ्युदयकांक्षिभिः ।।
संमार्ज्यालिप्य संप्रोक्ष्य शं वदन् सलिलैर्गृहम् ।
इमा आपश्च दध्नादिभिः[१२६] पञ्चगव्येन पञ्चभिः ।।
इमा आपश्शिवाः सन्तु दुष्कृतं प्रवहन्तु मे ।
पूता ब्रह्मपवित्रेण पूताः सूर्यस्य रश्मिभिः ।।
सर्वतश्चक्रमन्त्रेण विकिरेत् सर्षपाक्षतैः ।
मण्डपं शोधयेत्तद्वध्वजतोरणसंयुतम् ।।
संस्तीर्य शयनं पश्चात् पुण्याहं मूलवेश्मनि ।
कर्मार्चां स्नाप्य रत्नादिभिः श्रीसूक्तैर्ब्रह्मपञ्चभिः[१२७] ।।
प्रणवेनांबरं दत्वा सूत्रन्तु परमेष्ठिना ।
उत्तरीयन्तु विश्वेन निवृत्त्या मकुटादिकम् ।।
भूषणं प्रददेत् पुंसा गन्धं सर्वेण मालया ।
एवं कृत्वा तथा मूले पुण्याहमुभयत्र च ।।

[125] PS प्रदानं
[126] PL दध्नाभिः
[127] PL स्त्रीभिस्सूक्तैर्ब्रह्मपञ्चभिः

ओं भगवन् सर्वव्यापिन् सर्वभूताधिपतये सर्ववेदसारमय
सर्वदेवाधिपतये एह्येहि पुरुष महापुरुष अन्तादिमध्यभूतपरां
परतरव्यक्ताव्यक्तस्थूलसूक्ष्ममहायोगिन् नमः स्वाहा
अनेनावाह्य मूलात्तं सकळीकृत्य पूजयेत्
ओं नमः पुरुषोत्तमाय समस्तलोकाधिपतये[१२८] अर्घ्यमिदं निवेदयामि नमः
स्वाहाकारेण पाद्यमाचाममिमे गन्धानुलेपनम्
इमाः सुमनसः पुष्पं धूपं चैव बृहस्पते ।
शुभा[१२९] ज्योतिप्रदीपं च पुण्डरीकेण कौतुकम् ।।
इमे गन्धा अपां सारा ये दिव्या ये च पार्थिवाः ।
आमोदेन पुनन्त्वेमां पृथिवी सा पुनन्तु माम् ।।
इमाः सुमनसः पृथ्वीमन्तरिक्षं त्रिविष्टपम् ।
मोदयन्त्विह मामोदैः भूषयन्ति च याः खजाः[१३०] ।।
ओं वनस्पते पुष्पमसि पुण्यगन्ध पुण्यं मे गन्धं कुरु कुरु
देवमनुष्येषु तन्त्वाभिहरे दीर्घायुत्वाय वर्चसे ।
शुभाज्योतिरादित्यस्य मनसोग्ने प्रतिष्ठितं तद्ब्रह्मण्यात्मा तेन
ज्वलती भूर्भुवस्वरोम् ।
दशस्वस्तिभिरानीय अयं स इति शाययेत् ।
अष्टौ विप्रान् समाहूय वेदवेदांगपारगान्।।

---
[128] सर्ववेदसारमय सर्वदेवाधिपतये...... समस्तलोकाधिपतये] Missing in PS
[129] PL देवे
[130] PL खगाः

कर्मज्ञाननिपुणान् भक्तान् साक्षित्वे परिकल्पयेत्।
उपस्थाय विहृत्याग्निं पक्वं च जुहुयुश्च ते ।।
समिधः क्षीरिजा[१३१] ब्राह्मीरथ पालाश्य एव वा ।
घृताप्लुताः सहस्त्रं वा शतं वाष्टाधिकं पृथक्।।
ओं भूस्वाहेति[१३२] हुत्वा ते प्रोक्षयेयुः कुशांबुभिः ।
सुहुताः समिधः पूर्वमस्माभिः शास्त्रदृष्टिभिः ।।
शं भवन्तो वदन्त्वत्र[१३३] प्रीयतां च जनार्दनः ।
ततः ओं स्वस्ति भवन्तो ब्रुवन्त्विति गुरुर्वदेत् ।।
ओं स्वस्तिशान्तिरित्यष्टौ सदस्या ब्रूयुरादरात् ।
ओं स्वस्तिशान्तिः सुहुतं भवन्त्विति गुरुर्वदेत् ।।
ओं स्वस्तिशान्तिः सुहुतमिति ब्रूयुः पुनश्च ते ।
ओं भुवस्वाहेति हुत्वा पुनराज्यं प्रमार्ज्य च ।।
आज्यभागाहुतास्तावदस्माभिः शास्त्रदृष्टिभिः ।
शं भवन्तो वदन्त्वत्र प्रीयतां च जनार्दनः ।।
ओं स्वस्ति भवन्तो ब्रुवन्तु स्वस्तिशान्तिमथोत्तरम्।
ओं स्वस्तिः सुहुतं तद्वदेव तदुत्तरम् ।।
ओं[१३४] स्वस्वाहेति हुत्वान्नं संप्रोक्ष्य च निवेदयेत् ।
चरवः सुहुताः पूर्वमस्माभिः शास्त्रदृष्टिभिः ।।

---

[131] PL क्षीरजा
[132] PL ओं भूर्भुवस्वाहेति
[133] PL भवन्त्वत्र
[134] PL एवं

मंगलं च वदन्त्वत्र प्रीयतां च जनार्दनः।

मंगलं प्रवदन्त्वत्र तेऽपि मंगलमस्त्विति ।।

ओं सुमंगलं सुहुतं मंगलं सुहुतं परे।

ओं भूर्भुवस्वस्वाहा हुत्वाज्यं च निवेदयेत् ।।

आद्यन्तयोः परिषेकः कार्यः कर्णान्तथान्ततः।

विष्णवे चेति हुत्वाज्यं सर्वदेवेभ्य इत्यपि।।

सर्वाभ्यो देवताभ्यश्च सर्वभूतेभ्य इत्यपि।

रुद्रायेति पुनस्तद्वद्ब्रह्मणेति पुनस्तथा।।

व्याहृतीभिश्च हुत्वाज्यं प्रोक्ष्य होमं समापयेत्।

संपातादि्भश्च संपूर्य कलशं सकमण्डलुम्[१३५] ।।

अनेन पूरयित्वेष्ट्वा वस्त्राभ्यां परिवेष्टयेत्।

ओं सर्वतीर्थाहृतैस्सर्वसमुद्राहृतैः प्राक् स्त्रोतसीभ्यो वाहीभ्यो प्रत्याहृतैरम्बुभिः ससंपातैः सपवित्रैः सरत्नैः कलशं पूरयामि विष्णोरहम् ओं भूर्भुवस्वरों विष्णवे नमः सर्वव्यापिन् सर्वलोकाधिपतये ओं स्वाहा

वर्धनीं पूरयेत् पश्चात्तच्छिष्टादि्भरनेनतु[१३६]

ओन्नमोभगवते महासुदर्शनाय महाचक्राय महाज्वालाय दीप्तरूपाय सर्वतो रक्ष रक्ष मां (महा) पालय स्वाहा ।

शयनाद्विष्णुसूक्तेन विष्णुमुत्थापयेत् गुरुः ।

---

135 PL सकलं सकमण्डलं

136 Missing pages from 81 to 231 in PS

आदाय सुकुशे हस्ते सव्येत्र परिदक्षिणम्

स्मरन् हरिन्नयेदग्रे वर्द्धनीम्मन्त्रमुच्चरन्

सकुशं पातयेद्धारामविच्छिन्नामनुत्कटाम्

तत् पृष्ठे कलशन्तद्वद्देवमीशं गृहन्नयेत्

सकुशां पातयेद्धारान्देवमूर्द्धनि देशिकः

आदाय कलशं पश्चाद्देवन्तमभिषेचयेत्

शन्नोदेव्यणोरणीयान्मन्त्रद्वयमुदीरयेत्

पूर्ववच्चोभयं स्थाप्य पञ्चभिः प्रोक्षयेत् गुरुः

गर्भगेहमळिन्दञ्च प्रांकणं देवतागृहम्

सालान्तं भूमिभागेषु शोधितेषु यथाविधि

ततो गर्भगृहं गत्वा मन्त्रैश्शान्तिकपौष्टिकैः

वैदिकैस्तान्त्रिकैः प्रोक्ष्य देवमीशं प्रपूजयेत्

एकवीरे तु संयोज्य कौतुकादभिषेचनम्

बहुवीरेभिषिच्येशन्नियोज्य परिचिन्तयेत्

गुरवे मूर्त्तिपेभ्यश्च सदस्येभ्यस्स्वशक्तिभिः

सुवर्णन्दक्षिणान्दद्याद्यजमानस्मरन् हरिम्

तन्तुवेष्टनमारभ्य यावत्भूमि परिग्रहम्

क्रमेण पूर्ववत् कृत्वा सूत्रन्तारेण पातयेत्

एकादशपुटे क्षेत्रै नवानांन्नवकन्नयेत्

मद्ध्यखण्डगतैः कोष्ठैस्सर्वत्र कमलं लिखेत्

तालमात्रानि कोष्ठानि चतुरश्राणिकल्पयेत्

रजोभिः पञ्चवर्णैस्तु पंकजं परिपूर्य च

तैरेव तानि कोष्ठानि वर्णैर्व्यत्ययसंस्थितैः

व्रीहिभिः पीठिकां कृत्वा कुशौ हंसेन विन्यसेत्

सौवर्णान् राजतान् ताम्रान् मृण्मयान्वा नवान् शुभान्

कलशान् क्षाळितानस्त्रैः सूत्रान्तारेण वेष्टितान्

उत्पाद्याग्निं शतं कृत्वा गायत्र्या सेचयेत्घृतम्

धूपितान् सादयेत्तेषु तारेण प्रागुदङ्मुखः

मद्ध्यस्थदलसंस्थानां सादनञ्चैव पूरणम्

इन्द्रादि शिवपर्यन्तं प्रादक्षिण्यक्रमेण हि

दिग्विदिक् क्रमयोगेन बाह्यस्थानां प्रपूरणम्

घृतमुष्णोदकं रत्नं फलं लोहञ्च मार्जनम्

गन्धाक्षतयवानन्तः पाद्यार्घ्याचामगव्यकम्

दधिक्षीरन्नवं क्षौद्रं कषायं पूरयेत् बहिः

विष्णुस्वयञ्जातः कुबेरो वसवः क्रमात्

विश्वेदेवाश्च गन्धर्वा निरृतिर्विन्ध्यवासिनी

पितर श्रीसरस्वत्यौ प्रजानां पतिरव्ययः

शुक्रस्सोमस्तथैवेन्द्रो यमश्च कलशाधिपाः

एतेषान्नामभिर्न्यासं द्रव्याणां कलशेष्विह

कूर्चपल्लववस्त्राणान्यासमष्टाक्षरेण तु

फलतण्डुलसंपूर्णचाक्रिकाश्चक्रविद्यया
आधिवासनिकान् होमान् जुहुयुर्गुरुमूर्तिपाः
प्रणीतातोयभस्माज्यं कलशेषु समर्चयेत्
पालिका स्थाप्य धान्येषु वीथिकासु समन्ततः[१३७]
मुहूर्ते शोभने पीठं प्रातरिष्ट्वा स्वशक्तिभिः
आहूय सकळीकृत्य ध्यात्वा तत्वान्यनुक्रमात्
न्यस्त्वांगे पौरुषं सूक्तं मन्त्रन्यासमथांगवत्
करपज्जानुकट्याख्य कुक्षिहृद्बाहुकन्धरम्
मुखदृकावटस्थानन्तदाज्यं सृष्टिसंज्ञितम्
अर्घ्यं पाद्यन्तथाचामं मधुपर्कं प्रदाय च
मूर्ध्नि दूर्वाक्षतान्कृत्वा पादयोरोमिति ब्रुवन्
यवोदकान्तं पाद्यादि क्रमादानीय देशिकः
ऋग्भिः पुरुषसूक्तस्य स्नाप्येदं विष्णुरित्रृचा
तच्छुद्धसलिलैस्साकं स्नापयेत् प्रागुदङ्मुखः
प्रतिखण्डं समभ्यर्च्य नीराज्य च पुनः पुनः
प्राग्याम्यवारुणोदीच्य खण्डस्थान्मद्ध्यगं घृतम्
बहिः कोणगतान् मद्ध्यदळगान् दिग्विदिक्रमात्
वस्त्रभूषणगन्धाद्यैरिष्ट्वा सपरिवारकम्
निवेद्यञ्च बलिं दत्वा दक्षिणाञ्च द्विजान्यजेत्

[137] PL खमन्ततः

दिक्षु त्रिकं विदिक्ष्वैकन्नवान्तः पञ्चविंशतौ
षड्दिक्षु मद्ध्ये नवकं कोणेषु च चतुष्टयम्
पञ्चाशत्येकहीने तु पदानां विधिरीदृशः
त्रयोदशपुटे क्षेत्रे नवकोष्ठैरथांबुजम्
दशकन्दिक्षुकोष्ठेषु तथैवदशपञ्चकम्
अष्टोत्तरशतेप्येवं पूरणं पूर्ववत् स्मृतम्
चतुर्दशपुटे क्षेत्रे कृत्वादौ षोडशाष्टकम्
पादैः षोडशभिः पद्मं लिखित्वाष्टदळं शुभम्
षड्त्रिंशदधिके स्नानं शतं कुंभैस्समीरितम्
पञ्चदशपुटे क्षेत्रे पञ्चविंशद्भिरंबुजम्
दिक्षुविंशतिकं नीत्वा कोणेषु दशपञ्चकम्
ऊनाद्ध्यर्द्धशतेप्येवं पदानां विधिरीदृशी
दशसप्तपुटे क्षेत्रे पञ्चविंशद्भिरंबुजम्
पञ्चविंशतिकं दिक्षु कोणे षोडशकं नयेत्
दळेष्वष्टौ च तत्बाह्यपदेष्वष्टौ घटान्न्यसेत्
एकाशीतिघटैस्सार्द्धं शतं कुंभैरुदाहृतम्
दशसप्तपुटे क्षेत्रे चतस्रो वीथय स्मृताः
द्विशतैः पञ्चविंशद्भिरथ चाष्टोत्तरैर्घटैः
त्यक्त्वा षोडशकुंभांस्तु द्विशतैरिह मद्ध्यतः
घृतं विलीनमुत्भूतं कापिलं वैष्णवं विदुः

सुतप्तायसनिक्षेपात्तप्तमुष्णं जलं भवेत्

वज्रमौक्तिकवैडूर्यपद्मरागप्रवाळकैः

पञ्चांगं रत्नतोयं स्यादष्टाङ्गं हि फलोदकम्

कदळीनाळिकेराम्रधात्रीपनसडाडिमैः

सबिल्वभव्यैः पञ्चाङ्गं लोहतोयमुदाहृतम्

सुवर्णं रजतन्ताम्रमायसन्त्रपु कीर्तितः

सहानिशासदाभद्रा शिरीषं सूर्यवर्तनी

कुशाग्रम्मार्जनं षड्भिरष्टाङ्गं गन्धमुच्यते

सेव्यार्तबुजटास्त्रायोमुरशीतैस्तु गन्धकम्

शालितण्डुलनीवारैरक्षतं सुनवं यवम्

दूर्वाश्यामाकपद्माख्यविष्णुपर्णीचतुष्टयम्

पाद्यमर्घ्यमथाष्टाङ्गमाचामञ्चतुरंगिकम्

सिद्धार्थं गन्धपुष्पञ्च फलं यवतिलाक्षतम्

कुशाग्रञ्चार्घ्यमुद्दिष्टन्दशाङ्गं क्षीरवारिभिः

तक्कोलजातिकर्पूरलवङ्गकुसुमैः परम्

मूत्रार्द्धं गोमयं क्षीरं सप्तभिस्त्रिगुणन्दधि

आज्यमाद्यसमं क्षिप्त्वा मथित्वा तेन पूरयेत्

अश्वत्थोदुंबरशमीवटब्रह्मविकंकतैः

सबिल्वखदिरैस्सिद्धैरष्टाङ्गन्तु कषायकम्

क्षेत्रे धान्यपुटे पञ्चपञ्चविंशाधिकद्वये

आक्रम्य त्रिपुटं लंपचतस्रोवीथयोन्तरे
क्षेत्रे चात्रपुटे चान्तर्नवानान्नवकन्नयेत्
त्रीणि त्रीणि चतुर्दिक्षु कृत्वा द्वादशकं बहिः
कोणेषु नवकन्द्वाभ्यां पञ्चाशद्भिश्शतद्वये
द्वाविंशतिपुटे क्षेत्रे कोष्ठैष्षोडशभिः कजम्
दैविके नवकान्यष्टौ मानुषे षोडशाष्टकम्
अन्तराळे तु परितः कल्पयेद्द्वादशाष्टकम्
पञ्चविंशति भागेषु क्षेत्रेषु परिपूरणम्
प्रवदामि समासेन चतुर्भिरिहमद्ध्यमम्
नवकेषु च मद्ध्यस्थान् कलशान्दैविकैः क्रमात्
यवोदकान्तैस्संपूर्य तत्राष्टाष्टकमम्बुभिः
दिग्विदिक्क्रमयोगेन पाद्याद्यैष्षोडशाष्टकम्
गुळमिक्षुरसं क्षीरन्नाळिकेरस्य शान्त्यपः
भृशादिमङ्गलाम्भस्तु शोषादिषु निवेशयेत्
पूरणं ब्रह्मबीजेन देवतामूर्तिशक्तयः
यवोदकान्तं पाद्यादि पूर्ववत् स्नाप्य तैः पुनः
त्वं विष्णो इति मन्त्रेण गुळाद्यं यच्चतुष्टयम्
विष्णोर्नुकमितीत्युक्त्वा शोषाद्यम्मङ्गलोदकम्
गायत्र्या स्नापयेद्देवं शुद्धादिभिः परितस्थितैः
धात्रा विनिर्मिते क्षेत्रे मद्ध्ये दिक्षु विदिक्षु च

क्रमादेकोनपञ्चाशत्पदानि परिकल्पयेत्

चत्वारिंशत् घटैस्सार्द्धं कलशैस्तु चतुश्शतैः

स्नपनं देवदेवस्य चोत्तरं परिकीर्तितम्

पूरणं स्नपनं चैव मद्ध्यखण्डे तु पूर्ववत्

चतुर्षु ब्रह्मकुंभेषु गुळाद्यैर्दिक्षु पूरयेत्

चतुर्षु ब्रह्मकुंभेषु कोणे वैमं गुळोदकम्

स्नापयेत् पूर्वमन्त्राभ्यां स्नानमेवं प्रकीर्तितम्

यवनीवारसिद्धार्थतुळसीपत्रवैणवैः

तिलैश्शान्त्युदकं षड्भिश्चतुर्भिर्मङ्गलोदकम्

इन्द्रवल्यङ्कुरं पद्ममेकपत्रं च पैप्पलम्

आद्यङ्गमितरालाभे पाद्यादीनां प्रशस्यते

इति श्रीनारायणात्मके पञ्चमपटलः

नारायणात्मके वैष्णवे
षष्ठः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे

पञ्चविंशतिभिर्द्रव्यैर्स्नपनं प्रवदाम्यहम्

पञ्चदशपुटे क्षेत्रे नवकोष्ठैरथांबुजम्

दिक्षु त्रिकं विदिक्ष्वैकन्नवकञ्चाष्टकन्त्रिकम्

दैविकैर्मानुषे दिक्षु विदिक्ष्वेषामथान्तरे

ब्राह्मे षडक्षरम्मन्त्रन्दैविकेष्टाक्षरं स्मृतम्

मानुषे द्वादशार्णं तु मन्त्रत्रयमुदाहृतम्

अन्तराळेषु गायत्री वैष्णवी परिकीर्तिता

प्रायतः प्राङ्मुखः पूर्वं पीठमिष्ट्वा गुरुः स्वयम्

ब्राह्मे स्नानोदकं न्यस्त्वा विष्णुमाहूय तं यजेत्

पाद्यार्घ्याचामगव्याज्यदधिक्षीरमधूनि च

उष्णोदकं कषायञ्च मार्जनं फलवारि च

यवोदकं रत्नजलं लोहतोयं कुशोदकम्

गन्धपुष्पौपमानाख्यसुगन्धामलकं धरे

अक्षतन्नाळिकेरञ्चाप्यैक्षवन्तण्डुलोदकम्

बहिरभ्यर्च्य संपूर्य शेषान्छुद्धादिभिरेव तु

पितरश्रीसरस्वत्यौ दक्षविष्णूशनेन्दवः

इन्द्रार्कयमविश्वाख्याः कुबेरो[१३८] वायुरप्यजः
वसवश्चेति सावित्री पाद्यादिद्रव्यदेवताः
गन्धर्वो[१३९] वरुणस्तार्क्ष्यो भूमिर्निरृतिरेव च
श्रीधरश्च नृसिंहोश्वमुखो मद्ध्ये परः पुमान्
पूरितान् पूरितान् सद्यः पल्लवैरुपशोभयेत्
चक्रमन्त्रेण विन्यस्य चक्रिकाश्च सतण्डुलाः
वासोभिर्वेष्टयेत्सर्वान्नवैः केरविवर्जितैः
आधिवासनिकान् होमान्जुहुयुर्गुरुमूर्तिपाः
चतुर्विंशतिधा विष्णोस्तत्वभेदेन तिष्ठतः
द्रव्ये[१४०] यत्ताश्रयास्सर्वे सङ्गच्छन्तां विभूतयः
शास्त्रोदितमिदञ्चास्तु स्नपनं देवनिर्मितम्
अनेन स्नपनेनास्तु प्रसन्नो भगवान् हरिः
इत्युच्चार्य[१४१] गृहं गत्वा संपूज्य सकलेश्वरम्
त्रिरस्त्रेण च नीराज्य स्नापयेत्तमुदङ्मुखः
इदं विष्णुर्हिरण्यवर्णा आपोहिष्ठा प्रजापते
तेजोऽसि च दधिक्राव्ण आप्यायस्व तथा मधु
आथाकृष्णेन[१४२] चाश्वत्थे भद्रंकर्णेभिरेव च
गणानां वायवायाहि ब्रह्मजज्ञानमेव च

---

[138] PL कुबेरे
[139] PL गन्धर्वा
[140] PL द्रव्या
[141] PL इत्युद्घार्य
[142] PL अथ सत्येन

उपत्वाग्नेति देवस्य बहिर्मन्त्राः प्रकीर्तिताः
विष्णोरराटन्तत्वा च सुवर्णस्योनापृथिव्यपि
शन्नो यादिव्य यासाञ्च परोमात्रेति दैविके
मद्ध्येतोदेवसूक्तञ्च सर्वत्रान्ते स्वपूरणम्
प्रतिद्रव्यं समभ्यर्च्य नीराज्य स्नापयेत् बुधः
शुभे तु तैजसे पात्रे शालितण्डुलपूरिते
अस्त्रैरश्वत्थपत्रस्थैर्नवगोमयकल्पितैः
वर्णोज्ज्वलैर्यथाशोभं वर्तमानाज्यवर्तिभिः
उज्वलाभिर्युतम्मद्ध्ये तेन नीराजनं भवेत्
सकळीकृत्य संपूज्य हुत्वाग्नौ विकिरेत् बलिम्
पूर्ववच्चदिशाहोममुत्सवञ्चावगाहनम्
शालिपिष्टन्निशाचूर्णं हेमरत्नाक्षतानि च
स्नानोदकस्य चाङ्गानि पञ्चाशन्मद्ध्यमे घटे
जातिस्त्रीमल्लिकाकुन्दनन्द्यावर्ताब्जचम्पकैः
यूथिका बकुळाभ्यान्तु कर्तव्यं कुसुमोदकम्
शंखारिताक्ष्यर्कूर्मैस्तु लोहजैरौपमानिकम्
यवतण्डुलकव्रीहिमाषनीवारवैणवाः
षडंगा इह संप्रोक्ता अक्षतार्त्थं मनीषिभिः
पूर्वोदितानि चान्यानि लोहे त्रपुकमेव वा
सप्तदशपुटे पद्म(न्दैविकेन)न्नवकोष्ठैश्च मद्ध्यतः

षड्कं पुनस्त्रिकन्देवे नवकञ्चाष्टकं बहिः
षड्कमेवं समुद्दिष्टमर्धाधिकशतं पदम्
एकोनविंशत्कोष्ठेषु सर्वाणि नवकानि हि
एकविंशति[143] पुटे पद्मन्दैविके नवकाष्टकम्
त्रीणि त्रीणि चतुर्दिक्षु कृत्वा द्वादशकं बहिः
कोणेषु नवकद्वाभ्यां पञ्चाशद्भिश्शतद्वये
त्रिशते पूर्य निर्द्दिष्टमार्गेणेह पदक्रमः
एको द्वौ बहवो वापि हीनमद्ध्योत्तमेषु च
आचार्यास्सर्वतन्त्रज्ञा भवन्ति परिचारकाः
आदिमूर्तेः क्रियैकस्थास्तन्निवेदितवृत्तयः
त्रिंशत्सूत्राणि पूर्वाग्राण्युत्तराग्राणि पातयेत्
शतं स नवकं मद्ध्ये पूर्ववत् परिकल्पयेत्
परितो विमृजेत् पङ्क्तिस्त्रीणि त्रीणि दिशासु च
पञ्चविंशतिकान्येकम्मुक्त्वा कोणे तथैव च
पञ्चाधिकैः पञ्चशतैः कलशैस्नानमीदृशम्
स्नानोदकन्तु संपूर्य ब्राह्मे विष्णुं समर्चयेत्
परिवेष्ट्य च वस्त्राभ्यां सहस्त्रं प्रजपेन्मनुः
तैलं गुळन्नाळिकेरं शान्तितोयन्दिशासु च
आग्नेयादिषु कोणेषु मङ्गलोदकमेव हि

---

[143] PL एकविंशं

मन्त्राश्च देवतास्तेषाम्मूर्तयश्शक्तय स्मृताः
भृशादिषु मृदमूलं कादळं गोमयं रसः
बिंबं शुद्धौ तु यत्प्रोक्तं पल्लवाद्यञ्चतुष्टयम्
एभिस्संपूरयेत् कुंभान् क्रमाद्विष्ण्वादिमूर्तिभिः
अपरान् पूरयेत् कुंभान् गायत्र्या शुद्धवारिभिः
पैशाचेष्वेवमापूर्य मानुषे पूरयेत् घटान्
पाद्यमैन्द्रे यमेचार्घ्यमाचामं वारुणे न्यसेत्
पञ्चगव्यं तथा सौम्ये घृतमाग्नेयगोचरे
नैरृते दधि विन्यस्य वायव्यां क्षीरमेव च
क्षौद्रमीशानभागे तु द्वादशाक्षरविद्यया
उष्णोदकं भृशे चाथ कषायं वितथे न्यसेत्
मार्जनं भृङ्गराजे तु पुष्पदन्ते फलोदकम्
शोषे यवोदकं रत्नम्मुख्ये लोहं तथादितौ
कुशोदन्तु पर्जन्ये दैविके पूरयेत् पुनः
गन्धांभोऽर्यमदेशे च पुष्पतोयं विवस्वति
तथौपमानिकम्मित्रे सुगन्धामलकन्धरे
सावित्रेक्षततोयन्तु नाळिकेरकमिन्द्रके
ऐक्षवं रुद्रदासे तु तथान्ते[१४४] तण्डुलोदकम्
अष्टाक्षरेण संपूर्य वासोभिर्वेष्टयेत् पृथक्

[144] PL तथाते

दीक्षितैर्दिक्षुहोमांश्च कारयित्वाधिवासयेत्

कारयित्वा पुनश्शान्तिं पञ्चोपनिषदैर्गुरुः

शान्तितोयमथानीय संपाताज्यसमायुतम्

स्पृष्ट्वा संप्रोक्षयेत् कुंभान् कूर्चाग्रैः प्रणवेन तु

शुद्धाभवन्त्विमे कुंभास्सकुशास्सापिधानकाः

वातातपपरीताश्च शुभलक्षणलक्षिताः

चतुर्विंशतिधा विष्णोरिति विज्ञाप्य पूर्ववत्

ज्ञापयेद्देवदेवेशं कलशैः पूरणक्रमात्

त्वंविष्णोसुमतिं कुंभे दिग्गते स्नापयेत् पुरा

बहिः कोणगतैः कुंभैर्विष्णोर्नुकमितीत्यृचा

मूर्द्धानन्दिवो यादिव्या या ओषधीरिति क्रमात्

गन्धद्वारञ्च हंसाद्यं विष्णोरराटमित्यपि

सोमं राजानमित्येवं विश्वतश्चक्षुरित्यपि

अन्तरा अन्तराळगतैरेवं पाद्याद्यैरपि पूर्ववत्

कुंभेशं मूलमन्त्रेणाप्यतोदेवेति मद्ध्यमम्

एभिर्द्रव्यैश्च मन्त्रैर्वाप्यपरैस्तन्त्रवचोदितैः

सहस्रकलशैर्देवं यथावदभिषेचयेत्

स्नानान्ते विष्णुपञ्चम्यां विजयाख्यं बलिं हरेत्

द्विषड्केण द्विषड्केण षड्केण सवनत्रये

अर्चनन्द्रव्यहोमञ्च पक्वं गायत्र्यान्तरे

द्रव्याणां वौषडन्तेन पूर्णा वै द्वादशात्मना

प्रातः पुरुषसूक्तेन पुनर्न्नारायणेन च

मद्ध्याह्ने चापराह्णे च विष्णुसूक्तेन वै घृतम्

द्वात्रिंशत् प्रस्थमारभ्य सुतण्डुलश्रितान्धसा

नैवेद्यं ब्राह्मणानां च भोजनं बलिकर्म च

देवाग्रे विष्णवे तस्य पर्षद्भ्यो ब्राह्मणे हरेत्

द्वास्थाभ्यां च हरेदन्तर्नन्दाय कुमुदाय च

चण्डायाथ प्रचण्डाय बहिर्द्वारि बलिं हरेत्

नमस्ते द्वारियुक्ताय मन्त्राभ्यां मद्ध्यतस्तयोः

दद्याच्च पुरुषायाभ्यां बलिं चैव पुरोमुखे

सावित्राय सवित्रेशौ विश्वमिष्ट्वास्य पार्श्वयोः

सत्याख्यं दक्षिणद्वारि संपूज्याथ विवस्वते

वैकुण्ठाय च नैरृत्यामिन्द्रायेन्द्रजयाय च

पश्चिमेवाच्युतायेति मित्राय द्वारि चानिले

सर्वरूपाय रुद्राय तथा रुद्रजयाय च

रुद्धाय भूभृते सौम्ये भावनाय च शांकरे

आपाय चापवत्साय गरुडञ्च विभोः पुरः

एवञ्च जगतीक्षेत्रबाह्ये संपूज्यापरान्यजेत्

पक्षविक्षेपविद्ध्वस्तसमस्ताहीन्द्रमण्डल

हरिकेतो नमस्तुभ्यं गरुत्मन् वायुमूर्तये

नामभिः पूर्ववच्छेषन्तद्वद्विघ्नञ्च शंकरम्

स्तुतिमन्त्रैरुपस्थाय नामभिर्विकिरेत् बलिम्

स्वस्वदिक्षु सुरापानां स्वस्वपार्षदैसह

दैत्यदर्पविनाशाय सहस्राक्षाय वृत्रहन्

कुलिशव्यग्रहस्ताय नमस्तेस्तु शतक्रतो

ओं इन्द्राय वज्रहस्ताय सुराधिपतये विष्णुपार्षदाय नमः।

इन्द्रपर्षद्भ्यो नमः। भूतेभ्यो नमः। आदित्याय नमः। ओं नमो

भूतेभ्यो भूतिकृत्भ्य सर्वेभेयोरिष्टकृत्भ्य सद्भ्यो सद्भ्य सदसद्भ्यो

वैष्णवेभ्यो नमो नमः। नमो भृशाय नमः। नमो अन्तरिक्षाय

नमः। नमो दुःखाय नमो पूष्णे नमो वितथाय नमो गृहक्षताय

नमो यमाय नमो गन्धर्वाय नमो भृंगराजाय नमो मृगाय नमो

राक्षसा यातु। निरृतये। पितृभ्यः । नमो दौवारिकाय नमो

सुग्रीवाय नमो पुष्पदन्ताय.

येन प्रलीयते(प्रसूयते) सर्वं यस्मिन्सर्वं प्रलीयते

आमोघपाशहस्ताय तस्मैपां पतये नमः

वरुणाय पाशहस्ताय जलाधिपतये विष्णुपार्षदाय नमः

वरुणपर्षत्भ्यो नमः वरुणाय नमः नमो भूतेभ्यः असुराय नमो

शोषाय नमो राजयक्ष्मणे

पूर्यन्ते च हीयन्ते च.... वायवे ध्वजहस्ताय तत् वायवे नमो

नागाय नमो मुख्याय नमो भल्लाटाय नमो

यं प्राश्यामरतां यान्ति देवा यज्ञशरीरिणः

सोमाय गदिने तस्मै ज्योतिषां पतये नमः

सोमाय गदाहस्ताय तत्

यत्प्रसादात्...

वैश्रवणाय गदाहस्ताय तत् सोमाय नमो अर्गळाय नमो अदित्यै

नमो उदित्यै नमो

येन कालाग्निना..

ईशानाय शूलहस्ताय ईशानपर्षद्भ्य ईशानाय नमो पर्जन्याय नमो

जयन्ताय नमो इन्द्राय नमो

एकाशीतिपदेष्विष्ट्वा देवमूर्तिधरान् सुरान्

तत्र तत्र च तत्काले वास्तुदेहस्थितानपि

अन्तराळे बलिन्दद्यात्तत्काले तत्र तत्र तु

द्वितीयावृतिरेवंस्यात्तृतीयावृतिरुच्यते

स्कन्दादिशिवपर्यन्तमुत्सवोदितवर्त्मना

विकिरेच्च बलिंदद्यानृत्तगीतादिसंकुलम्

तृतीयावृतिरेवं स्याच्छ्रीधराभ्यां विभोः पुरः

विकटश्च विरूपाक्षपूर्वगोपुरपालकौ

सनातनश्च सनको दक्षिणे पश्चिमे पुनः

शान्तः प्रमोदस्सुखदः सर्वमदनोप्युदक्

ये समस्तादिना घोष्य दिक्क्रमात् पीठिकासु च

कुमुदादि बलिं दत्वा पञ्चाशद्भ्योस्तु तत् बहिः

ओं कुमुदाय विष्णुपार्षदाय नमः पञ्चाशत्गणेभ्यः कुमुदपार्षदेभ्यो वैष्णवेभ्यो प्राक्स्थितेभ्यो नमो नमः।

पूर्वस्यां दिशि हरेर्भगवतो पर्यायेण दिक्क्रमात्

बलिं दत्वा देवतादि ग्रहेभ्यश्च तदाञ्जलिः

बलिपीठं समासाद्य गन्धाद्यैः परिपूज्य च

पुरस्सरादिपर्यन्तं पर्यायेण च दिक्क्रमात्

ये भूता इति मन्त्रेण दिक्ष्वैशान्यां बलिं हरेत्

पुनरेवाष्टमूर्त्यादि मन्त्रेणापि तदैव हि

शर्वस्कन्दं विदारीं चार्यमाख्याञ्च पूतनाम्

जंभञ्च राक्षसीं पापां पिलिपिञ्छञ्चरादिकीम्

संपूज्य सह तेभ्योपि दत्वा वै क्षेत्रपं यजेत्

बलिकर्मणि यान्यत्र मया नोक्तानि यानि तु

प्रयोक्तव्यानि चान्वीक्ष्य तज्ञैरुत्सवकर्मणि

मोक्षार्त्थी वा सुभोगार्त्थी वत्सरे मासि मासि वा

बलिञ्च विकिरेद्रात्रौ दक्षिणान्नाद्यसंयुतम्

पद्मस्त्रुक्कुण्डभोदानां पूर्वोक्तानां तु लक्षणम्

कथयामि समासेन नत्वा देवमधोक्षजम्

दिग्विभागं विदित्वादौ प्राक्प्रत्यक्सूत्रमायतम्

आस्फाल्य मद्ध्ये कृत्वाङ्कं पूर्वपश्चिमयोस्तथा

तयोर्मद्ध्यस्थमानेन तयो स्थित्वा समुल्लिखेत्
दक्षिणोक्तरयोर्मत्स्यौ मद्ध्यस्थे च तयोर्गतम्
दक्षिणोत्तरमास्फाल्य सूत्रं सूत्रेष्टदिक्षु च
मापयित्वा ततः क्षेत्रमुल्लिख्येष्ट च संस्थितः
कोणेषु च समुल्लिख्य बाह्यसूत्राणि पातयेत्
एवं प्रसाधयेद्विद्वान् सर्वत्र चतुरश्रकम्
त्रिंशत्भागैर्विभक्तंस्यादुत्तरन्तु शताङ्गुलम्
आद्यांशं कर्णिकाक्षेत्रं द्वितीयं केसराह्वयम्
तृतीयन्दळसंख्याख्यं चतुर्थन्दळसंज्ञकम्
पञ्चमात् त्रितयांशेन पत्राग्रञ्चाक्षमीरितम्
अवशिष्टेन षष्ठेन त्रिधा नाभिं समुल्लिखेत्
अरक्षेत्रं त्रिभिर्भागैर्मूलमध्याग्र भेदवत्
नेमिक्षेत्रं पुनर्द्वाभ्यां द्विधा भूयस्समुल्लिखेत्
वीथिक्षेत्रं पुनर्द्वाभ्यां द्वाभ्यां द्वारादिकं बहिः
कोणसूत्राणि चास्फाल्य तत्राक्षेऽष्टदळं लिखेत्
क्षिप्तेषु सन्धिसूत्रेषु दळसन्ध्यान्तरेण तु
दळान्यग्राणि मानेन पार्श्वस्थेन बहिस्थितः
कर्णिकार्धेन मानेन प्राक्संस्थं भ्रामयेत् क्रमात्
तत्पार्श्वभ्रमयोगेन कुण्डल्यषड् भवन्ति हि
तेषु क्षिप्त्वाथसूत्राणि सन्धिसूत्राणि चान्तरे

लिखेद्द्वादशपत्राणि दळसन्ध्यन्तरेण तु
केसरे तु लिखेद्द्वौ द्वौ पत्रे पत्रे समन्ततः
दळतुल्यारके चक्रे दळरेखाः प्रसार्य च
द्वादशारं लिखेच्चक्रमष्टपत्रे तथैव च
पादयेत् पञ्चसूत्राणि सन्धौ प्रत्येकशः क्रमात्
द्वाभ्यां द्वाभ्यान्तु मूलाग्रञ्चतुर्भिरुदरं भवेत्
अरस्य सन्धेरुद्दिष्टं तद्विपर्ययलक्षणम्
अराणान्द्वादशानान्तु लक्षणन्त्वेवमेव हि
अरसन्धिगतारेखा नेमिक्षेत्रे प्रसार्य च
चतुर्विंशतिधा कार्याः प्रथयश्चाधरोत्तराः
चतुर्विंशतितत्वस्थास्ताश्चारान्याग्रन्थयः
अन्तश्चत्वारि षड्बाह्ये कोष्ठानि परिलोपयेत्
द्वारार्थन्दिक्षु तत् पार्श्वे चत्वारि द्वे विलोमतः
शोभार्थमन्यथा तद्वङ्मुखद्वारन्तदन्यथा
उपशोभां बहिस्सप्तकोणार्थं त्रीणि चान्ततः
कर्णिका पीतवर्णा तु दळानि सुसितानि तु
केसरास्तनवोमूले पीता मध्येरुणा स्थिताः
अग्रे समुन्नता रम्या परस्परसमा शुभाः
दळसन्धयः श्यामळा कृष्णवर्णस्त्वथापदि
सितरक्तासितानाभिः पीतारा रक्तसन्धयः

प्रथयशुक्लवर्णास्युर्व्यत्ययात् पीतसन्धयः

अथवा रक्तपीतास्युर्न्नानावर्णैस्तु वीथिका

लतावितानपत्राद्यैर्न्नागबन्धैस्सुशोभनाः

शुक्लरक्तसितापीतकृष्णादाद्यारयः क्रमात्

भङ्क्त्वा षोडशधा क्षेत्रन्तत्र सूत्राणि पातयेत्

एकया कल्पयेदक्षन्दळाग्रञ्च तदग्रकम्

नाभिक्षेत्रात्समादाय नाभिञ्चेव द्वितीयया

अरकांश्च पुनर्द्वाभ्यामेकया नेमिमण्डलम्

एकया वीथिकाद्वाभ्याद्वाराद्यं यच्चतुष्टयम्

एवं चक्रं समुद्दिष्टञ्चतुर्हस्तन्तु पूर्ववत्

द्वादशाङ्गुलिभिश्चाक्षं चतुर्भिन्नाभिरुच्यते

अरन्दशाङ्गुलैर्षट्भिर्येवैर्द्वाभ्याञ्च पञ्चभिः

नेमिकामङ्गुलैर्बाह्ये पंक्तिभ्यान्द्वारमेव हि

पङ्क्त्या शिष्टेन वीथ्याख्यं भङ्क्त्वा षोडशधा समम्

परिमाय पुराक्षेत्रञ्चतुर्हस्तं स्वराङ्गुलम्

भक्तो नाऽतिधनीयस्तु व्रतपूजादिकर्मणि

नेम्यन्तद्विकारञ्चक्रमेकनाभ्येकनेमि च

नवभिश्चाङ्गुलैश्चाक्षन्नाभिस्तु तिसृभिस्मृताः

अष्टाभिररकान् कुर्यान्नेमिन्तु चतुरङ्गुलैः

इन्दीवरदळाकारानथवा मातुलङ्गवत्

पद्मपत्रायतान्नम्यानरान् पूर्ववदेव वा

एकहस्तं द्विहस्तं वा चतुर्हस्तन्तु भाद्रकम्

अत ऊर्ध्वन्तु चक्राब्जमष्टहस्तान्तमिष्यते

भङ्क्त्वा षोडशधा क्षेत्रन्तत्रसूत्राणि पातयेत्

पङ्क्तिभ्यां कल्पयेद्वारं पङ्क्तिभ्यां वीथिकां (तथा)

(एवं) पङ्क्त्या तदन्तस्थं पद्मं पूर्ववदुल्लिखेत्

चतुर्भिः कल्पयेत् गात्रन्त्रिभिः कोणन्तु कोष्ठकैः

रक्तं गात्रं सितं पत्रमन्तःकोणन्तथारुणम्

द्वेन्तश्चत्वारि कोष्ठानि द्वारार्थन्दिक्षु लोपयेत्

त्रीण्येकमन्तर्बाह्ये तु शोभार्थञ्चान्यथा तथा

उपशोभान्ततः कोणन्त्रीणि त्रीण्यपि भेदतः

एवं षोडशकोष्ठे तु द्वाराद्यं परिकल्पयेत्

एकहस्तन्द्विहस्तं वा चतुर्हस्तन्तु षड्करम्

त्रिमेखलं भवेत् कुण्डं विस्तारार्धेन चावटम्

अष्टहस्तस्य कुण्डस्य मेखला द्वादशाङ्गुला

दशाङ्गुला द्वितीयायान्तृतीयाष्टाङ्गुला परा

षडङ्गुला चतुर्थीति मेखलानां समुन्नतिः

विस्तारसदृशीवाद्या चतुरङ्गुलसम्मिता

एकहस्तस्य कुण्डस्य त्रिभिर्द्वाभ्यामथेतरे

अनेनाभ्यूह्य कुण्डानाम्मेखलाः परिकल्पयेत्

द्वादशाष्टचतुर्भिर्वाप्यङ्गुलैर्मेखलोन्नतिः
चतुरङ्गुलविस्तारा सर्वास्ता हस्तमात्रके
चतुर्दशाङ्गुला नाभिः पश्चिमे मेखलासु च
कुण्डे निवेशिताकुञ्जितन्नाळं चतुरङ्गुलम्
चतुरङ्गुलविस्तारं सन्धिदेशं द्विरङ्गुलम्
सात्विकी राजसी चैव तामसी मेखला स्मृताः
कुण्डस्था वैष्णवीशक्तिः प्रकृतिस्त्रिगुणात्मिका
सा योनिस्सर्वभूतानां सिद्धीनाञ्च विशेषतः
लीयते विश्वमत्रेति कुण्डन्तद्विश्वकुण्डनात्
तस्मात् कुण्डेत्र होतव्यं विधिदृष्टेन वर्त्मना
उत्तरे बाह्यसूत्रस्य पूर्णपश्चिमयोर्लिखेत्
पञ्चांशेनैव कुण्डस्य षोडशांशेन चोत्तरे
उत्तराग्रे लिखेत्सूत्रे कुण्डान्तस्तत्र संस्थितः
पूर्वाङ्कात् पश्चिमा यावत् प्रादक्षिण्येन संलिखेत्
तुर्यश्रे तु कृतेप्येवन्नवमीचन्द्रवत् भवेत्
कुण्डार्धबाह्यसूत्रं यत् कोणे तदतिरिच्यते
तदर्धं दिशि संस्थाप्य भ्रामितं वर्तुळं भवेत्
पश्चिमस्याग्रयोः प्राच्यां षष्ठांशन्निक्षिपेत् बहिः
त्रीणि सूत्राणि निक्षिप्य त्रिकोणमपि साधयेत्
दर्शिताग्रदळानिस्युर्मेखलायान्तु वर्तुळे

एवं पद्मं त्रिकोणं वा कुण्डमुत्तरदिग्गतम्
कुण्डाकाराभवेदाद्या मेखला श्रीकृते परे
मेखलाभिः सदायुक्तं त्रिभिर्द्वाभ्यामथैकया
द्वितीयैकयोर्महानाभिर्नेच्छन्तीह मनीषिणः
स्त्रुवन्तु कारयेत्तक्ष्णा हस्तमात्रायतां शुभाम्
आज्यकुल्यासमायुक्तन्त्रिकोणं चतुरङ्गुलम्
एकाङ्गुलं भवेत् कण्ठं विस्तारेणद्वयङ्गुलम्
पुष्करञ्चतुरश्रस्यास्समं पञ्चाङ्गुलैश्शुभम्
तत् त्रिभागेन गर्तं तु तावन्निम्नं सुवर्तुळम्
परितो यवमानेन यवनिम्नं खनेन्मुखम्
यवैस्तु मेखलास्थाप्य यवनिम्नन्तु तद्बहिः
यवाभ्यां परितस्सम्यक्कल्पयेदुपमेखलाम्
मार्जनं परितः कुर्याद्यवनिम्नं हि शेषितम्
विस्तारार्द्धेन बहुळन्तदधः कल्पयेत् कजम्
कनीयसी प्रमाणेन सुषिरम्मुखकण्ठयोः
पुष्करस्य त्रिभागेन दण्डं गोपुच्छवच्छुभम्
तया पूर्णाहुतिन्दद्यात्तिष्ठन्वै स्त्रुवगुप्तया
अन्यत्सर्वन्तु होतव्यमासीनेन यथाविधि
स्त्रुक्स्त्रुवादीनि सर्वाणि स्वगृह्योक्तेन वर्त्मना
कलशे पदसंख्यार्द्धमेकेन सह मण्डपम्

(एकतोरणमग्रस्थं) यावन्मण्डप विस्तारं वितानन्तावदेवहि
आयामं मेखलायास्तु परिधीस्तद्वदेवहि
द्वादशाङ्गुलमानेन भवेत्कुण्डमथापदि
हरिव्रतेष्वशक्तानामेकद्वारन्तु मण्डपम्
एकतोरणमग्रस्थं वैनतेयध्वजान्वितम्
चण्डप्रचण्डसंयुक्तं कुंभेशकरणान्वितम्

इति श्रीनारायणात्मके षष्ठः पटलः

नारायणात्मके वैष्णवे
सप्तमः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे
मन्त्रोद्धारविधिं वक्ष्ये लक्षणञ्चाङ्गसंयुतम्
आद्यादिमुद्धरेत्पूर्वं पुनस्तस्त्रैव पञ्चमम्
षष्ठान्तमादिवर्गोनन्त्रयमेकत्र योजयेत्
एतत्परतरन्तत्वमुद्धृतं प्रणवं ध्रुवम्
व्याहृतीर्विन्यसेद्देहे हृन्मुखांसोरुकुक्षिषु
पूर्वपूर्वविहीनाभ्यां सत्यान्ताभ्यां हृदादिषु
न्येसेत् संकल्प्य वाङ्गानि स्वके भूयः प्रजापतिम्
गायत्रीमथजिह्वायां परमात्मपदं हृदि
ध्यायेज्ज्योतिर्मयं शुभ्रं शंखचक्रगदाधरम्
चतुष्कमष्टमेबीजमादिषष्ठान्तबिन्दुकम्
दीर्घस्वरैः प्रभिन्नेन विष्णुनाङ्गानि कल्पयेत्
अन्तर्यामीमुनिछन्दो गायत्रीदेवता स्वयम्
ध्यायेच्चतुर्भुजं सौम्यं तप्तहाटकसन्निभम्
पञ्चमान्तं परं तारान् षष्ठांशं सत्रयोदशम्
देवनामचतुर्थ्यन्तमित्येवं मन्त्रलक्षणम्
तारात्सबिन्दुकैर्वर्णैस्स्वरभेदितबीजकैः

नमोन्ताख्यैष्षडङ्गानि नेत्रान्तान्यस्य कल्पयेत्

बीजवच्चास्य ऋष्यादिमष्टबाहुं रविप्रभम्

एवं षडक्षरोमन्त्रो निर्बीजोष्टाक्षरस्तथा

बीजं काकीति विज्ञेयं लोपयित्वा क्रमेण क

द्विषड्के भगवच्छब्दो नमस्कारात्परो भवेत्

आद्यौ चैवादिवर्गस्य तथान्त्यौ परिकल्पयेत्

वासुदेवादिमन्त्राणां बीजानि स्वस्वभावतः

ऊष्माक्षराणि बीजानि व्योमाद्यान्यथवा स्वतः

दीर्घयुक्तानि तान्येव शान्त्यातीनामनुक्रमात्

क्रोधस्य नरसिंहस्य त्रयाणान्द्वादशार्णवम्

मन्त्रोधारं च बीजानि श्रं क्षौन्तत्सदस्यर्षि

छन्दो देव्यादिगायत्री स्वयञ्च मुनिदेवते

नारायणस्य मूर्तीनाम्मुनिर्ब्रह्मा क्रमाद्विदुः

विभक्तनामवर्णान्तस्थिरबीजार्णमुत्तमम्

दीर्घैर्ह्रस्वैश्च संभिन्नमङ्गोपाङ्गां स्वरैः क्रमात्

व्यञ्जनानां क्रमोह्येष हृदयादि प्रनप्तये

स्वरबीजेषु नामार्णविभक्तान्यङ्गनामभिः

युक्तानि हृदयादीनि द्वादशान्तानि पञ्चकम्

आरभ्य कल्पयित्वा तु जपेत्सिद्ध्यरूपतः

प्रणवं हृदयं प्रोक्तन्नमशब्दन्तथाशिरः

शिखा हि भगवन् शब्दन्नामवर्मास्त्रमुत्तमम्

समस्तं हृदयन्तारनमस्कारन्तथा शिरः

परायेति शिखा ज्ञेया नाम्ना तु कवचं भवेत्

नामान्तेन समस्तेन कार्यमस्त्रं परात्मना

हृदयञ्च शिरश्चैव शिखा कवचमेव हि

अस्त्रन्नेत्रमथांगानि षड्गुणै कथितानि तु

उदरञ्च तथापृष्ठं बाहू ऊरू च जानुनी

पादयुग्ममुपाङ्गानि विकाराणि गुणात्मना

नमस्वाहावषढुञ्च फट् वौषडिति जातयः

उपाङ्गानि नमोन्तानि सर्वाणि सनतीति वा

हृदयं कुन्दसङ्काशं शिरो भिन्नाञ्जनत्विषम्

शिखा तु पिङ्गला ज्ञेया कवचं हेमसन्निभम्

विद्युताकारमस्त्रं स्यान्नेत्रं ज्वलनसन्निभम्

तेजो वीर्यं बलं शक्तिरैश्वर्यं ज्ञानमेव च

दृगस्त्रं कवचं शिखाशिरोहृत् षड्यथाक्रमम्

बीजाबीजसबीजानां मन्त्राणान्ध्यानमुक्तम्

तत्फलन्तत्स्वरूपञ्च प्रवक्ष्ये मन्त्रजापिनम्

पिण्डानां वृद्धमन्त्राणाम्मालाख्यानान्तु मूलवत्

परं सूक्ष्मन्ततस्थूलं त्रिविधं ध्यानमुत्तमम्

कालमायादिनिर्मुक्तं चिन्तया रहितन्तु यत्

एतत्तत्परमं ब्रह्म शुद्धमीशं परात्परम्
हृद्पुण्डरीकनिलयं ज्योतिरूपं चिदात्मकम्
समस्तबुद्धिवृत्यूर्मिसाक्षीभूतमसंगिनम्
आख्यातं लैङ्गिकं सूक्ष्मं स्थूलं वैराजमिष्यते
षाड्गुण्यविग्रहन्देवं भास्वज्वलनतेजसम्
सोहमात्मेति तन्ध्यायेत् स्थूलं वै भूषणास्त्रचम्
हृद्पुण्डरीकनिलयञ्चैतन्यं ज्योतिरव्ययम्
बीजं बीजात्मकन्ध्यायेत् कदंबकुसुमाकृतिम्
कुंभान्तरगतो दीपोऽनिरुद्धप्रसरो यथा
संहृतः केवलस्तिष्ठेदेवं मन्त्रेश्वरो हृदि
अनेकसुषिरे कुंभे तावन्मात्रा गतस्तयाः
प्रसरन्ति बहिस्तद्वन्नाडीभिर्बीजरश्मयः
अर्थावभासिनो दैवीयात्मीकृत्य तनुस्थिताम्
एवं स बीजमस्त्राणान्ध्यानमुक्तं हि विष्णुना
एकद्वित्रिभिरेवार्णैर्बीजन्तारन्नमोन्वितम्
मन्त्रं वर्णपदैर्युक्तञ्चात्यन्तन्तारदीपितम्
स्वरस्पृक्व्यापकार्णानां संयोगात् कूटमिष्यते
द्विद्वित्राद्यैर्द्विषड्कान्तैर्वर्णैः पिण्डमुदाहृतम्
ताराद्यं बीजमन्त्रं स्यात् बीजाद्यं तत्पुटीकृतम्
चतुष्पादन्त्रिपादं वा मन्त्रं वैदिकमुत्तमम्

चतुष्पादसमायुक्ता संबुद्धि पद लक्षणम्

नत्यादीनामथेकेन दीपितं वृद्धिसंज्ञकम्

जातिनामपदैर्बीजैः प्रार्थना स्तुतिहेतिभिः

मालामन्त्रं समुद्दिष्टं स्तोत्रं बीजैर्बहिष्कृतम्

दीक्षां प्राप्य गुरोसम्यग्दत्वा शक्त्या च दक्षिणाम्

अनुशिष्टो जपेन्मन्त्रं वर्णलक्षञ्जितेन्द्रियः

तिलांस्तावत्सहस्रन्तु जुहुयाद्वैष्णवेऽनले

उत्तमं मानसं जापमुपांश्वाख्यन्तु मद्ध्यमम्

अधमं वाचिकं प्रोक्तन्त्रिवर्गफलदन्त्रयम्

इहेहामुत्रचामुत्र सिद्धिदं त्रिफलं विदुः

यदुच्चनीचस्वरितैः शब्दैस्पष्टपदाक्षरैः

मन्त्रमुच्चारयेद्वाचा वाचिकन्तदुदाहृतम्

जिह्वामात्रपरिस्पन्दमीषदुच्चरितं शनैः

अपरैरश्रुतं किञ्चित् ध्यात्वा सकळनिष्कळम्

देवमेवमुपांश्वाख्यम्मानसं प्रवदामि ते

धिया यदक्षरश्रेण्यां वर्णावर्णं पदात्पदम्

योजयेत् पारमानन्दे ध्यानातीते निरञ्जने

लक्षेण वृद्धमन्त्रन्तु मालाख्यमयुतेन च

स्तोत्रं सहस्रजापेन साधयेन्नियतेन्द्रियः

विष्णुबीजं यत्प्रोक्तं पिण्डमस्याद्य[१४५] कीर्तितम्
चक्रं शंखधरं शुक्रं वासुदेवं विचिन्तयेत्
तदेवञ्जीवशेषाभ्यां गदाचक्रधरं परम्
तद्वह्निजीवबिन्द्वाढ्यञ्चक्रविद्याधरं परम्
तदैवामृतमद्ध्यस्थं षोडशेन स्वरेण तु
शंखपद्मधरं पिण्डचतुष्कं परिकीर्तितम्
प्राणजीवौ समायोज्य तेन दीर्घस्वरवता
नेत्रान्तानि षडङ्गानि चतुर्णां परिकल्पयेत्
प्राणजीवौ त्रिधा कृत्वा ब्रह्मसिंहाजकौ तथा
तदधो वायुवृत्रारि जलेशगतिरक्षरान्[१४६]
पौनः पुन्येन संयोज्य द्वादशेषु पृथक् क्रमात्
ऊकारं केशवादीनां बीजानि कथितानि ते
शंखचक्राब्जविद्यातिसुसितं केशवं स्मरेत्
धृतपद्मगदाचक्रशंखन्नारायणं सितम्
गदाशंखारिपद्माढ्यं माधवं शशिसन्निभम्
गदापद्मारिशंखाढ्यं गोविन्दं रक्तरोचिषम्
शंखपद्मगदाचक्रन्धृतं विष्णुं हिरणमयम्
शंखपद्मारिविद्याढ्यं रक्तन्तु मधुसूदनम्
विद्यारिपद्मशंखाढ्यं पीतवर्णन्त्रिविक्रमम्

[145] PL पिण्डमास्यद्य
[146] PL जलेशगतिराक्षरात्

चक्रविद्याध्वनीपद्मं पीताभं वामनं स्मरेत्

अरिविद्याब्जशंखाढ्यं श्रीधरं सूर्यवर्चसम्

चक्राब्जविद्याशंखाढ्यं हृषीकेशं सितेतरम्

अरिशंखाब्जविद्याढ्यं[१४७] पद्मनाभन्तथा सितम्

शंखविद्याब्जचक्राढ्यं कृष्णं दामोदरं स्मरेत्

दक्षिणोत्तरतत्पूर्वं दक्षिणोज्वलबाहुभिः

चतुर्भिर्विधृतास्सर्वे चतुष्कं हेतिमण्डलम्

किरीटहारकेयूरवलयोदरबन्धनैः

स्त्रग्गन्धवसनब्रह्मसूत्रश्रीवत्सकौस्तुभैः

कारणोदितचिह्नैश्च शोभितास्सर्वकामदाः

साधयित्वा सदाचार्यः पूजयेत् परमं पदम्

इहोदितैर्महामन्त्रैर्ल्लक्षणैरभिलक्षितैः

कुर्याद्विधानतस्नानं सूक्तेन पुरुषात्मना

सप्तभिर्विरजार्मन्त्रैर्देहमाप्लाव्य वारिणा

उपस्थानविधौ सूक्तञ्जपेत् नारायणात्मकम्

अतोदेवेदिसूक्तन्तु जपेत्स्वाध्यायकर्मणि

मूलादियागमन्त्रैस्तु देवन्ध्यात्वा प्रतर्प्य च

ऋषीन् पितृगणांश्चैव सर्वशः[१४८] परिकल्पयेत्

तीर्थ... सन्निर्गच्छेद्यागस्थानं हरिं स्मरेत्

---

[147] PL परिशंखविद्याढ्यं

[148] PL सवेश

मृत्तोयैर्क्षाळयेत्पादौ हस्तौ पात्रेण वारिणा
त्रिपिबेत् ब्रह्मतीर्थेन द्विरुन्मृज्य मुखं पुनः
वामहस्तञ्चपादेन प्रोक्ष्याङ्गानि पुनस्पृशेत्
वेदास्त्रयस्त्रिभिः पानैः पितरस्सपितामहाः
क्रमशस्तृप्तिमायान्ति तथैव प्रपितामहः
मार्जने प्रथमे[149] ब्रह्मा द्वितीये दक्ष एव च
तत्राथर्वेतिसाहश्च तृप्तिमायान्ति संस्मृताः
चक्षुषोः स्पृष्टयोस्तृप्तिं चन्द्रादित्यौ प्रयास्यतः
अङ्गुष्ठेनामिकां कृत्वा तर्जनीं पवनो नसोः
कनिष्ठां कर्णयोर्दस्रौ बाह्वोरङ्गुष्ठकेन च
शक्रशैलाश्च तृप्यन्ति नाभौ विष्णुश्च मद्ध्यया
महाविष्णुः सदाविष्णुश्चतुर्भिर्हृदि केऽखिलैः
एतदाचमनं प्रोक्तमापोहिष्ठादिभिः त्रिभिः
त्रिपिबेत् कुशपाणि सन् पच्छोर्द्ध्वच्चोनवानतः
आनाभिकण्ठमूर्द्धान्तं सुकुशैः प्रोक्षयेज्जलैः
द्वारपालावथाभ्यर्च्य प्रविशेद्यागमन्दिरम्
ताळत्रयञ्चदिग्बन्धं कृत्वा रक्षां विधाय च
जान्वोर्वोरन्तरे कृत्वा सम्यक्पादतले उभे
ऋजुकायस्सुखासीनः प्राङ्मुखो वाप्युदङ्मुखः

[149] PL प्रमथे

नत्वा विघ्नं गुरुं विष्णुं भूयो देहं विशोधयेत्
यं बीजन्नाभिमध्यस्थं धूम्रञ्चण्डानिलात्मकम्
विश्लेषयेदशेषं तु ध्यायेत् कायात्तु कल्मषम्
क्षौ हृत्पङ्कजमध्यस्थं ध्यायेत्तेजोन्निधिं हरेः
अधोर्ध्वतिर्यग्गाभिश्च ज्वालाभिः कल्मषन्दहन्
शशाङ्काकृतिवद्ध्यायेदंबरस्थं सुधांम्बुभिः
हृद्पद्मव्यापिभिर्देहं स्वकमाह्लादयेत् बुधः
एवं द्वादशमात्राभिः रेचकं क्रियते यदा
पूरको द्विगुणाभिस्यात्रिगुणाभिस्तु कुंभकम्
करयोर्विन्ययेत्तारं व्यापयन्तेजसान्निधिः
स्वराणि पर्वसंस्थानि विन्दुसर्गौ तलद्वये
कादीनि करशाखासु षादीनि सकलासु च
आदित्यातपवद्देहे व्यापकं प्रणवन्यसेत्
अकारं मूर्ध्नि विन्यस्य व्यापकं वदने परम्
दृक्च्छोत्रनासाताल्वोष्ठदन्तमूर्धसु वाक्पथे
दोःपत्सन्ध्यग्रपार्श्वेषु पृष्ठनाभ्युदरेषु च
यकारं हृदये रेफं कक्षयोश्चापरे गळे
दोर्मूले वं परं पायौ वृषणे स हि पादयोः
भुजयोर्हं परं लिङ्गे क्षकारं मूर्ध्नि विन्यसेत्
ताराद्यैस्सकलैरेवं भूयो देवं हरिं स्मरन्

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च
इन्धिका दीपिका चैव रेचिका मोचिका परा
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी यथा
व्यापिनी व्योमरूपा च अनन्ता नादसंभवा
सृष्टिरृद्धिस्मृतिर्मेधा कान्तिल्लक्ष्मीद्युतिस्थिरा
स्थितिसिद्धिरकारोत्थाः कला दश समीरिताः
जरा च पालिनीशान्तिरैश्वरी रतिकामिके
वरदा ह्लादिनीप्रीतिर्दीर्घाचोकारजाः कलाः
तीक्ष्णारौद्राभयानिद्रा तन्द्रीक्षुत्क्रोधनी क्रिया
उत्कारी चैव मृत्युश्च मकाराक्षरजाः कलाः
बिन्दोरपि चतस्त्रस्युः पीताश्वेतारुणा सिताः
एवं कलाः प्रविन्यस्य तत्वन्यासं पुरोदितम्
अङ्गानि करशाखासु शस्त्रं हस्ततलद्वये
व्याहृतीर्हृदयादीनि मुनिवृन्दोधिदैवतम्
मुद्रासन्दर्श्य मन्त्रात्मा जपेत्साष्टोत्तरं शतम्
कजं वा तैजसं पात्रं क्षाळयित्वास्त्रवाारिणा
गन्धपुष्पाक्षतांभोभिः पूरयेन्मूलविद्यया
(तेजः पुञ्जलमात्रन्ध्यात्वाष्टौ प्रणवञ्जपेत्)
आत्मानं मण्डलं तेन प्रोक्षयेत्साधनानि च
हृद्यंसयोर्ललाटे च ध्यात्वा मूर्तिचतुष्टयम्

गन्धपुष्पैस्समभ्यर्च्य ब्रह्मलिङ्गानि कल्पयेत्

अन्तर्यागं पुराकृत्वा बहिराहूय तं यजेत्

चतुश्चक्रेण च द्वारे देहे देवगृहे पुरा

कण्ठकूपधरारूढं हृद्पद्मं यदधोमुखम्

तत्कर्णिकावनेर्मध्ये रूढमूर्धमुखं तु यत्

शब्दव्यक्तिस्तदूर्धे तु स्थितार्केन्द्वग्निलक्षणा

त्रिदीप्तभासुरानाडीह्यव्यक्तध्वनिविग्रहा

व्यक्तचक्रत्रयोस्योर्द्धे वर्तते या महामते

निःसृता ब्रह्मरन्ध्रेण गतासूर्यपथा परम्

वायुद्वारेण पाताळं भित्वा या स्वगोचरम्

सङ्कल्पविषयसर्वस्तद्बन्धः प्रतितिष्ठति

सूत्रे मणिगणो यद्वन्मध्यनाडी व्यवस्थिता

लक्षस्थाने तु पूर्वोक्ते तस्यामभ्यन्तरे तु वै

संपुटे शशिसूर्याख्ये निमेषोन्मेषलक्षणे

तत्राब्जचान्द्रमालंब्य परावाग्भ्रमरीस्थिता

यास्सर्वमन्त्रजननी शक्तिश्शान्तात्मनो विभोः

नदन्ती वर्णजन्नादं शब्दब्रह्मेति यं स्मृतः

अकारपूर्वो हान्तञ्च धारासन्तानरूपधृक्

नादावसानगगने देवोऽनन्तस्सनातनः

शान्तं संवित्स्वरूपस्तु भक्तानुग्रहकाम्यया

अनौपमन्येन वपुषा ह्यमूर्तौ मूर्ततां गतः

विश्वमाप्याय यत्कान्त्या पूर्णेन्दुयुततुल्यया

वरदाभयगदेनैव शंखचक्राङ्गितेन च

त्रैलोक्योद्धृतिलक्ष्येण युक्तपाणिद्वयेन तु

रश्मिभिर्भास्करोयद्वत्स्समुद्र इव चोर्मिभिः

स्वमूर्तीभिरमूर्ताभिरच्युताद्याभिरच्युतः

दीप्तिमद्भिरमूर्तेस्तु सुधाकल्लोलसङ्कुलैः

आर्ण आभीरणैर्सर्वे निर्विकाराङ्घ्रि विग्रहः

ततोर्काब्जखमध्यान्तु ऊर्ध्वस्थां संस्मरेच्च ताम्

गङ्गां भगवतो मूर्ध्नि तेनामृतजलेन तु

अर्घ्याद्यखिलभोगानां कार्या वै शुभकल्पनाः

तैः क्रमात्पूजयेद्देवमाद्यन्तुर्यपदे स्थितम्

प्रणवद्वितयं चोक्त्वा प्रीयताम्मे परप्रभुः

अथ कर्मात्मतत्वे तु कृतकृत्ये तदाच्युतः

अस्त्रे विलाप्य स्वं रूपं नित्यं व्यक्तीकृतन्तु यत्

(इष्ट्वैवं सर्वयागेषु स्थण्डिले मण्डले

नवाप्यथवार्चायां गन्धाद्यैः परिपूजयेत्)

(धर्माधर्मादिपादेषु अनन्तमयमासनम्)

त्रिगुणाकलितं माया विद्या सितसितास्तरम्

तस्योपरि सितं पद्मं प्रणवेन नियोजयेत्

तदंशैस्सूर्यसोमाग्निमण्डलात्मत्रयं पुनः

उपर्युपरि संकल्प्य पत्रकेसरकर्णिकाः

शक्तयः केसरेष्विज्याः कर्णिकायामनुग्रहः

विमलोत्कर्षिणी ज्ञाना क्रिया योगेति शक्तयः

प्रह्वी सत्या तथैशा चानुग्रहा नवमी स्मृताः

जलगन्धाक्षतांभोभि पुष्पादि्भर्धूपदीपकैः

प्रणवादि नमोन्तैश्च नामभिः पूजयेदिति

क्षाळिते तैजसे पात्रे गन्धपुष्पाक्षतोदके

प्रणवेन स्मरेद्विष्णुमव्यक्तस्योपरिस्थितम्

अमूर्तन्तु ततो ध्यात्वा सर्वतेजोमयं विभुम्

कर्णिकोपरि सञ्चिन्त्य निरोध्य सकळीकृतम्

पूजयेत्साङ्गमव्यग्रो भक्त्यार्घ्यादिभिरच्युतम्

तत्सर्वं प्रणवेनैव दातव्यं प्रणवार्चने

दिग्विदिक्षु पुरोऽङ्गानि मूर्तीश्शक्तीस्तथा बहिः

लोकेशांश्च तदस्त्राणि विष्वक्सेनन्तु शांकरे

एवं संपूरयेत्तारमेवं बीजं हि वैष्णवम्

पूर्ववद्विन्यसेत्तारं व्यापकं करदेहयोः

अङ्गुष्ठादिकनिष्ठान्तन्न्यसेत्पञ्चाक्षराण्यपि

के वक्त्रे हृदि गुह्ये च पादयो हृदयादिषु

अङ्गानि समुनिच्छन्दो दैवतन्तत् विचिन्तयेत्

पीठमिष्ट्वोपचारेण नमोन्तेन तमाह्वयेत्

कर्णिकायान्तु संस्थाप्य स्वेषु स्थानेषु चापरम्

पूर्वेण हृदयन्यस्य दक्षिणेन शिरस्तथा

पश्चिमेनशिखान्यस्य कवचञ्चान्तरेण तु

आग्नेयादिषु कोणोषु च ततः शाङ्र्गखेटखड्गशरान् न्यसेत्[१५०]

स्वासुदिक्षु च लोकेशास्तेषामस्त्राणि तत्बहिः

अग्रतो वैनतेयन्तु त्रितीयावरणाद्बहिः

विष्वक्सेनन्त्वथैशान्ये द्वितीयावरणाद्बहिः

सर्वेषामपि चैतेषां प्रत्येकं पद्ममासनम्

नामभिः कल्पयेद्विद्वानर्घ्यं देवाय भक्तितः

पाद्यमाचमनीयञ्च स्नानमालेपनं तथा

वस्त्रालङ्कारपुष्पाणि धूपदीपनिवेद्यकम्

तत्सर्वं विष्णुगायत्र्या दातव्यन्तु यथाक्रमम्

दत्वा देवाय भूषान्तं स्नानाद्यङ्गेषु कल्पयेत्

गायत्र्या च ददेत् पुष्पमन्येभ्यश्च स्वनामभिः

व्यस्तेन मूलमन्त्रेण समस्तेन च तैस्सह

परतत्वेन चाप्यन्ते यागोयमिति तस्य तु

---

150 पश्चिमेन शिखां चैव कवचं चोत्तरेण तु
आग्नेयादिषु कोणेषु पूजयेदस्त्रमुत्तमम्
वासुदेवादिकान् न्यस्य दिक्षु शक्तीश्च कोणतः
तद्बहिः शंखचक्राब्जगदा दिक्षुविनिवेशयेत्
कोणेषु च ततः शाङ्र्गखेटखड्गशरान् न्यसेत् (विष्णुसंहिता ६:४९-५१)

चतुर्विधन्निवेद्यान्नमन्येषां वा स्वशक्तितः

अष्टाविंशतिसंख्यं वा शतमष्टोत्तरे चरुम्

सहस्रमयुतं वापि मूर्त्यङ्गैस्तद्दशांशतः

अन्ये स्सकृत्स्सकृद्धुत्वा बलिपीठे बलिं हरेत्

आचम्य सकळीकृत्य जप्त्वा स्तुत्वा प्रणम्य च

अर्घ्यं दत्वा क्षमस्वेति संहृत्य हृदि योजयेत्

विष्णुयागमितिप्रोक्तमेवमष्टाक्षरेण वा

त्रिदीप्तिभासुरन्तात विन्यसेत् करदेहयोः

धराणि सप्तलोकानि क्षेत्राण्यात्माख्यमष्टमम्

शुक्लं हिरण्मयं कृष्णं रक्तं कुंकुमसन्निभम्

पद्मकिञ्चल्कसदृशं कृष्णं सकलसन्निभम्

अग्निर्भूमिस्तथावायुराकाशमपि भास्करः

द्यौश्चद्रमाश्च तत्वाग्नि नक्षत्राणि यथाक्रमम्

गौतमश्च भरद्वाजो विश्वामित्र क्रमेण च

जामदग्निर्वसिष्ठश्च काश्यपोऽत्रिरगस्त्यकः

गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिरेव च

तृष्टुप्जगतीभूयः ककुप्छन्दांसिरेव च

धरा ध्रुवश्च सोमश्च आपश्चैवानलानिलः

प्रत्यूषश्च प्रभातश्च वसवो वर्णदेवताः

अथ क्रुद्धमहावीरद्युस्सहस्रपदादिकैः

उल्कैस्सद्विठनामान्तजातिभिर्वाङ्गपञ्चकम्
विन्यसेद्भृतये ज्ञानं यतोव्रज्येत तत्र तत्
ऐश्वर्यं शिरसोद्देशे तस्मादुपरि तिष्ठति
प्रकृतं..... वि सर्वत्र परमार्त्थतः
हार्द्दाग्नेरूर्ध्वगायान्तु शिखायां शक्तिमग्रतः
बलञ्चाखिलगात्राणान्त्वग्गतं वायुना सह
ऊर्जितासर्वगात्रैर्यत्तद्वीर्यं हस्तयोर्न्यसेत्
अन्तर्बोधस्वरूपं तत् प्राकृतध्वस्तशान्तिकृत्
तेजसस्तैजसे स्थाने न्यासकाले समन्यसेत्
न्यस्यैवमभिमानन्तु मन्त्राख्यमवलब्य च
मनस्युपरतं कुर्यादक्षग्रामं बहिस्थितम्
चित्तम्बुद्धौ विनिक्षिप्य तां बुद्धिं ज्ञानगोचरे
ज्ञानभावनया कर्म कुर्याद्वै पारमार्थिकम्
न्यसेदष्टाक्षरं पूर्वं व्यापकं करदेहयोः
अङ्गुष्ठद्वितये तारन्तर्जन्यादि तदन्तकम्
दक्षिणादि कराग्रेषु वर्णान्यङ्गान्यपि क्रमात्
हस्तयोरुभयोस्तद्वत् पञ्चाङ्गान्यङ्गुलीषु च
ओंकारं मूर्ध्नि नाद्यन्तु ललाटे नेत्रकर्णयोः
मोकारनासिकायान्तु विन्यसेन्मुखकण्ठयोः
नाकारं भुजयोः पृष्ठे हृदि वक्षसि राक्षरम्

नाभौ तु पार्श्वयोर्यान्तं कट्यां वै बीजमन्त्रयोः

णकारं बीजं मद्ध्योरूनळकेषु समीरणम्

पादयोस्तलयोर्मद्ध्ये प्रणवं सर्वगात्रिकम्

कदृग्वदनहृत्कुक्षिगुह्योरुचरणेषु च

वर्णान्यस्य तदङ्गानि पञ्चाङ्गानि तथा तनौ

आहूय सकलीकृत्य मुद्रास्सन्दर्श्य पूजयेत्

देवमूर्तौ यजेद्वर्णान् पञ्चाङ्गानि हृदादिषु

अष्टाङ्गान्यष्टपत्रेषु पूर्ववद्वा कजादिकम्

चक्रं शंखं गदापद्मं कौस्तुभं मुसलं क्रमात्

खड्गं च वनमालां च तं बहिस्तु मुखादितः

ध्वजञ्च वैनतेयाख्यमग्रेनन्तं च पृष्ठतः

शंखपुष्पनिधी तस्य दक्षिणोत्तरपार्श्वयोः

विघ्नार्यकौ पुनर्दुर्गा विष्वक्सेनं च कोणतः

पद्मस्था स्सायुधा ध्येया स्वासु दिक्षु सुरेश्वराः

विधानमपरं वक्ष्ये दळेष्वंगानि पूर्ववत्

वैनतेयमनन्तञ्च श्रीदेवीं पुष्टिरव्ययाः

अग्रे पृष्ठे च देवस्य दक्षिणोत्तरपार्श्वयोः

चक्रं पद्मं गदां शंखं कोणेष्वेवन्ततस्सुरान्

मूर्तीभिश्शक्तीभिस्साकमष्टमूर्तिभिरेव वा

अमा द्वादशभिर्देवमिच्छान्तः परिपूजयेत्

एवमष्टाक्षरस्योक्तं वक्ष्येहं द्वादशात्मनः
पाणौ देहे न्यसेत्तारन्द्वादशाक्षरमेव च
न्यसेद्वर्णानि चाङ्गानि स्वाङ्गुलीषु तलद्वये
शिरोललाटदृग्वक्त्रगळहृज्जठरान्धुषु
सोरुजान्वंघ्रिपादेषु द्वादशार्णान् स्वमूर्तिभिः
हृदयञ्च शिरश्चैव शिखा वर्मास्त्रलोचने
उदरञ्च तथा पृष्ठबाहु ऊरू च जानुनी
पादयुग्ममथांगानि विन्यसेदर्च्चयेत् परम्
वासुदेवञ्जितन्तेन कर्णिकायान्नियोजयेत्
आगच्छावाहने योज्यं क्षमस्वेति विसर्जने
मन्त्रमागच्छमानन्तु निर्गच्छन्तु स्वकात्पदात्
तमागतमिवाकाशात्तारकं कर्णिकान्तरे
भावयेदथ तन्मद्ध्यादाराध्य मुदितं हरिम्
मूलेन सकळीकृत्य मुद्राभिस्सन्निधाप्य तम्
अर्घ्यादीन् सम्यगापाद्य जितन्तेनार्चयेत् च तैः
भूतये वासुदेवाय दत्वार्घ्यादिचतुष्टयम्
तावत्स्नानादिभूषान्तमूर्त्यङ्गेषु तदादिकम्
तावत्गन्धादिदीपान्तं समस्तेभ्यस्तदादिकम्
निवेद्यान्नन्निरासञ्च तांबूलञ्चार्घ्यमेव च
उपचारेण दातव्यमन्येभ्यश्च स्वनामभिः

सूक्तस्य वा क्रमादृग्भिरर्घ्याद्यं यद्विरष्टकम्
पूर्वादिक्रमयोगेन दळेष्वङ्गानि पूजयेत्
द्वारि पूर्वे मण्डलस्य वैनतेयस्तथापरे
सुदर्शनं कौमोदकीन्दक्षिणोत्तरयोः क्रमात्
पाञ्चजन्यञ्च कोणेषु श्रीशाङ्र्गं प्रयजेत् भृशे
पर्जन्ये चेषुधीयुग्मन्नन्दकञ्चादितिस्थितम्
खेटकं वितथे मुख्ये श्रियं पुष्टिञ्च भृन्ङ्गगाम्
देवाग्रे वनमालाञ्च पुनश्रीवत्सकौस्तुभौ
सुग्रीवशोषयोर्युक्तास्थापिते परिकल्पयेत्
स्वासु दिक्षु च लोकेशांस्तदस्त्राणि च तद्बहिः
द्वादशाक्षरमन्त्रस्य विधानं परिकीर्तितम्
एवमष्टाक्षरेणापि विभक्तांशेन पूजयेत्
सर्वासामेवमूर्तीनां विधिस्साधारणस्मृतः
त्रिधोदितानां मूर्तीनां विशेषेण च सम्मितम्
एकादशदळे पद्मे प्रद्युम्नः परिकीर्तितः
सिंहसूकरयोर्पक्षमाद्यवद्रक्तकृष्णयोः
अन्यासामष्टपत्रन्तु व्यूहयागमथोच्यते
नवाब्जमण्डलं शुभ्रमालिख्योज्वलकर्णिकम्
तत्र संपूजयेद्विष्णुं नवधा तारदीधितिम्
विभज्य सप्तधा क्षेत्रञ्चतुर्दशकरं समम्

द्विधाकृते शतं ह्यत्र षण्णवत्यधिकानि तु

कोष्ठकानि चतुर्भिस्तैर्मध्ये पद्मं समालिखेत्

परितो विमृजेद्वीत्थ्योस्तथादिक्षु समालिखेत्

मण्डलानि पुनश्चाष्ट परितः परिमार्जयेत्

द्वे द्वे मध्यमकोष्ठे तु त्रिपातन्दिक्षु लोपयेत्

चत्वारि बाह्यकं पश्चात्रीणि त्रीणि तु लोपयेत्

मण्डलं नवभागन्तु प्रोक्तं पूर्वोक्तवर्त्मना

व्यापकं चादिपुरुषमङ्गुष्ठद्वितये न्यसेत्

तर्जन्यादिक्रमाच्छेषं यावद्वामप्रदेशिनी

मूर्त्यष्टकन्तु सञ्चिन्त्य व्यापीह्याद्यास्तु पूर्ववत्

कदृग्वदनहृत्कुक्षिगुह्योरुचरणेषु च

न्यस्याद्यं पूजयेन्मध्ये स्वांशैर्मूर्त्यष्टकान्वितम्

वैनतेयादि शूलान्तं पूर्वे चानिरुद्धकम्

वासुदेवन्दळे पूर्वे पुनस्सङ्कर्षणादिकम्

सङ्कर्षमथाग्नेय्यां वासुदेवं तु तद्दळे

प्रद्युम्नन्दक्षिणेब्जे तु वासुदेवन्तु तद्दळे

नारायणन्तु नैरृत्यां ब्रह्माणं पश्चिमेदळे

विष्णुसौम्ये नृसिंहन्तु वाराहं शिवपङ्कजे

यत्तत्वं पूजयेन्मध्ये तत्स्थाने सन्निवेशयेत्

वासुदेवं तथायागं सर्वसामादिमूर्तिपः

वासुदेवादिमूर्तीनामेकस्मिन् पङ्कजे क्रमात्

यजनं संप्रवक्ष्यामि समासात्सुरपूजितम्

(तं वक्ष्ये परमानन्दं पङ्कजामखिलार्थसिद्धिदंनृणा

विभजत्र्यंशं भागैश्चतुरत्यधिकैश्चतुष्करम्)

क्षेत्रमध्ये पंक्तिचतुष्कैः भागार्धगकै समुल्लिखेत् कमलं त्रिभिरथभागान्वेदैर्गात्राण्येकैकशःक्रमात् सन्धिं पङ्क्त्या पीठमित्थं पङ्क्तिभ्यां वीथिकां विचित्रतरां पीठं परितो बाह्ये दिक्ष्वष्टासु क्रमेण षड्द्वितयैः परितो नेमिन्द्विविधा तत् पार्श्वे तत्र पङ्क्तिभ्यां पीतसितारुणवर्णैः सञ्छाद्याष्टौ समुल्लिखद्दीपान् तदण्डं षड्पदनिहितं मूलञ्चाग्रं क्रमेण भूतांशैः तेषां पार्श्वे द्वितये षोडशशस्त्राणि षड्पदैः कुर्यात् (रक्तोनापि) च दीपाज्यामेन च भूषयेच्च शास्त्राणि षड्चत्वारि विलुम्पेत् बहिरन्तर्द्वारसिद्धये दिक्षु द्वादशाभ्याञ्चतुर्भिः परिकल्प्य शोभान्द्वारञ्च तावद्भिरथोपभोगां तावद्भिरेकादश कोष्ठकैश्च कोणान्सुवर्णैः परिभूषयेच्च ।

आधारशक्तिक्रमञ्च क्षीरोदं पूजयेदधः

धर्मादिशक्तिपर्यन्तमिष्ट्वा बाह्याद्यमर्चयेत्

केसरेष्वस्य चाङ्गानि मूर्तीरष्टदळेषु च

अनिरुद्धादि तत्वानि पीठेष्वपि च मूर्तिभिः

पूर्ववत् पूर्वं शेषं वैनतेयादिकं गणम्

वासुदेवं यजेन्मध्ये केसरेष्वङ्गमस्य तु

केशवाद्यन्दळेष्वग्रे श्रियाद्यन्दिग्विदिक्रमात्

चतुष्कं वासुदेवाद्यं श्रियाद्यं पीठमध्यमम्

पूर्ववद्वैनतेयाद्यं विधायाङ्गमुदाहृतम्

श्रियाद्यन्दळमध्यस्थं लक्ष्म्याद्यन्तु तदग्रकम्

केशवाद्यं विना प्रोक्तं पूर्ववद्यजनं परम्

लक्ष्मीपुष्टिर्दयानिद्राक्षमाकान्तिस्सरस्वती

धृतिर्मैत्रीरतिस्तुष्टिमतिर्द्वादशमी स्मृता

कन्दनाळाम्बुजस्थन्तु त्रयं सर्वेश्वरादिकम्

श्रियाद्यं केसरगतं कूर्माद्यन्दळमध्यकम्

(एकशिगादिषड्वन्तं पात्राग्रस्थन्तन्तुपूर्ववत्)

वासुदेवादिरत्यन्तन्दीपशास्त्रगतं क्रमात्

(श्रियादिशक्तिसघन्तु मध्यन्तन्तु त्रिरष्टकम्)

एवन्तु वैनतेयाद्यं परमानन्दपङ्कजे

चतुष्टयफलप्राप्त्यै यागमुक्तञ्जगत्पतेः

ततोब्जनाभभवने तेषां नामानि वक्ष्यते

तदप्यविदिदं लोकैर्भुक्तिमुक्तिफलप्रदम्

धातार्यमा च मित्रश्च वरुणोंशुभगस्तथा

इन्द्रो विवस्वान् पूषा च पर्जन्य त्वष्टृविष्णवः

एते च द्वादशादित्याः केशवादिषु संस्थिताः

ओं ह्यूं केशवाय धात्रे नमः क्षं दामोदराय विष्णवे नमः

अंगमूर्तिपरिवारभूषणानान्निवेशने

भेदो वा वासुदेवास्तु मूर्तीनामिह विद्यते
अनेन विधिना यस्तु क्रमात्संपूजयेद्धरिम्
सधन्यस्सर्वलोकेषु सोपवर्गोन्मुखं पुमान्
शुद्धस्फटिकसङ्काशं वासुदेवं चतुर्भुजम्
तथा सङ्कर्षणं ध्यायेत् जातरूपसमप्रभम्
दूर्वामरतकप्रख्यं प्रद्युम्नन्तु तथा स्मरेत्
नीलाम्बुदप्रतीकाशमनिरुद्धञ्जगत्पतिम्
सहस्रादित्यसंङ्काशं देवन्नारायणं विभुम्
पीतवर्णञ्च चतुर्वक्त्रमजविष्णुं घनत्विषम्
नृहरिं कुन्दसङ्काशं वराहमतसीनिभम्
चतुष्कं वासुदेवाद्यन्तद्वत्रिकचतुष्टयम्
चतुष्कमपि शक्तीनां मूर्तिमत् षड्द्वयं तथा
वरदाभयहस्तास्युर्द्विभुजाश्चाङ्गदेवताः
पद्मासनगतो मूर्ध्नि कुर्यादञ्जलिबन्धनम्
मुद्रा ब्रह्माञ्जलिर्न्नाम देवसान्निध्यकारिणी
वन्दनी हृदि साबद्धकिञ्चिद्दक्षिणतो नता
ऊर्ध्वाङ्गुष्ठो वाममुष्टिर्दक्षिणाङ्गुष्ठबन्धनः
सव्यस्य तस्य चाङ्गुष्ठो भवत्यूर्ध्वमुखस्थितः
तिस्रस्साधारणा मुद्रा मूर्तीनारायणस्य च
संम्मुखौ विसृतौ हस्तौ किञ्चिदाकुञ्चिताङ्गुली

अङ्गुष्ठाभ्यां लिखेदन्तर्मुद्रैषावाहनी स्मृता
कृत्वा नताङ्गुली हस्तावूर्ध्वाङ्गुष्ठौ तु चालयेत्
सान्निध्यमुद्रिकाज्ञेया न्यस्तवत्स्थापना भवेत्
उभावन्तर्गताङ्गुष्ठौ मुष्टिं कृत्वा निरोधिनी
वामहस्तेन मुष्टिन्तु कृत्वाङ्गुष्ठं समुच्छ्रितम्
हृदि संयोजयेदेनां गृहीत्वेतरमुष्टिना
योनिमुद्रात्वियं विष्णोश्शक्तीनाञ्च मुदावहा
अनाममध्ययोर्मध्ये निवेश्याङ्गुष्ठमायतम्
दक्षिणस्य तु हस्तस्य मुद्रेयं हृदये स्मृता
निर्वर्त्य मुष्टिमाहन्यादङ्गुष्ठाग्रेण तर्जनीम्
स्थापयेत्तु ललाटान्ते मुद्रेयं शिरसि स्मृता
वर्तयित्वा दृढाम्मुष्टिं कुर्यादङ्गुष्ठमूर्ध्वगम्
स्थापयित्वा शिखामध्ये शिखामुद्रा प्रदर्शिता
संप्रवेश्यान्तरङ्गुष्ठौ वेष्टयित्वा समन्ततः
संहरेत्तत् प्रदेशिन्योमुद्रेयं कवचे स्मृता
अग्रहस्तं परावृत्य बध्वा नाराचमुष्टिवत्
विसृजेत्तिर्यगायम्य मुद्रास्त्रस्येयमीरिता
भ्रूमध्ये स्थापयेत् बध्वा शिखामुद्रामधोमुखीम्
नेत्रमुद्रेयमाख्याता षडेतास्त्वङ्गमुद्रिकाः
मणिबन्धसमौ हस्तावूर्ध्वं शाखाः प्रसारिताः

अन्तः प्रवेशिताङ्गुष्ठौ पद्ममुद्रासने स्मृता
मणिबन्धसमौ हस्तौ तिर्यक् संभ्राम्य चक्रवत्
पर्यायेण प्रयोक्तव्या चक्रमुद्रा महोदया
मुष्टिं कृत्वा तु हस्ताभ्यामङ्गुष्ठौ विनतावुभौ
युक्त्वा संभ्राम्य निर्मुक्ता गदाख्या विघ्ननाशिनी
निर्वत्य दक्षिणाङ्गुष्ठो वामहस्तस्य मुष्टिगम्
कृत्वा चाङ्गुष्ठतर्जन्यौ सक्तेन प्रसृते समे
तिस्रस्तु दक्षिणस्यान्या बध्नीयुर्मुष्टिमूर्ध्वतः
शंखमुद्रेयमाख्याता द्रव्याणां स्थापने परा
धनुषस्तु धनुर्मुष्टि शरमुष्टिश्शरस्य तु
खड्गस्य कोशविश्लेषो मुद्राः खेटस्य मण्डलम्
कृत्वोत्तानावुभौ हस्तौ संपुटाग्रौ प्रसारितौ
कुर्वीत प्रार्थनामुद्रां सान्निध्यादिषु सर्वदा
गुप्तमुद्रागणं यस्तु यथाकालं प्रदर्शयेत्
कामास्य सर्वे सिद्ध्यन्ति प्रीयन्ते चास्य देवताः

इति नारायणात्मके सप्तमः पटलः

नारायणात्मके वैष्णवे
अष्टमः पटलः

अथ विष्णौ शुचौ देशे दीपस्थापनमुच्यते
यत्कृत्वा साधकस्सम्यक् सर्वकामानवाप्नुयात्
द्वयोरनयोः कार्यन्दक्षिणायनमादितः
परिवर्तनतः कृत्वा द्वादशान्ते तथोत्तरे
अयने परिपूज्यार्कन्दीपस्थन्तं समापयेत्
तपस्तपस्यौ मधुमाधवौ च
शुक्रश्शुचिश्चायनमुत्तमा स्यात्
नभोनभस्यौ च इषश्च ऊर्जः
सहस्सहस्याविति दक्षिणं स्यात्
मण्डपं पूर्ववत् कृत्वा ध्वजतोरणसंयुतम्
दिक्पालकलशोपेतं कर्करीकलशान्वितम्
देवाग्रमध्यकुण्डस्थवैष्णवानलदीपितम्
मण्डलद्वितयोपेतञ्चक्राब्जं वाथ भद्रकम्
पूर्वाब्जे पीठमभ्यर्च्य धान्ये पात्रं निधापयेत्
कन्याकर्तितसूत्रेण पलमानेन चांबरम्
कार्पासितं सुसदशं केवलं सूत्रमेव वा
अगरुं कुंकुमं कुष्ठं कर्पूरञ्चन्दनं रजः

निक्षिप्य वर्तीर्निर्वृत्य शरावं घृतमेव च
प्रस्थमर्धं तदर्धं वा प्रस्थपूर्णं समापने
संपाद्य सादयेत्तानि मूलेन प्रणवेन वा
अग्नावग्निमुखं कृत्वा पक्वं गायत्र्या हुनेत्
प्रणवव्याहृतीर्हुत्वा सौरेणाष्टाक्षरेण च
उद्वयन्तमसस्पर्युदुत्यञ्चित्रमनुत्रयम्
व्याहृतिप्रणवं हुत्वा संपाताज्यमथाहरेत्
अभ्युक्ष्य सर्वं गायत्र्या पद्मे धान्यकुशोपरि
न्यस्त्वा शरावं वर्तीञ्च मानस्तोकेदि संमुखम्
इदं विष्णुरितीत्याज्यमुपवर्त्या प्रदीपयेत्
अग्निना रयिमित्यग्रमच्युतायेति संमुखम्
मायामयेति दत्वांहः पुष्पञ्चैव जितादिना
ध्यात्वा तं सकळीकृत्य चार्घ्यं योगेश्वरेति च
दीप्यमानमुपस्थायाप्युदुत्यञ्जातवेदसम्
(आभ्यामथग्भ्यां गणेयं पावके याम्ये
...........सोमं राक्षस गोचरे)
अनन्तं गरुडञ्चाग्रे वेदव्यासं समीरणे
अग्निसौम्ये यजेदीशे विष्वक्सेनन्दळेषु च
वैष्णवास्त्राणि लोकेशास्तदस्त्राणि च तद्बहिः
एवन्दीपान्तमभ्यर्च्य निवेद्य गुळपायसम्

विष्णुन्नारायणं वाथ वासुदेवन्तु कामतः
अर्चयेन्मण्डले शक्त्या केशवादिभिरन्वितम्
चतुर्विधं निवेद्यान्नं पूर्वान्नावत्र होमयेत्
केशवादीननुस्मृत्य वैष्णवान् भोजयेद्विजान्
श्रीसूक्तैः[१५१] केशवाद्यर्के हुत्वाज्यं समिदादिकम्
मूलेनष्टाधिकं हुत्वा शतं होमं समापयेत्
निर्माल्यमपनीयेष्ट्वा मण्डलस्थं विसर्जयेत्
दीपस्थमपि संपूज्य शनैर्विज्ञापयेदिदम्
सूर्यो हि भगवान् विष्णुः सूर्यो विष्णुस्स एव हि
सूर्य आत्मा तथा लोके विष्णुरात्मा सनातनः
आदित्याग्निमयं ब्रह्म चाग्नीषोमात्मिकं विभोः
ताभ्यां विष्ण्वात्मके भावे बोधं कुरु ममाच्युत
अच्युतानन्द गोविन्द वासुदेव जनार्दन
नारायण हरे विष्णो नाशयाघं शिवाक्षर
आचारदुष्टस्सर्वाशीर्वर्णसंकरकारक
(उपवासव्रतैर्हुत्वा सुक्तुन्त्वान्नोहमुत्सवे)
सर्वभूतेषु सान्निद्ध्यं विद्यते विष्णुमायया
तस्माद्वै करुणालेशं कुरु विष्णो नमो नमः
देवमिष्ट्वा स्वयं दत्वा दक्षिणां गुरवे शुभाम्

---

[151] PL त्रिसूक्तैः

उद्वास्य हृदि संयोज्य नित्यमभ्यर्चयेत् बुधः

ओं लोकेश्वर प्रसन्नात्मन् लोकानामभयप्रद

मायार्णवे निमग्नन्त्वं मामुद्धर नमोस्तु ते

मायामय हृषीकेश मम मायागतं तमः

सर्वलोकप्रदीपात्मन् प्रकाशय नमोस्तु ते

दीपकल्पस्समाप्तम्

अथ दुर्मरणात्पुंसां स्त्रीणां वा तद्विशुद्धये

नारायणबलिं कुर्याद्द्वादश्यामसिते द्विजः

दशाहात् परमिच्छन्ति पक्षभेदाच्च केचन

वपनञ्चैव पुण्याहं गव्यपानमपाशनम्

कृत्वा बौधायनेनोक्तं स्नानं सम्यक् समाचरेत्

संशोद्ध्य वेदिमालिख्य पद्ममग्निञ्च साधयेत्

आदावग्निमुखं कुर्यादस्मात् परिधिवेष्टनात्

ततो निवेद्यान्ता विशेषस्तत्र कथ्यते

देवस्य पुरतो वह्निर्वह्नेर्दक्षिणतो द्विजाः

पिण्डदानञ्च तन्मद्ध्ये स्थानमित्थं प्रकल्पयेत्

सकृत् प्रणवमुच्चार्य सहस्रादिमनुद्वयम्

तिसृभिर्व्यस्तयुक्ताभिः प्रणवाद्याभिरत्वरम्

त्रिष्कृत्वोथ विधानेन विद्वान् व्याहृतीभिस्सह

(पुरुषमावाहयामीति हरिचेतसा)

अष्टाक्षरेण संक्षिप्य पूर्ववत्तं समर्चयेत्

अर्घ्यादिकं क्रमाद्दद्यात्सूक्तेन पुरुषात्मना

प्रत्यृचं पुष्पपूजां च समाप्ते स्तुतिमेव च

निर्माल्यापनयः कार्यो व्याहृतीभिर्विलोमतः

सहस्त्रशीर्षन्देवमित्यद्ध्यायेन च क्रमात्

तर्पयन्ताभिरव्यग्र सप्तव्याहृतिभिस्सह

अभिषिच्य विधानेन देवन्दीपान्तमर्चयेत्

पायसेन गुळान्नेन दध्नन्नन्तु निवेदयेत्

हरीन्द्रेणाज्यसंयुक्तसोपदंशं सकादळम्

देवस्यत्वेत्यमुष्यान्ते विष्णुनारायणे क्रमात्

सम्प्रदानविभक्त्यन्तौ कर्मीभूतञ्चरुं ततः

निवेदयाम्यहं पश्चान्निवेद्यमनुरीरितः

अर्वाक् स्विष्टकृतो होमपरिद्ध्यादिकमाचरेत्

विष्णोर्नुकं परोमात्रेति पक्वस्य विहितो मनुः

नारायणस्य ऋग्भिस्तु नामभिः केशवादिभिः

आज्यं हुत्वार्चना होमं हविषाज्येन चाचरेत्

ततोऽभिवाद्य पूर्वेद्युराहूतानधीतान् गुणैः

(भक्त्या नारायणो नेति युग्माणि प्रान्नमन्त्रयेत्)

मृत्तिलैरथ रक्षांसि निरस्यापहता इति

उद्दीप्तामिति चाभ्युक्ष्य भूमिन्दूरीकृतासुराम्

आयासीत्यादने क्लृप्ते हरिमावाह्य चेतसा
नारायणं पितृस्थाने स्वधा शब्दं विसर्जयेत्
कृताभिवादना चान्तान् पाणिनोत्थाप्य सादरम्
प्राप्नोत्वित्यादिना विप्रानासनेषूपवेशयेत्
प्राप्तवानिति विद्वांसस्संविशेयुरुदङ्मुखाः
प्राङ्मुखा वा प्रविष्टस्य परो दक्षिणतो विशेत्
उपविष्टेषु सर्वेषु तिलतोयं प्रकल्पयेत्
संप्रोक्ष्यादाय संपूर्य प्रोक्षणीं सपवित्रिकाम्
उत्पूर्यादिभस्तु संप्रोक्ष्य राजतं कांस्यमेव वा
पात्रं पवित्रं विन्यस्य तस्मिन्नद्भिः प्रपूरयेत्
आद आगच्छामुञ्चोत्थाप्य पवित्रे तिलान्न्यसेत्
तिलोसीति पवित्राढ्ये मधुमन्त्रैर्मधु न्यसेत्
सोमस्यत्वेत्यभिमृश्यास्मादादाय तृणादिकम्
अवेष्टा इति मन्त्रेण शिरोन्तेन परित्यजेत्
शन्नोदेव्या च संस्पृश्य दत्वा कूर्चं प्रदापयेत्
नारायणमनुस्तेभ्य तृप्यतु त्वं तिलोदकम्
अंबरादि प्रदीपान्तमभ्यर्च्याथ द्विजोत्तमान्
दद्यात्तिलांभस्संकल्पसिद्धिरस्त्विति वाचयेत्
अस्तु संकल्पसिद्धिस्ते प्रतिब्रूयुः प्रियेप्सवः
अग्नौ करिष्यामीत्युक्त्वा कुरुष्वेत्यनुमोदितः

हस्तेनैव समासीनः श्राद्धहोमन्तु होमयेत्

तिलाज्यमिश्रं विप्रान्नं होमद्रव्यन्तथैव च

चतुर्विंशतिसंख्याकाः पित्राद्या मनव स्मृताः

चतुर्थ्यन्तास्स्वधायुक्तास्तद्योग्यस्विष्टकृत्भवेत्

विद्वांसः पितृतुष्यर्थमन्त्रेषु बलिहोमयोः

नमोनारायणस्यान्ते विष्णवेति ततो द्विठः

हुत्वाशिष्टमथाकृष्य पृथिवीत इति ब्रुवन्

तेषां पत्रेषु निक्षिप्य मन्त्रेणाङ्गुष्ठमर्चयेत्

नारायणाय स्वाहेति मनुरङ्गुष्ठ कर्मणि

प्राणे निविष्ट इत्यादीन् प्राणाहुत्यां स्वयं वदेत्

समाप्ते पञ्चमे मन्त्रे ब्रह्मणीति हृदि स्पृशेत्

वैदिकान् पैतृकान् मन्त्राञ्जपेन् नारायणान्वितान्

आचान्तेषु पुनर्दद्यात् पूर्ववच्च तिलोदकम्

अक्षय्यमस्त्विति ब्रूयादस्त्वक्षय्यं वदन्तु ते

नमो नारायणायेति प्रीतानुत्थापयेत् क्रमात्

दातारो नोनुवर्द्धन्तामित्युक्ते ब्रूयुरञ्जसा

दातारो वोसि वर्द्धन्तां वेद सन्ततिरेव च

कृत्वा प्रदक्षिणं पृच्छेच्छेषैः किं क्रियतामिति

इष्टैस्सहोतभुज्यातान् ब्रूयुस्तस्योत्तरं परे

अनुगम्य निवृत्ते तु पिण्डान्दद्यात् कुशेषु सः

होमोक्ता एव मन्त्राश्च चतुर्विंशतिसंख्यकाः

त्रीन्पिण्डान्निक्षिपेन्मध्ये दक्षिणे चानिले शिवे

विश्वेदेवाश्च साद्ध्याश्च मरुतश्चेत्यमी त्रयः

एकोद्दिष्टविधानेन पिण्डं दत्वा पुरैव तु

त्रयाणां परितश्चाष्टौ पिण्डं दद्याच्च दिक्क्रमात्

विष्णुर्नारयणश्चैव ब्रह्मण्यस्तत्प्रियः परः

यज्ञेश्वरो यज्ञपुरुषो यज्ञात्मा सप्तमस्स्मृतः

सर्वात्मा च पुनस्सर्वे चतुर्त्थ्यन्ता नमोन्विताः

प्रेतपिण्डमथानीय योजयेदुपवीतवान्

ओं सर्वान् पितॄन् समधिगच्छति यस्स्वधा तस्मै नमो नारायणाय।

ऐक्यं संभावयेत् पिण्डान् पितॄंश्चापि परे पदे

मन्त्रौ वेदान्तविज्ञानपरौ मूलौ परात्परौ

भूयस्तारेण संपूज्य ब्राह्मणाय प्रदापयेत्

दक्षिणां गुरवे दद्यात् ब्राह्मणेभ्यस्स्वशक्तितः

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्

मण्डलस्थं समुद्वास्य केशवं हृदि योजयेत्

ततो दीक्षान्नवाङ्कुर्यात् मासश्राद्धसमन्विताम्

श्राद्धपिण्डन्तु दातव्यं वत्सरे वत्सरे पुनः

तत्काले दक्षिणान्दद्याद्विष्णुर्मे प्रीयतामिति

बीजाङ्कुरमहाकुंभवर्द्धनीजनिताग्निभिः

ध्वजतोरणदिक्पालकलशैश्च विभूषणः

नारायणबलिं कुर्याद्धनाढ्यो वा धनी विना

अनुक्तानि च सर्वाणि कल्पवैदिकतान्त्रिके

आलोक्य भगवत्कर्म कुर्याद्विष्णुपरायणः

एकादश्यामथोपोष्य द्वादश्यामर्चयेत् हरिम्

एकादश्यां न भोक्तव्यं हरिप्रवरकैर्नरैः

स्पृष्टा दशम्या नोपोष्या सोपोष्या द्वादशी तथा

एकादश्या विना यत्र त्रयोदश्या समन्विता

नोपोष्या सोपि तत्काले ह्युपोष्येद्दिवसद्वये

मधुतैलनिशाभ्यङ्गतांबूलस्त्रीसुखादिभिः

आशौचवपनश्राद्धज्वरादिपरिपीडनैः

उपवासं न कर्तव्यं प्रलापबहुभक्षणैः

रात्रावशक्तो भुक्त्वान्नन्द्वादश्यामर्चयेद्धरिम्

कुशोदकं पञ्चगव्यमपोर्मूलफलं पयः

(हविर्ब्राह्मणकामाय गुरोर्वचनमौषधम्)

भोक्तव्यान्यप्रदध्नानि ब्रह्मचर्यन्त्रिरात्रकम्

सामेषु केशवादींस्तु कर्णिकायां समर्चयेत्

दळेषु चावशिष्टांस्तु वासुदेवादि पूर्वकान्

त्रित्रिभेदेन मासानाम्मूर्तीनामिह संस्थितः

केशवम्मार्गशीर्षे तु पौष्ये[१५२] नारायणं विभुम्

माधवं माघमासे तु गोविन्दं फाल्गुने पुनः

विष्णुं चैत्रेथ वैशाखे मधुसूदनमव्ययम्

ज्येष्ठे त्रिविक्रमन्देवमाषाढे वामनं विभुम्

श्रीधरं श्रावणे भाद्रे हृषीकेशपदे यजेत्

पद्मनाभञ्चाश्वयुजे कार्तिके दामबन्धनम्

आरब्धदिवसे भूयो मूर्तिभिश्शक्तिभिस्सह

केशवाद्यैश्श्रियाद्यैश्च तारमिष्ट्वा समापयेत्

त्रिसूक्तैर्यागमन्त्रैश्च तारेणैव चतुष्टयम्

केशवादीननुस्मृत्य ब्राह्मणान् बहुधा यजेत्

चातुर्मास्यमथो वक्ष्ये यथावद्द्वादशात्मनः

व्रतेन चातुर्मास्येन त्वामहन्तोषय......

इत्युक्त्वाभ्यर्च्य तस्याग्रे पातयेच्च कुशोदकम्

रात्रावाषाढमासस्य दशम्यां बहुळे सति

त्रिकालार्चनसंयुक्तान्नयेदेकादशीञ्जपेत्

यथाविभवसंयुक्तं द्वादश्यामर्चयेद्विभुम्

हेमादिद्रव्यजनितचक्रं वा चक्रपङ्कजम्

गन्धपुष्पौषधीबीजकुसुमैर्वा रजोत्तमैः

षड्दळन्द्वादशारन्तु नाम्नि नेमि समुज्ज्वलम्

[152] PL पुण्ये

विनायकं महाकाशं विष्वक्सेनञ्चतुर्भुजम्

गजाननं समभ्यर्च्य वामदक्षिणतो गुरून्

नारदस्सनकश्चैव याज्ञवल्क्यांगिरा भृगुः

कपिलोश्वशिरो ब्रह्मा स्वगुरुं प्राणदायिनम्

अनन्तं पद्मनाभं च क्षीरोदं कूर्ममेव च

एकश्रमधरश्चेष्टा धर्माधर्मादिकं कजम्

स्वमन्त्रेणार्चयेत् चक्रन्तारेणाद्यमथार्चयेत्

प्रागादिगुणपत्रेषु पिण्डैस्सङ्कर्षणादिकम्

तमेव शिवपूर्वेषु चानिरुद्धादिकं त्रयम्

अरेषु वामनं प्रीतिं हृदयञ्च शिरः क्रमात्

श्रीधरञ्च रतिन्तद्वद्छिखां कवचमेव हि

हृषीकेशन्ततो मायामस्त्रं वैलोचनं परम्

चक्रशंखमब्जं विद्याहलञ्च मुसलन्धनुम्

शरञ्चखेटखड्गं श्रीवत्सं कौस्तुभं स्रजम्

अरसन्धिषु वै नेम्यान्दशकं हरिपूर्वकम्

निवेद्यञ्च चरुं हुत्वा चतुरो ब्राह्मणान्येजेत्

जितादिना चतुर्द्धा तं प्रणमेत्सप्रदक्षिणम्

सयवं राजतं पात्रन्निवेद्य गुरवे ददेत्

ऐहिकान्धर्मकामार्थान्मम यच्छन्ति शक्तयः

मोक्षविघ्नोपशमनन्नित्यं कुर्वन्तु मूर्तयः

सर्वदा नित्यशुद्धोयं परमात्मा परः प्रभुः

पतितस्य भवांभोधौ वासुदेवोऽस्तु मे गतिः

हुतशिष्टमथाश्नीयात् कृते कर्मणि नैष्ठिके

श्रावणेप्येवमाहूय मध्ये संकर्षणं यजेत्

प्रागादि वासुदेवाद्यमनिरुद्धाख्यमव्ययात्

अरकेषु यजेद्विद्वान् पद्मनाभन्तु तान् धिया

हृच्छिरो दामोदरं महिमान्तु शिखामपि

कवचं केशवं भूयश्श्रियमस्त्रञ्च लोचनम्

चक्राद्यं पूर्ववत् सर्वं गतिस्संकर्षणोस्त्विति

ससक्तुकन्ताम्रपात्रं पुनर्भाद्रपदे यजेत्

प्रद्युम्नं कर्णिकामध्ये प्राच्यां संकर्षणं दळे

दक्षिणे वासुदेवञ्चाप्यनुरुद्धन्तु नैरृते

अनिरुद्धं वासुदेवं पुनस्संकर्षणं लये

नारायणं वागीश्वरीं हृदयञ्च पुनश्शिरः

माधवं च तथा कान्तिं शिखां कवचमेव हि

गोविन्दञ्च क्रियामस्त्रन्नेत्रं शेषन्तु पूर्ववत्

(नमस्कारञ्चस्तुतिस.. प्रद्युम्नोस्तु मे गतिः)

हैरण्यं सघृतं पात्रमेवमाश्वयुजे यजेत्

मध्येऽनिरुद्धमाद्यन्तु तथैव निरृतीशयोः

विष्णुं शक्तिं च हृदयं शिरश्च मधुसूदनम्

विभूतिञ्च शिखा वर्म त्रिविक्रममथेच्छया

अस्त्रन्नेत्रञ्च चक्राद्यमनिरुद्धोस्तु मे गतिः

आयसञ्चेन्द्रनीलाढ्यं सतिलं वा प्रदापयेत्

द्वादश्यां कार्तिके मासि सविशेषं समर्चयेत्

प्रणवं कर्णिकामध्ये तदङ्गं केसरेषु च

चतुष्कं वासुदेवाद्यं क्रमाद्दिग्दळमध्यगम्

नाभौ तदंगषड्कञ्चाप्यरमेषु च षड्द्वयम्

सुन्दरीषड्द्वयन्नेम्यां वीथ्याञ्चक्रादिकं गणम्

इन्द्राद्यन्दशकं बाह्ये वज्राद्यं मण्डलात् बहिः

चतुर्विधं निवेद्यान्नं समिदाज्यचरूंस्तिलान्

हुत्वा पिण्डचतुष्केण हृदा पूर्णाहुतिं हुनेत्

भक्त्या षोडश विप्रेन्द्रान् भोजयेत् पाञ्चरात्रिकान्

भक्त्या हिरण्यं वस्त्रञ्च दद्यात्तेभ्यो हरिं स्मरन्

दद्यात्पात्रचतुष्कन्तु प्रणमेत्सप्रदक्षिणम्

चतुर्धा ता पुनस्तुत्वा संहृत्य हृदि योजयेत्

एतद्व्रतं समुद्दिष्टं गुह्यं सर्वव्रतेषु च

एवमेकादशीकल्पं समासात् परिकीर्तितम्

अमावास्यां पिबेन्मूत्रं पौर्णमास्यां तथा पयः

नारायणं यजेद्विष्णुं सूक्ताभ्याञ्च घृतं हुनेत्

षोडशाद्यैकपर्यन्तमेकतष्षोडशान्ततः

भोजयेत् ब्राह्मणांस्तेभ्यो दापयेच्च तिलान्यवान्

श्रावणे पूजयेत्कृष्णं पूरणं क्षीरमेव हि

गोपीजनवपञ्चार्णांस्तदन्तेन्द्रद्वयं युतम्

भाय स्वाहेति कामाद्यन्मन्त्रमस्य दशाक्षरम्

नमस्स्वाहा वषड्ढुंफट् जातयः परिकीर्तिताः

अङ्गनामचतुर्थ्यन्तं हृदयञ्च शिरश्शिखा

कवचं पञ्चमञ्चास्त्रन्द्विठाधञ्चक्रन्देवयुतम्

आविसुपूर्वन्ताराद्वै त्रयाणां परिकीर्तितम्

त्रैलोक्यरक्षणेत्येकमसुरान्तकरेत्यपि

विलोमान् कथितन्त्वेवमङ्गपञ्चकमस्य तु

ऋषिस्तु नारदो ज्ञेयो विराट्छन्द उदाहृतम्

देवता कृष्ण एव स्यात् बालन्नीलाम्बुदप्रभम्

पायसन्नवनीतञ्च हस्ताभ्यां विधृतं सदा

पुण्डरीकनखं कण्ठे किंकिणीजालकं कटौ

वर्णलक्षं जपेन्मन्त्रमयुतञ्जुहुयात्तिलैः

अङ्गुलीषु क्रमाद्वर्णान् के वक्त्रे हस्तयोर्हृदि

जठरे पार्श्वयोर्नाभौ जानुपादाख्ययोर्न्यसेत्

विष्णुं पीठे तमावाह्य सकळीकृत्य पूजयेत्

दिग्विदिक्ष्वेन्द्रियाङ्गानि लोकोशैः कुलिशादिभिः

अन्नञ्चतुर्विधं स्वादु निवेद्यं श्रेय इच्छता

मन्मथद्वयमध्यस्तं कृष्ण इत्यक्षरद्वयम्

चतुर्भिर्ज्ञानपूर्वाणि वीर्यन्द्वाभ्यां तथा भृशम्

आधारनाभिहृद्वक्त्रं गतान्वर्णान्विचिन्तयेत्

स्वस्तरोर्विटपेवाथ तन्मूले मणिकुट्टिमे

आसीनं रत्नधाराभिर्दीप्यमानम्मुदान्वितम्

ऋष्याद्यं पूजनं सर्वञ्जपसंख्यान्तु पूर्ववत्

चतुरक्षरमुद्दिष्टं पञ्चार्णमपि पूर्ववत्

गोविन्दपदमन्त्रोक्तं वक्ष्ये चाष्टादशाक्षरम्

(कुन्दामध्यगताय कृष्णाय गोप्यर्णाय ल मध्यगा)

गोपीजनवतारास्युर्भायस्वाहा स्मरादिका

शिरोललाटदृक्च्छ्रोत्रनासाताल्वोष्ठवाक्पथे

गळपाणिहृदंभोजनाभिगुह्योरुजानुषु

पादायोर्विन्यसेद्वर्णान्त्रिषड्कपरिसख्यकान्

चतुर्भिश्चतुर्भिर्द्वाभ्यां वर्णैरङ्गानि पञ्च वै

अतसीपुष्पसंकाशः पीतवासा जगत्पतिः

गोपीजनससंयुक्तं सदा वेणुं प्रणादयेत्

पूर्वपीठे तमावाह्य सकळीकृत्य पूजयेत्

दिक्षु कोणेषु चाङ्गानि स्नानाद्यैः परिपूजयेत्

रुग्मिणी सत्यभामा च काळिन्दी जाम्बवत्यपि

सत्यानन्दजितिर्मित्रनन्दाख्या रोहिणी तथा

देवकीवसुदेवश्च यशोदा नन्द एव च

दिशाधिपास्तदस्त्राणि पूजनीया बहिर्बहिः

छन्दत्वे चास्य गायत्र्यामन्यत् सर्वन्तु पूर्ववत्

ओं नमः पदमादाय वासुदेवाय इत्यपि कृष्णाय ओं

पञ्चांगानि पदैरस्य शेषमष्टादशार्णवत्

तारद्वयम्महामायायुगळं विन्दुसंयुतम्

कामराजन्तयोर्मध्ये श्रीकरायपदन्यसेत्

कृष्णाय पञ्चमं विन्दोस्त्रयोदश कलान्वितम्

कुलप्रियपदस्यान्ते जन्मने वास्य कीर्तयेत्

देवाय गोपीवर्णास्तु कुलान्ते भूषणाय च

पूर्ववीजैः पुनश्चायमष्टात्रिंशाक्षरो मनुः

पदैस्त्रिबीजपुटितैस्स्वनामकैर्ध्रुवादिकैः

तज्जातियुतैः प्रकल्पयेल् अङ्गानि मन्त्रस्य ऋषिस्तु नारदः

छन्दोस्य पंक्तिः स्वयमेव देवता

उत्तरेत्तारशक्तिभ्यां कृष्णायेति त्र्यक्षरम्

पुनर्देवातिदेवाय देवकीनन्दनाय च

तारबीजनमस्कारैर्द्वाविंशद्वर्णको मनुः

तारबीजपदैरस्य पञ्चाङ्गानि प्रकल्पयेत्

छन्दस्तु गदिताचास्य गायत्री पूर्ववत् परः

सृष्टिं क्रोधां पुनश्शान्तिं व्योमामेकत्र योजयेत्

तद्वद्वैघ्नं च होमाख्यं षष्ठस्वरविषोत्बणम्
जयकृष्णद्वयं वीप्स्य सत्वोत्कृष्ट प्रचेत वै
मन्मथमनोमथन सर्वस्त्रीहृदयं च नः
पुनः विद्रावतारद्यं पुनर्बीजानि ठद्वयम्
सम्मोहनमिदं मन्त्रं त्रिचत्वारिंशदक्षरम्
पदैः पूर्वोक्तमार्गेण पञ्चाङ्गान्यस्य कल्पयेत्
तारं ह्रीं झ्रीं जयद्वन्द्वं कृष्णवीप्स्य निरन्तरम्
त्रिधा प्रियाय पञ्चाणां ततः प्रमुदिताक्षरान्
तेजसेति पुनर्नीत्यन्ततो भक्तप्रियाय च
पूर्वबीजे नमस्कारन्तारमाद्यन्तयोर्भवेत्
पुर्वमन्त्रवदंगानि पदैस्तु परिकल्पयेत्
ओं नमः पदमादाय ततो वै परमात्मने
कृष्णाय कमलेत्युक्त्वा दलवितत इत्यपि
नेत्राय ब्रह्म निष्ठाय ततो वै ब्रह्मणे नमः
षड्पदैस्तु षडंगानि शेषां पूर्ववदस्य हि
अष्टादशाक्षरादीनां मन्त्राणां ध्यानमुत्तमम्
तस्योदितमशेषाणामर्चनाद्यन्तु कृत्स्नशः
श्रावणे पूजयेत्कृष्णं क्रमादश्वयुज्यादितः
मासि मासि पुनः प्राप्ते श्रवणेश्वयुजेर्चयेत्
त्रिस्सूक्तैर्जुहुयादाज्यं समिद्विष्णोर्नुकेन तु

तदस्य प्रियमित्याज्यं प्रदद्विष्णुर्हवींषि च

ओं परोमात्रया लाजांस्तिलांश्चैव विचक्रमे

त्रिर्देव इति हुत्वाज्यं होमशेषं समापयेत्

जीर्णोद्धारप्रतिष्ठायां वक्ष्ये वैशेषिकं मनाक्

अपास्य पूर्ववत् बिंबं दुष्टमादाय वै नवम्

तोयादादाय संशोध्य शयने शाययेत् पुनः

संहृत्योत्पाद्य विधिवत् पूजयेत्परमेश्वरम्

द्विकरञ्चक्रमाल्लिख्य धान्यांबरकुशावृतम्

विष्णवादिमूर्तिसंयुक्तैर्घटैर्द्वादशभिर्वृतम्

पूर्ववच्चक्रमभ्यर्च्य गत्वा वै चाल्पमन्दिरम्

तत्वैस्संहतिमार्गेण हुत्वा यात्रासमन्वितम्

अल्पबिंबगतं देवं कलशे विनिवेश्य तत्

तस्मिन् चक्रे प्रतिष्ठाप्य तद्बिंबमपहाय च

पूजयेत् सकळीकृत्य द्वादशारेषु मासपान्

विष्णवादीन् कमलस्थांस्ततश्चक्राब्जमण्डले

इष्ट्वा विधानतस्सर्वकुण्डेषु जुहुयुर्द्विजाः

संपातस्पर्शनं कृत्वा शान्तिहोमन्तु पूर्ववत्

घृतं पुरुषसूक्तेन पुनर्नारायणेन च

अतोदेवेति सूक्तेन पञ्चोपनिषदैरपि

विष्णवादिभिः क्रमाद्धुत्वा संपातं कलशे स्पृशेत्

अन्यत्सर्वन्तु पूर्वोक्तं कृत्वा संस्थापयेद्विभुम्

तत्वैश्च सकलैर्युक्तं ध्यात्वा देवमधोक्षजम्

स्नापयेज्जपतोयेन तत्वैस्सृष्टिक्रमेण हि

करपादकूर्पराख्यजानुकक्षोरुमूलतः

कलिंगमुखहृन्मध्ये सूक्तस्य स तु पौरुषम्

एकामेकान्न्यसेदस्य कूर्परे जानुमण्डले

नारायणात्मकं सूक्तं के वक्त्रे हृदि गुह्यके

ऊरुपादतले न्यसेत् सूक्तं विष्णवात्मकं परम्

मूर्धाक्षिकर्णनासामुखगळदोर्हृदयनाभिगुह्येषु

पायूरुजंघासजंघाप्रपदेषु न्यसतु सूक्तमपि देव्याः

विष्णवादीन् पूर्ववन्न्यस्त्वा श्रियाद्यं षड्द्वयं तथा

पादजानूरुगुह्याख्यन्नाभिहृत्कण्ठबाहुषु

वक्त्रनासाग्रनेत्रेषु ललाटे चैव मूर्धनि

मूर्धादिसृष्टिसंज्ञन्तु संहारं कापदान्तिकम्

वल्कजानुललाटोरुनेत्रे गुह्येषु घोणतः

नाभिवक्त्रहृदंभोजबाहुमूलेषु कन्धरे

स्थितिन्यासमिति प्रोक्तं पञ्चोपनिषदैर्विभोः

ओं षों पराय परमेष्ठ्यात्मने नमः,ओं (यं)पराय पुरुषात्मने नमः,

ओं रां पराय विश्वात्मने नमः,ओं वः पराय निवृत्यात्मने नमः,

ओं लां पराय सर्वात्मने नमः,

प्रणवेन च संस्पृष्ट्वा हृदि सञ्चिन्त्य माधवम्
हृदयन्देवदेवस्य विष्णोर्नुकमिति स्पृशेत्
विष्णोविक्रमणैस्पृष्ट्वा मुखं चक्षुश्च नासिकाम्
हिरण्यगर्भमन्त्रेण सर्वांगं संस्पृशेत् पुनः
विश्वतश्चक्षुरित्येवं सकळं भावयेच्च तम्
मन्त्रार्णांश्च तदंगानि मुद्राश्च परिचिन्तयेत्
सावित्र्या पञ्चभिश्चात्र शान्तिहोमं स्वशक्तितः
प्रायश्चित्तन्तु कर्तव्यमन्यत्सर्वन्तु पूर्ववत्

इति श्री नारायणात्मके अष्टमः पटलः

नारायणात्मके वैष्णवे
नवमः पटलः

मूलमन्त्रगणं वक्ष्ये तुरीयादिपदोत्थितम्

उद्धरेत् प्रणवं पूर्वं सप्तमान्तं प्रतिष्ठया

पञ्चमान्ततदाद्येन त्रयोदशकलान्वितम्

विद्यया मध्यमन्तस्मिन्नाद्यं वाद्यं तु विद्यया

ज्ञानप्राणाय बीजाख्यं लान्तस्योपरि पावकम्

मध्यमं पञ्चमेवान्तस्थदूर्ध्वोग्निं च विद्यया

नेचैतन्याय तदनुप्रोच्य रेम्य नमः पदम्

ज्ञानमेकाक्षरन्त्वाद्याञ्चतुर्वर्णं पदं बलम्

षडक्षरमथैश्वर्यं वीर्यं पञ्चाक्षरं पदम्

चतुर्वर्णं पदन्तेजश्शाक्तं स्यादक्षरद्वयम्

अस्य ध्यानार्चनं प्रोक्तं अन्तर्यागेण केवलम्

तेजो वीर्यं बलं शक्तिमैश्वर्यं ज्ञानमेव च

अङ्गषट्कं समुद्दिष्टं गुणभेदात् परस्य नु

अकारं कर्णिकामध्ये सुषुप्त्याख्येऽग्नि मण्डले

दिक्क्रमेणोदितस्यास्य पूर्ववध्यानमर्चनम्

षाड्गुण्यविग्रहं त्वाद्यमनुवृत्या तथा परम्

दक्षिणादित्रयं द्वाभ्यां द्वाभ्यामस्याङ्गवत्स्थितम्

प्रणवं प्रथमञ्चाद्यात् षष्ठाद्यं वह्निविष्टरम्

विद्यया पञ्चमाद्यन्तु पुनस्सङ्कर्षणेन तत्

तयोर्मध्ये महाप्राणं पञ्चमान्तं पुनश्च तत्

तदधः पञ्चमाद्यन्तु गतये परमेश्वरा-

येति कर्ते हृदयमेकाविंशाक्षरन्त्विदम्

एकभूताङ्गषण्नेत्र नयनार्णैः पदानि हि

प्रणवं प्रथमात्पूर्वं षष्ठान्तं सत्रयोदशम्

मेधां श्वेतामथोत्कारीं वह्निना मृत्युसंज्ञिकाम्

सृष्टिञ्च कादिकां वायुं हरिमेकत्र योजयेत्

पञ्चमाद्यम्मकारेण ने भगार्णा सतेन च

मोनमश्चोद्धृतं मन्त्रं सम्यगष्टादशाक्षरम्

एकाग्न्याधारवेदार्णैर्द्विद्विकैस्तत्पदानि च

तारन्निवृत्तिं वक्ष्याधोयुताया विकताय च

प्रतिष्ठाया चानन्ताय अध्यक्षाय ततो नमः

एकवेदमहाभूतसमुद्राब्धिविलोचनैः

पदभेदैस्समुद्दिष्टम्मन्त्रमष्टादशाक्षरम्

उद्धृत्य प्रणवं प्राणापानश्चेताञ्चमाक्षरम्

नोदानव्यानषष्ठाद्यमग्निना च प्रतिष्ठया

णायषष्ठायमग्निं च बलिनायोद्यमायहृत्

एकरन्ध्राक्षिवह्न्यङ्गनयनार्णैः पदानि च तृतीयः

अच्युताद्यञ्चतुर्थः

सकारकेसरोदीप्त स्वप्नाख्ये चेन्दु मण्डले

पूर्वोक्तं रूपमाहृत्य तेजसा यजने कृते

संपूर्य कर्णिका मध्यं स्वार्थेन ब्रह्म तेजसा

मूर्तिशाखाचतुष्कोणवैशाखं कूर्मवत्स्थितः

इष्ट्वा तं पूर्ववद्ध्यात्वा दिक्रमेणादिकं बहिः

सितादिवर्णैस्सुव्यक्तं भूषणैश्चाथ हेतिभिः

चक्रं हलं शरं खड्गं क्रमाद्दक्षिणबाहुषु

स्फुटो रेखामयं शंखस्सुव्यक्तश्चेतरेषु च

उद्धरेत् प्रणवन्तीक्ष्णां क्रोधनीञ्च प्रतिष्ठया

वायुन्तेर्णञ्जकारञ्च त्रयोदशकलान्वितम्

रूपाय तीक्ष्णां वह्नीञ्च सीरिणा दीर्घनामिकाम्

पेक्षायतीक्ष्णां रार्णञ्च नवे भूयः क्षिताय हृद्

चतुर्विंशाक्षरो मन्त्र प्रोक्तो वैशाखरूपिणः

एकाग्निभूतषड्सप्तनयनार्णैः पदानि हि

चतुष्कं वासुदेवाद्यं मन्त्रोद्धारे पुरोदितम्

(घ्राणपं हृदयं बीजं शिरो

नत्यास्तदुदयन्ध्यायेत् केसरान्तं प्रपूर्य च

क्षार्णपल्लवमृतमयैर्भोगैरिष्ट्वा चैकसमानिना भूम्यर्कमण्डले

जाग्रताह्वये)

कोटिकोट्यर्कसङ्काशम्मारीचीं गणसङ्कुलम्

दन्तज्योत्स्ना वितानेन प्रकटीकृतदिङ्मुखम्

सितातिवर्णैसुव्यक्तं ध्वजादिवसनैरपि

लावण्यामृततोयेन सिक्तन्तं सर्वतो दिशम्

चक्रशंखाम्बुजगदं वैशाखं प्रणवात्मकम्

तथैव वासुदेवाख्यं प्राग्दळे परिचिन्तयेत्

चक्रं शंखं हलं याम्ये मुसलं विधृतं परम्

पश्चिमे चक्र शंखौ च पञ्चबाणधनुर्धरम्

वहन्तमनिरुद्धन्तु चक्रशंखासिखेटकैः

तारार्चनं पुरोद्दिष्टं बहिरन्तर्गतं तथा

तारं बीजं स्वकञ्चादौ मन्त्रान्ते तु नमः पदम्

सप्तत्रिंशाक्षरञ्चाद्यं परं षड्त्रिंशदक्षरम्

तस्माद्वर्णद्वयं हीनन्तस्मात्तद्वच्चतुर्थकम्

माथुरायात् भजेत्युक्त्वा माया वायुं समीरणम्

आप्यायिन्या च गेकारं श्चरायांन्तेथ चक्रिणे

सुवर्णाद्यं ध्वजायेति पीताद्यं वाससे पदम्

वासुदेवाय संप्रोक्तमाद्यमेकं दशाक्षरम्

भूतवह्न्यंगभूतार्णैमुनिभिस्तत्पदानि तु

शिवम्मनुकलायुक्तन्नन्दिने बिन्दुना शिवम्

(वक्त्रादि चकिनेतातसृष्टिमेकारभूषिताम्)

कामिनीं चेनिरागञ्च शान्त्या भूमिञ्च वाससे

कालपालाय संप्रोक्त्वाकर्षणाय हुताशनम्

हविना च विषाभूमिन्तद्वद्वायुमित्थं समुद्धृतम्

षड्पञ्चदशवर्णैस्तु गुणभूतैः पदानि तु

ततश्शाङ्र्गभृते क्ष्वेळं सृष्टिमग्निन्ध्वजाय च

रक्तादि वाससे जीवं सनत्कुमाराय च (स्थिरा

राग)प्रियाय प्रपूर्वन्तु द्युम्नाय परिकीर्तितम्

ऋत्वं गेन्द्रिय षड्भूत ऋतुभिस्तं पदानि च

नन्दवीप्स्य तयोर्मद्ध्ये सृष्टिं च हलिना पुनः

दकाराय च ऋष्यादि ध्वजाय हलिनानिरुद्धाय जीवन्तृतीयेन

स्वरेण परन्तु वाससौ विष्वक्साराञ्चाप्येकारेण च नाय च

द्विरन्ध्रगुणभूतार्णैर्मुनिभिश्चांगकल्पना

उक्तक्रमेण संपूज्य पुनस्तदुपसंहरेत्

पुनरव्ययोगे तु गृहीत्वा शबलं वपुः

सितकृष्णमथैशान्यामनिरुद्धो दले स्थितः

कृष्णपीतन्तु वायव्यां प्रद्युम्न स्वेन तेजसा

नैरृत्यां पीतरक्तन्तु देवस्संकर्षणो दले

रक्तशुक्लमथाग्नेय्यां वासुदेवं पुरस्थितम्

ओं पुरुषाय नमः

ओं सत्याय नमः

ओं अच्युताय नमः

ओं भगवते वासुदेवाय नमः

ओं प्रभविष्णवे कालमूर्तये हुं फट् स्वाहा

चक्रं ओं सर्वान्तश्चारिणे गगनमूर्तये स्वाहा

शंखः ओं समुद्रमूर्तये स्वाहा

पद्मं ओं वेदमानेंगाग्न्युपदलेषु च

दिक्षु ध्वजचतुष्कन्तु चक्राद्यं विदिशासु च

निवेद्यान्नं हुनेदग्नौ समिदाज्यचरूंस्तिलान्

चतुर्धा प्रणमेत् भूमौ पूर्ववत् सप्रदक्षिणम्

व्यक्ताव्यक्ते पुनर्व्यक्तमव्यक्ते चोभयात्मकम्

अव्यक्तं कारणे योज्य हृदि संयोज्य तत्परम्

ध्यायन्नास्ते मुमुक्षुस्सन् जपेन्मन्त्रन्तु सिद्धिभाक्

इति नारायणात्मके नवमः पटलः

नारायणात्मके वैष्णवे
दशमः पटलः

परस्य ब्रह्मण सम्यक् ज्ञातमाराधनं मुने

इदानीं श्रोतुमिच्छामि परस्य द्वादशात्मनः

ब्रह्मयूपस्वरूपेण तारदीधितिलक्षणम्

आमध्याद्दळपर्यन्त आपूर्यास्ते स्वतेजसा

स्वकमूर्तिचतुष्कन्तु प्रविभज्य त्रिधा त्रिधा

अरार्कमण्डलेष्वाद्य क्रमादभ्युदितस्स्वयम्

तस्य मन्त्रगणं प्रोक्तं यजनं ध्यानमेव हि

त्रिधोदितञ्चतुष्कञ्च केशवाद्यञ्च षड्वयम्

ज्ञानादि गुणवृन्दञ्च स्वशक्ति निचयम्महत्

आत्मन्येवोपसंहृत्य सूतेग्निकणवद्भुतम्

वैभवं मन्त्रवृन्दन्तु शक्तिमुक्तिफलप्रदम्

तत्रान्तर्यामिभावेन स्थितस्सर्वेश्वरः प्रभुः

आधारतत्वेन तदधः पद्मनाभाख्यया स्वयम्

पुनस्सकर्णिका मध्ये देव आस्ते ध्रुवाख्यया

अनन्तः प्रथमो देव शक्त्यात्मा मधुसूदनः

विद्याधिदेवः कपिलो विश्वरूपो विहङ्गतः

क्रोधात्मा बडवावक्त्रो धर्मो वागीश्वरः प्रभुः

देव एकार्णवाशायी कूर्मात्मा लोकधारकः
वराहो नारसिंहश्चाप्यमृताहरणः प्रभुः
श्रीपतिश्चाथ कान्तात्मा राहुजित्कालनेमिहा
पारिजातहरो देवश्शान्तात्मा ध्यानतत्परः
दत्तात्रयोऽथ भगवान्यग्रोधशयनः प्रभुः
एकश्रृङ्गो महामत्स्यो वामनस्तु त्रिविक्रमः
नरो नारायणश्चैव हरिः कृष्णः कुठारभृत्
रामो दाशरथिर्व्यासः कल्किस्सर्वजगत्प्रभुः
पाताळशायीत्युद्दिष्टं षड्त्रिंशद्देवतागणम्
सर्वेश्वरस्य बीजं हि पञ्चमान्तं सबिन्दुगम्
तदेव पद्मनाभस्य षोडशस्स्वरसंयुतम्
ध्रुवस्य बिन्दुना ऋद्धिं दीपिकामरुणां स्थितिम्
सृष्टिं श्वेतामुकारञ्च व्यापिनीं रतिसंज्ञिताम्
शान्तिमुत्तरसंज्ञान्तु प्रीतिं कामांश्च वानुजम्
भयान्तस्यानुजामित्थमप्रमत्तस्समुद्धरेत्
स्थिराञ्जरां क्रियांगञ्चाप्यैश्वरीं पालिनीञ्चपम्
वायुन्दंशान्त्रिमाद्यञ्च वार्णं शंखं विषञ्चङम्
लक्ष्मीं सिद्धिन्ततो रौद्रां क्रोधनीं रेचिकाञ्चथम्
पीतामेतानि बीजानि शेषादीनां सविन्दुकम्
इच्छारूपधरास्सर्वे द्वियातिभुजभूषिताः

सर्वाभरणसंयुक्ताश्चतुर्मूर्तीवदुज्ज्वलाः

देवसंखं वहन्तश्च स्वदेहे भूषणास्त्रवत्

अग्निः किरीटश्चन्द्रार्कौ क्रमाच्छ्रीवत्सकौस्तुभौ

ऋतवो वनमाला हि गरुडः पञ्चवायवः

कालश्चक्रो वियच्छङ्खो गदा देवी सरस्वती

वरुणोंबुरुहसीरमोषद्भ्योमुसलन्नगाः

शब्दादयाश्शरं वायुर्धनुश्शास्त्राणि नन्दकः

भूश्चर्म नियतिर्दण्डो वैराग्यं परशुस्मृतः

पाशो मायाङ्कुशः काम अहंकारस्तु मुद्गरः

ज्ञानं वज्रं समाधिस्तु शक्तिश्शूलन्त्रिशक्तिजम्

चन्द्रादित्यौ स्मृतौ तस्य वामदक्षिणलोचने

ब्रह्माणमाहुर्मूर्धानं केशाश्चास्य वनस्पतिः

भ्रुवोर्मध्यगताराश्च दशनास्तस्य कीर्तिताः

धर्माधर्मौ तथोर्ध्वाध ओष्ठसंपुटमाश्रितौ

इन्द्राग्नीतालुके तस्य जिह्वा चैव सरस्वती

दिशश्च विदिशश्चैव श्रोत्रयोस्संव्यवस्थिताः

वायुः प्राणेषु विज्ञेयो मरुतोङ्गुलय स्मृताः

ऋषयो रोमकूपस्थास्समुद्रा वस्तिगोचराः

नद्यश्च नळके नागाः प्रपदेशवसुन्धराः

उक्तानुक्तमशेषेण जातं यच्च चराचरम्

षाड्गुण्यविग्रहे तस्य संस्थितं परमात्मनः

तदङ्गा दैवसंजाता मूर्तयश्शक्तयोऽखिलाः

एकोप्याजीजगद्धाता बहिरन्तर्यवस्थिताः

इच्छामि नारद मुनीश्वर पद्मनाभ

नाभ्युत्थितं भवमयं भवदेवताढ्यम्

नाम्नाब्जनाभभवनं भवनं विधातुः

संपूजनाय कमलं भवदेवतानाम्

अष्टादशांशैः प्रविभज्य पूर्वं

चतुष्करं पङ्कजसिद्धयेन्तः

त्रिभिस्तुभागैः परिकल्प्य वृत्तम्

पीठन्त्वथैतेन द्व्यंशकेन

वीथीरुपावाह्य गतैरस्त्र्यंशै

द्वारञ्च शोभामुपशोभिताञ्च

कोणञ्च कोष्ठैर्दशभिर्विधेयम्

एकादशं वीथिगतं विभिन्नम्

मूलञ्चतुर्भिर्द्वितयेनमध्य

न्द्वारस्यचाग्रं विहितञ्चतुर्भिः

त्रिभिस्तु मध्यन्त्वथ शोभिताया

स्त्वेकैकभागेन च मूलमग्रम्

एकेन मध्यन्द्वथ मूलमग्र-

त्रिभिस्त्रिभिस्तत्परिशोभिकायाम्

ज्ञानेन्द्रियन्द्वारमतीवशुक्लम्

कृष्णा हि मात्रापि ततापशोभा

पीता च कर्मेन्द्रियनिर्मिता

सम्मोहनीना त्वनुशोभिकायाः

कोणञ्च भूतात्मिकमेवरक्तं

श्यामन्त्वथैकं युगमध्यमित्थम्

कालस्य तद्वत्स्थितिमत्रलक्ष्यम्

द्वारादिदेशेषु गुणांस्तु बाह्ये

सितञ्च रक्तञ्च तथैव कृष्णम्

रेखात्र पञ्चाङ्गुलविस्तृतञ्च

मनोमयं सर्वरजोत्तमाढ्यम्

कार्या च वीथीः परितस्थितायाम्

गात्रं चतुर्भिः करणैश्च रक्तम्

पादन्त्रिभिर्वेदमयं सितञ्च

पूर्वोक्तमार्गेण लिखेच्च पद्मम्

चतुर्द्दळं वाष्टदळन्द्विषड्कम्

पत्रैश्च षड्त्रिंशतिभिर्युतं यः

संपातयेत्सूत्रगणञ्च तत्र

पात्राच्चतुर्धा गुणितन्द्वथैकम्

पत्रञ्च सूत्रैर्विहितं चतुर्भिः

पीठावनेर्म्मध्यगतञ्च मानम्

आदाय मध्ये विनिधाय सूत्रम्

संभ्रामयेद्वृत्तमतो विहाय

सूत्रान्तरम्मानमथो सुवृत्तम्

शिष्टाच्चतुर्भागमितञ्च गर्भम्

पीतञ्च वासोयमतीवदभ्रम्

तस्माद्वियंगायतमेव केसरम्

त्रयन्त्रयञ्चारुणमैन्दवन्त-

च्छिष्टन्दलानामथ सन्धिदेशम्

सौरं सितञ्चाग्रमथोन्नतं च

मध्यस्थसूत्रस्य च पार्श्वयोर्यौ

सूत्रे तयोस्थाप्य च मानसूत्रम्

तस्माच्च तत्पार्श्वगतस्य चाग्रम्

यथागतन्तिर्यग्गतं हि वृत्तम्

एवञ्च पक्षद्वितये लिखित्वा

पत्राग्रमेवं विलिखेत् बहिस्थम्

पार्श्वद्वयाग्रादथ मध्यमस्य

चाग्रं च वृत्तं च समेति वृत्तम्

तथा च संलिख्य तथैव शेषान्

अंभोजपत्रान् परितस्थितांश्च

कृष्णेन माया रजसाभिपूर्य

तत्सन्धिदेशे हरिमर्च्चयेच्च

सर्वेश्वरं पद्मनाभ ध्रुवमिष्ट्वा च मध्यतः

अनन्ताद्यन्दले न्यस्येत् पातालशयनावधि

किरीटाद्यञ्चतुष्कं यत्पूर्वं गात्रे शिवादिकम्

सौम्ययाम्याप्यगात्रेषु लक्ष्म्यामतिपश्चिमम्

चक्राद्यं कोणदेशेषु चतुष्कं कमलावधि

सरथं गरुडञ्चाग्रे वीथ्यांञ्चक्रादिकान् पुरा

सौम्ययाम्याप्यपूर्वाशावस्थितञ्च द्वयं द्वयम्

लांगलाद्यं परश्वन्तमष्टकन्तद्वदेव हि

याम्यसौम्याप्यपूर्वाशागतं मध्याच्चतुष्टयम्

पाशाद्यं वज्रपर्यन्तं शक्तिस्त्रक्तिचतुष्टये

कालाद्यमुपशोभादि स्थानेष्वर्च्यन्द्विरष्टकम्

शिवादिशिवपर्यन्तयज्ञान्तं परिचिन्त्य च

कालोपि यन्नियन्ता च शास्त्रं विद्याधिका अपि

रुद्राश्शिवः प्रजानां च पतयश्चन्द्र एव हि

एवं हि मुनयस्सप्त जीमूता नागाश्चाप्सरसस्तथा

ओषध्यश्च पशवो यज्ञास्सांगास्सहाखिलाः

ईशनैरृतखण्डस्थौ विद्याऽविद्येऽग्निमारुतौ

अनलानिलखण्डस्थौ द्वारयोर्याम्यसोमयोः

चन्द्रादित्यौ च संकल्प्य प्रत्यक्द्वारगतं जलम्

पूर्वद्वारे धराऩ्न्यस्य भवं कोणचतुष्टये

इन्द्राद्यन्दशकं बाह्ये कुलिशाद्यन्तु तद्बहिः

वैभवीयैर्वृतं पद्ममिदमुक्तं मया भुक्तिमुक्तिफलप्रदम्

गोपनीयं प्रयत्नेन ततो योगं समभ्यसेत्

मध्याह्नभास्कराकारे सर्वैस्संशान्तविग्रहैः

स्मरेत्पूर्वोदितं पद्मञ्चातुरातो जाग्रत्पदस्थन्त्वप्यनिरुद्धञ्च

मन्त्रपम्

परावृत्य शतं बुद्ध्यात्तदभिन्नेन चात्मना

तन्मन्त्रजापसामर्थ्यात्तादाम्यस्थितिबन्धनात्

महिमानुसविज्ञानस्तदीयस्तस्य जायते

अभ्यासाद्वत्सरान्ते तु तदद्वैतसमन्वितः

अथ प्रद्युम्नमन्त्रन्तु परावृत्त्या शतद्वयम्

योयं सोहमनेनैवाप्य तद्वेमौ सदैव हि

एवमेवसमभ्यासान्मतिमान् च्छिन्नसंशयः

तत्प्रभावाच्च तेनैव तथाकाले न जायते

अनेन क्रमयोगेन जपवृद्ध्यापि तेन तु

निखिलञ्चाप्ययीकुर्यान्मन्त्रग्रामं पुरोदितम्

यावदाभाति भगवांस्थाने पूर्वोक्तलक्षणे

प्रलीनमूर्तिरमलोप्यनन्तस्तेजसान्निधिः

चिदानन्दघनश्शान्तोप्यनौपम्योप्यनाकुलः

समाधायात्मनात्मानन्तत्र त्यक्त्वा जपक्रियाम्

ध्यातृध्येयाविभागेन यावत्तन्मयतां व्रजेत्

यदसंवेद्यनिर्मुक्तस्समाधौ लभते स्थितिम्

अभ्यासाद्भगवद्योगी ब्रह्म संपद्यते तदा

इति श्री नारायणात्मके दशमः पटलः

नारायणात्मके वैष्णवे
एकादशः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे
अस्त्रयागं प्रवक्ष्यामि भुक्तिमुक्तिफलप्रदम्
जीवप्राणौ पुनर्जीवं वह्निस्थं हलिना सह
वह्निं वर्मास्त्रकौ प्रोक्तं कालमन्त्रं षडक्षरम्
आविस्सुधी संज्वाल्याद्यैष्षड्भिश्च त्रैश्शिरोन्वितैः
कल्पयेच्च षडंगानि स्वस्वनामकजातिभिः
अहिर्बुध्नि ऋषिस्तस्य शिरसा धार्यते गुरुः
छन्दोक्षरत्वाजिह्वायान्तद्विज्ञेयमनुष्टुभम्
सुदर्शनादिको विष्णुर्देवता हृदि वर्तते
हृदयं बुद्धिगम्यत्वात् प्रणामस्यां नमः पदम्
क्रियते हृदयेनादौ बुद्धिगम्य नमस्क्रिया
तुङ्गात्वास्याच्छिरस्वेस्वे विषयाहरणे द्विठः
शिरोमन्त्रेण चोत्तुङ्गे विषयाहृतिरीरिता
शिखा तेजस्समुद्दिष्टा वषडित्यङ्गमुच्यते
तत्तेजोस्यतनुः प्रोक्ता शिखामन्त्रेण मन्त्रिणा
कचं गृह्णणन्न इत्यस्माद्धातोः कवचसंभवः
हुन्तेजस्तेजसा देहो गृह्यते कवचं ततः

नेत्रं दृष्टिस्समुद्दिष्टा वौषड्दर्शनमुच्यते
दर्शनं दृशि येनस्यातत्तेजो नेत्रवाचकम्
असुत्राासादिकौ धातुस्तत्क्षेपचलनार्थकौ
ताभ्यामनिष्टमाक्षिप्य चालयेत् फट्पदाग्निना
पञ्चैव यस्य मन्त्रस्य भवन्त्यंगानि मन्त्रिणा
सर्वेष्वपि च तन्त्रेषु नेत्रलोपो विधीयते
अंगुलीषु क्रमादङ्गान्यंगुलीभिः प्रविन्यसेत्
अस्त्रं करतले शस्तं विघ्नानामुपशान्तये
त्रिदीप्तभासुरन्तारन्यसेन्मूर्ध्नि त्रिधैव तु
ललाटमुखहृन्नाभिर्जानुपादेषु चाक्षरान्
सर्वांगकललाटाक्षिश्रुतिनासामुखेषु च
गळहृन्नाभिदोर्मूलप्रकूर्प्परतलेषु च
ऊरुजान्वङ्घ्रिपादेषु चक्राद्यं शक्तिपश्चिमम्
शूलेन दिक्षु रक्षाञ्च शक्तित्रयमयेन तु
अंगानि च मुनिच्छन्दो दैवतञ्च पुनर्न्यसेत्
प्रभविष्णुं स्वयं भूत्वा जपेदष्टशतं मनुम्
सर्वाभरणसन्दीप्तविकारभुजभूषितम्
कोटिकोट्यर्कसदृशमथवाष्टभुजं हरिम्
शंखचक्रगदापद्मं सशरमुसलन्धनुः
पाशाङ्कुशौ स्मरेद्दोर्भिर्वहन्तमरिसूदनम्

केशैराकपिलैर्दीप्तमग्निज्ज्वालासमाकुलम्

दशन्तमधरं भीमं विद्युदाकारदंष्ट्रिकम्

क्रूरदृग्भूषणैर्दीप्तैः किरीटाद्यैरलंकृतम्

शाखाद्यै स्वशरीरोत्थैः परितः परिसेवितम्

वैष्णवं पीठमभ्यर्च्य विभुमावाह्य पूजयेत्

अंगैस्वहेतिभिस्तस्य शक्तिभिश्च दिगीश्वरैः

वज्राद्यैर्वसुहस्तन्तं पञ्चावरणमर्चयेत्

लक्ष्मी सरस्वती प्रीती रतिः कीर्तिः क्रमेण च

कान्तिस्तुष्टिश्च पुष्टिश्च कीर्तिताश्चाष्ट शक्तयः

शंखाद्यं शक्तिनिष्ठन्तु क्रमात् केसरकोटिगम्

हृद्याद्यमंगषड्कन्तु पूर्ववद्दळमध्यगम्

शक्त्यष्टकन्दळाग्रस्थं तत्बहिश्च दिगीश्वरान्

वज्राद्यन्तत्बहिस्त्वेवं पूजयेद्वा जगत्पतिम्

विष्णुभागोक्तमार्गेण स्थापयेन्मन्दिरे गुरुः

विष्णुमन्त्रेण यत्प्रोक्तन्तदनेन समाचरेत्

ओन्नम सुदर्शनायेत्यनेनाष्टाक्षरोदितम्

द्वादशार्णं पुरोद्दिष्टं वैभवीये महात्मनः

द्वादशार्णेन निर्द्दिष्टं कर्म तेन समाचरेत्

यज्ञियन्तेन निर्द्दिष्टं षोडशाक्षरविद्यया

विष्णुगायत्र्या प्रोक्तमनया तत्समाचरेत्

ओं सुदर्शनाय विद्महे महाज्वालाय धीमहे तन्नश्चक्रं प्रचोदयात्

ओं नमो भगवते तारासुदर्शनाय इत्यपि

वर्मास्त्रौजरसामन्त्रं षोडशार्कं समुद्धृतम्

स्नानं सप्तदशद्रव्यैः पूर्वोक्तैरेव कीर्तितम्

स्नानकाले च होमे च प्रायश्चित्ते समर्चने

चक्रादिशक्तिपर्यन्तैर्मन्त्रैस्सह समाचरेत्

ओं कालकर्त्रे चक्राय फट्।

ओं विश्वात्मने विश्वप्रदाय पद्माय स्वाहा।

ओं विद्याविद्येश्वरार्चिते गदायै स्वाहा।

ओं शब्दमूर्तये शंखाय स्वाहा।

निधेर्भीमभीषणाय हुंफट् ।

प्राक् भुवनाधिपतये स्तंबभूताय मुसलाय हुं फट् ।

ओं इन्द्रियकोशाय इष्वस्त्राय हुं फट्।

ओं कल्पान्तायानिलघोषाय विद्युल्लसितप्रभाय शाङ्‌र्गाय हुं फट्।

ओं महा मयाबलध्वंसिने नन्दकाय हुं फट् ।

ओं सर्वास्त्रग्रसनपराय चर्माय हुं फट्।

ओं सन्तापकामाय दर्प्पध्वंसिने दण्डाय हुं फट् ।

ओं अज्ञानखण्डकराय परशवे हुं फट् ।

ओं त्रैलोक्यमोहमूर्तये पाशाय हुं फट् ।

ओं सर्वाकर्षणकराय महामायाय अंकुशाय हुं फट् ।

ओं अखण्डितपराक्रमाय मुद्गराय हुं फट् ।

ओं दर्पप्रशमकर्त्रे वज्राय हुं फट् ।

ओं तेजोमालिनिशक्तये हुं फट्।

एते मन्त्रासमुद्दिष्टाः शूल....त्रयात्मकम्

या हेतिरच्युते मध्ये प्रयान्ति परिवार्यताम्

अन्याश्च हेतयस्सर्वास्सर्वास्सर्वं फलप्रदाः

पीताभा कर्णिकास्यारुणतरमरं श्यामळञ्चान्तराळ नेमिश्श्वेताश्च

बाह्ये विरचितशितिरेखाकुलं पार्त्थिवान्तं

चक्रद्वन्द्वं लिखित्वा विशदमतिरथो सौम्ययाम्यञ्च मन्त्री

कुभं संपूर्य सौम्ये प्ररचयतु तथा दक्षिणे होमकर्म

षड्विंशद्च्छदसम्मितैरथ घृतापामार्गकेध्माक्षतै

स्सद्राजीतिलपायसैश्च सकलैर्द्रव्यैर्घृतान्तैः क्रमात्

हुत्वा तद्धुतशिष्टमत्र विधिवत् क्षिप्त्वा प्रतिद्रव्यकम्

प्रस्थार्धं न तु तञ्चपिण्डममलं कुंभोदके मन्त्रवित्

स्थाप्य द्विग्विदक्षिणस्यात् साद्ध्यं कुंभेन तेन

नीराज्यन्तमथ घटं सद्रव्यं बहिरारादष्टमे क्षिप-

ेद्राशौ अन्यादिकमपि सर्वं क्षिपेदथ घटस्य दक्षिणे भागे

हुतशिष्टान्नेन बलिमन्त्रेणानेन मन्त्रवित् कुर्यात्

नमो विष्णु गणेभ्यस्सर्वशान्तिकरेभ्यो बलिं गृह्णन्तु शान्तये नमः

ज्वालादिकान्रोगपरं परान्वा विस्मृत्यपस्मारभवं रुजं वा

रक्षापिशाचग्रहदेवकृतं वा विधिस्त्वयम्मंक्षुहरेद्विकारं

विप्रक्षीरद्रुमत्वन्दुलयपुरकाश्मीरमाखिल्यपामार्ग तुळसीयुगक्रान्ति

दूर्वायवाकैः लक्ष्मिदेवी कुशागोमयकमलवचारोचना

पञ्चगव्यैस्सिद्धेग्नौ कुभसिद्धं मनुजपसहितं भस्मसर्वार्त्थदायी

लक्ष्म्यायुष्करमतुलं पिशाचभूतापस्मारादिकमचिरेण नाशयेच्च

क्षुद्रादीनपि विविधांस्तथोपसर्गानेतस्मादपरतरासमस्तरक्षा

मद्ध्येतारन्तदनु च मनुं वर्णशः कोणषड्के

बाह्ये चाङ्गं लिखतु कनकेरौप्यके वापि ताम्रे

पाषाणे वा विधिवदभिजप्याथ संस्थापितं

तच्चक्रं चोरग्रहरिपुभयध्वंसिरक्षाकरञ्च

अस्त्रयागमिति प्रोक्तं प्रसङ्गात् कर्म वै मनाक्

चतुर्विंशतितत्वानां विस्तारमधुनोच्यते

प्राणापानावुदानश्च समानो व्यान एव च

अन्तरात्मेति चाप्येते नियताः पञ्चवायवः

वाङ्मनो बुद्धिरित्येभिस्सार्धमष्टात्मकञ्जगत्

त्वग्घ्राणश्रोत्रचक्षूंषि रसनं वाक्चसंयता

विशुद्धञ्च मनो यस्य बुद्धिश्चाव्यभिचारिणी

अष्टौ यस्याग्नयोप्येतेदहन्तेह मनस्सदा

स तु ब्रह्मसदो याति यस्मात् भूयो न विद्यते

एकादशन्तु यान्याहुरिन्द्रियाणि विशेषतः
अहंकारप्रसूतानि तानि वक्ष्यामि नामतः
श्रोत्रत्वक्चक्षुषी जिह्वा नासिका चेति पञ्चमम्
पादपायुरुपस्थञ्च हस्तौ वाग्दशमी भवेत्
इन्द्रियग्राम इत्येष मनश्चैकादशं भवेत्
श्रोत्रादीनि तु पञ्चाहुर्बुद्धितत्वानि तत्वतः
अवशिष्टानि चान्यानि कर्मयुक्तानि यानि तु
(.....मनोज्ञेयं बुद्धिर्द्वादशमी भवेत्)
आकाशं प्रथमं भूतं श्रोत्रमद्ध्यात्ममुच्यते
अधिभूतं तथा शब्दो दिशश्चात्राधिदैवतम्
द्वितीयं मारुतं भूतन्त्वगद्ध्यात्मञ्च विश्रुतम्
स्प्रष्टव्यमधिभूतन्तु विद्युत्तत्राधिदैवतम्
तृतीयं ज्योतिरित्याहुश्चक्षुरद्ध्यात्ममिष्यते
अधिभूतं तथा रूपं सूर्यस्तत्राधिदैवतम्
चतुर्थमापो विज्ञेयं जिह्वा चाद्ध्यात्ममिष्यते
अधिभूतं रसञ्चात्र सोमस्तत्राधिदैवतम्
पृथिवी पञ्चमं भूतं घ्राणञ्चाद्ध्यात्ममिष्यते
अधिभूतं तथा गन्धं पायुस्तत्राधिदैवतम्
एषु पञ्चसु भूतेषु चतुष्टयविधिस्मृतः
अतः परं प्रवक्ष्यामि सर्वं त्रिविधमिन्द्रियम्

पादावद्ध्यात्ममित्याहुर्ब्राह्मणास्तत्वदर्शिनः
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम्
अवाग्गतिरपानश्च वायुरद्ध्यात्ममिष्यते
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम्
प्रजनस्सर्वभूतानामुपस्थोद्ध्यात्ममुच्यते
अधिभूतं तथा शुक्लन्दैवतन्तु प्रजापतिः
हस्तावध्यात्ममित्याहुरद्ध्यात्मविषये जनाः
अधिभूतं तु कर्माणि शक्रस्तत्राधिदैवतम्
वैश्वदेवी मनः पूर्वा वागद्ध्यात्ममिहोच्यते
ते वक्तव्यमधिभूतञ्च वह्निस्तत्राधिदैवतम्
अद्ध्यात्मम्मन इत्याहुः पञ्चभूतानुचारकम्
अधिभूतञ्च मन्तव्यञ्चन्द्रमाश्चाधिदैवतम्
अद्ध्यात्मं बुद्धिरित्याहुष्षडिन्द्रियविचारिणी
अधिभूतन्तु विज्ञेयम्महांस्तत्राधिदैवतम्
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च
सर्वाण्येतानि सन्धाय मनसा संप्रधारयेत्
क्षीणे मनसि सर्वस्मिन्नाजन्मसुखमिष्यते
ज्ञानसम्पन्नसत्वानां तत्सुखं विदुषां पदम्
सवज्रं स्वेन बीजेन पीतन्तुर्यश्रलक्षणम्
हेमाब्जे भूषितम्मध्ये क्ष्मातत्वं तदनन्तरम्

अथ क्ष्मामण्डलोर्ध्वस्थमर्धेन्दुसदृशं सितम्
पुरं पद्माङ्कितं स्मृत्वा सितपद्मोदरं महत्
तेजोमयन्तदूर्ध्वे तु त्रिकोणं वा भवेत् पुरम्
रक्तज्वाला समाकीर्णं स्वस्तिकैरुपशोभितम्
मध्ये रक्तारविन्दाढ्यन्तदूर्ध्वे वायुमण्डलम्
परं तच्चासितं वृत्तन्नीलांबुदविभूषितम्
नीरूपं खन्तदूर्ध्वे तु स्मरेच्छब्दैकलक्षणम्
ध्यायेत्तन्मध्यतः पद्मं सूर्यमण्डलसन्निभम्
तत्कर्णिकादराकाशे नानरत्नरुचस्ततः
संस्मरेत् कमलाकारञ्चित्तं वृत्तमयं हि यत्
तदूर्ध्वेऽमृतगर्भं तु शीतांशुकरकोटिवत्
पद्मं बोद्धम्महाभासं सप्तमं परिकीर्तितम्
काण्डमेवं सुषुम्नायास्तानि स्युर्वेणुपर्ववत्[१५३]
तानि जित्वा महायोगी प्राप्नुयाद्वैष्णवं पदम्
भुवनाध्वा पदाध्वा च मन्त्राध्वा तत्वसंज्ञकः
कलाध्वा वर्णसंज्ञन्तु ततो ज्ञानमुदाहृतम्
एषु तत्वेषु तारात्मा तानतीत्य व्यवस्थितः
अकारश्चाप्युकारश्च मकारो बिन्दुरेव च
नादश्शक्तिश्च शान्तश्च प्रणवात्मा प्रकीर्तितः

[153] PL स्युर्वेण पर्ववत्

विषयस्थानि सर्वाणि वर्तमानानि भागशः

महानात्मा तथा व्यक्तमहङ्कारं तथैव च

इन्द्रियाणि दशैकञ्च महाभूतानि पञ्च च

विशेषाः पञ्चभूतानामित्येषा वैदिकी श्रुतिः

चतुर्विंशतिरित्येव तत्वानां संप्रकीर्तिता

तत्वानामथ यो वेदस्सर्वेषां प्रभवाप्ययौ

सधीरस्सर्वभूतेषु नमोहमधिगच्छति

अलिङ्गग्रहणो नित्यं क्षेत्रज्ञो निर्गुणात्मकः

तस्मादलिङ्गः क्षेत्रज्ञः केवलज्ञानलक्षणः

अव्यक्तं क्षेत्रमुद्दिष्टन्तद्वित् क्षेत्रज्ञ उच्यते

उभयन्तद्विदित्वादौ विष्णोस्थापनमाचरेत्

दीक्षितस्याधिकारस्तु तस्माद्दीक्षा मयोच्यते

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे

अनुग्रहार्थं शिष्याणान्दीक्षाम्मन्त्रसमन्विताम्

त्रयाणामपि मन्त्राणाम्मयोक्तन्तत्वसंग्रहम्

क्रियामन्त्रास्तु लिख्यन्ते यैः क्रिया सुकृता भवेत्

ओं यं भूतानि वियुद्ध्वं हुं फट् ।

ओं यं भूतान्यायात। हां ओं यं भूतानि युद्ध्वं हुं फट्।

ओं यं भूतानि संहरत स्वाहा। ओं अं नमो भगवते वासुदेवाय ओं वौषट्।

ओं वां कर्मेन्द्रियाणि, ओं दें ज्ञानेन्द्रियाणि, ओं सुं गन्धतन्मात्रे वियुंक्ष्व।

ओं वां रसतन्मात्रे वियुंक्ष्व।

ओं तें रूपतन्मात्रे वियुंक्ष्व।

ओं वं स्पर्शतन्मात्रे वियुंक्ष्व ।

ओं गं शब्दतन्मात्रे वियुंक्ष्व।

ओं भं नमः (मनः) वियुंक्ष्व।

ओं मों अहङ्कार वियुंक्ष्व।

ओं नमः बुद्धे वियुंक्ष्व।

ओं ओं प्रकृते वियुंक्ष्व हुं फट् ।

ओं प्रकृते आयाहि ओं प्रकृते युंक्ष्व।

ओं प्रकृते संहर स्वाहा।

ओं अन्नमो भगवते वासुदेवाय ओं वौषट्।

यं गन्धतन्मात्रे वियुंक्ष्व।

णां रसतन्मात्रे वियुंक्ष्व।

यं रूपतन्मात्रे वियुंक्ष्व।

रां स्पर्शतन्मात्रे वियुंक्ष्व।

नां शब्दतन्मात्रे वियुंक्ष्व।

मों नमः वियुंक्ष्व।

नमः बुद्धे वियुंक्ष्व।

ओं प्रकृते वियुंक्ष्व।

ओं प्रकृते आयाहि। ओं प्रकृते वियुंक्ष्व। ओं प्रकृते संहर स्वाहा।

ओं वौषट्।

ओं वें पृथिवी वियुंक्ष्व। वें पृथिवी आयाहि। ओं पृथिवी वियुंक्ष्व।

ओं पृथिवी संहर।

ष्णं वरुण वियुंक्ष्व।

विं अग्ने वियुंक्ष्व।

मों वायो वियुंक्ष्व।

नं आकाश वियुंक्ष्व।

आयाहि युंक्ष्व।

संहर स्वाहा ओं वौषट्।

संस्कृतेऽग्नौ चरुं विद्धां श्रपयेन्मूलमूर्तिभिः

स्थण्डिले देवमाराध्य चरोरर्धन्निवेदयेत्

कुंभेशाय ततोप्यर्धञ्चतुर्धा विभजेत् परम्

मूलेनजुहुयादग्नौ त्रयमाज्यपरिप्लुतम्

पीत्वा गव्यं गुरुश्शेषं शिष्येण सह भक्षयेत्

भक्षयेत् दन्तकाष्ठन्तु शिष्येणास्त्राभिमन्त्रितः

विष्णुपार्षदेभ्यस्तु बलिं माषोदनैः किरेत्

संहृत्योत्पाद्य संस्पृश्य बद्ध्वा नेत्रे प्रवेशयेत्

प्रदक्षिणक्रमादग्रे देवस्यास्थाप्य पुत्रकम्

पुष्पैरापूर्य शिष्यस्य गुरुः करपुटं कृतैः

(जेशिष्यक्षिपेदाचार्य चोदनां)

नेत्रबन्धं विमुच्यास्मै नाम दद्यात् गुरुस्ततः

शिखान्तं सम्मितं सूत्रं पादाङ्गुष्ठात्रिसत्गुणम्

प्रकृतिं प्रक्रियाभेदैस्संस्थितां तत्र चिन्तयेत्

नेत्रप्राकृतिकान् पाशान् ग्रथित्वा तत्वसंख्यया

कृत्वा शरावे तत्सूत्रं कुण्डपार्श्वे निधापयेत्

ततस्तत्वानि सर्वाणि ध्यात्वा शिष्यतनौ न्यसेत्

भेदैर्द्वादशधा सप्तधा पञ्चधापि वा

इह द्वादशधाख्या वा वासुदेवांगसंख्यया

नारायणस्य चाङ्गैस्तु सप्तधा वाष्टधा स्मृतः

विष्णोरङ्गैस्तु विज्ञेयः पञ्चधा विहितन्त्विति

एकैकं शतहोमेन क्रमात् सन्तर्प्य सृष्टिपान्

देवाग्रे दर्भशय्यायां स्वपेच्छिष्यैर्गुरुर्निशि

प्रातस्नात्वा समभ्यर्च्य देवमुद्वास्य देशिकः

भद्रकं वाथ चक्राब्जं परमानन्दमेव वा

अथाब्जनाभभवनमालिखेत्सुसमाहितः

तस्मिन्समर्चयेद्देवं काममूर्तिं स्वशक्तितः

प्रणिपत्य च कुंभेशं सूत्रमादाय देशिकः

देवस्याग्रे प्रविन्यस्य शनैर्विज्ञापयेदिदम्

संसारार्णवमग्नानां पशूनां पाशमुक्तये

त्वमेव शरणं देव सदा त्वं भक्तवत्सल

देवदेवानुजानीहि प्राकृतैः पाशबन्धनैः

पाशितान् मोक्षयिष्यामि त्वत्प्रसादात् पशूनिमान्

तस्याज्ञया समादाय मायासूत्रन्तथा शिशुम्

निवेश्य कुण्डपार्श्वे तु दक्षिणे चात्मनस्वयम्

प्रविशेदासनं रम्यं सुप्रच्छन्नं कुशांबरैः

स्वमूलेन च सृष्टीशमाहुतीनां शतेन तु

उदासीनमथासाद्य पूर्णाहुत्या तु देशिकः

शुक्लं रजस्समादाय मूलेनशतमन्त्रितम्

सन्ताड्य हृदयन्तेन हुं फट्कारान्तसंयुतैः

वियोगपदसंयुक्तैर्बीजैः पादादिभिः क्रमात्

पृथिव्यादीनि तत्वानि विश्लेष्य जुहुयात्ततः

वह्नावखिलतत्वानामालये व्याहृते हरौ

लीयमानं क्रमात्सर्वान्तच्चाध्वानं स्मरन् बुधः

ताडनेन वियुक्तन्तदादायापाद्य साम्यताम्

प्रकृत्याकृत्य जुहुयाद्यथोक्ते जातवेदसि

शुद्धं ततस्समुद्धृत्य पूर्णाहुत्या च देशिकः

सन्धयेद्धि परे तत्वे यावदव्याकृतं क्रमात्

तत्परं ज्ञानयोगेन विलाप्य परमात्मनि

विमुक्तबन्धनं जीवं परस्मिन्यव्यये पदे

निवृतं परमानन्दे शुद्धे बुद्धे स्मरेत् बुधः

दद्यात् पूर्णाहुतिं पश्चादेवन्दीक्षा समाप्यते

एवमष्टाक्षरेणैव दीक्षाकार्या विजानता

विष्णुमन्त्रेण या दीक्षा वक्ष्यते सापि भेदतः

पूर्वं कृत्वा तु संस्कारं गर्भाधानादिकं क्रमात्

व्रतबन्धान्तमाचार्यन्तत्वेन परमेण तु

एकैकन्दशहोमेन ततस्नात्वा विशोधयेत्

वेकारादिषु तत्वानि पञ्चभूतात्मकानि वै

ध्यात्वा शिष्यशरीरे तु षष्ठं क्षेत्रज्ञलक्षणम्

होमेन शोधयित्वान्ते पूर्णया योजयेत् परे

पञ्चभूतस्वरूपेण तत्र माया व्यवस्थिता

षष्ठन्तु परमन्तत्वमबद्धं परमार्थतः

न स्वभावस्य विच्छित्तिर्भवेदग्न्योष्णवद्यतः

तस्मात्घटादिवद्बन्धो व्योमवत् परमं पदम्

एवं ज्ञात्वा तु मेधावी व्यतिरिक्तं निरञ्जनम्

घटवद्यत्स्मृतो बन्धस्तं होमेन विशोधयेत्

पृथिव्यादिसमारभ्य वेकाराद्यैस्तु पञ्चभिः

एकैकं शतहोमेन क्रमात् तत्वानि शोधयेत्

पञ्चपूर्णाहुतीर्दद्यात् बन्धच्छेदं च भावयेत्

क्षेत्रज्ञशतहोमान्ते मयाबन्धविवर्जितम्

ध्यायन् पूर्णाहुतिन्दद्यान्मुक्तिदीक्षेयमुत्तमा

पुरुषं प्रकृतिं शुद्धमैश्वरे धाम्नि संस्थितम्

स्वगोचरीकृताशेषभोगमुक्तौ कृतास्पदम्

ध्यायन् पूर्णाहुतिं दद्याद्दीक्षेयन्त्वाधिकारिणी

दीक्षितस्याभिषेकन्तु कर्तव्यन्तत्क्रमं ब्रुवे

दीक्षामन्त्रेण मन्त्रज्ञो मध्यमं कलशन्यसेत्

प्रणवेन तु पूर्णस्थं विष्णुबीजेन दक्षिणम्

द्वादशाक्षरबीजेन पाश्चात्यमथोत्तरम्

पूरयेद्विष्णुगायत्र्या तैरेतानभिमन्त्रयेत्

सृष्टिमार्गेण तत्वैस्तैर्मन्त्रैस्तु शतं शतम्

हुत्वाज्यं सेचयेत्तेषु संपातं कलशेषु च

अभिषिक्तं कृताचान्तं शुक्लांबरधरं शुचिम्

देवाग्रे स्थापयित्वा तं पीठे पूर्ववदर्चिते

योगपट्टकमुष्णीषं दत्वा चैवाङ्गुलीयकम्

अधिकारपदं तस्मै ततस्सर्वं निवेदयेत्

अनुग्राह्यास्त्वया शिष्या स्थापनीयाश्च देवताः

पूजनीयो महाविष्णुर्गुरवस्साधवस्सदा

इत्युक्त्वो गुरुणाशिष्य उत्थायाभ्यर्च्य तं गुरुम्

दक्षिणां प्रददेच्छक्त्या स्वात्मानञ्च निवेदयेत्

तन्त्रं दत्वा स्वशिष्येभ्यो व्याख्यां कुरु गुरुर्वदेत्
साधकाय प्रदातव्यः साध्यमन्त्रस्तु केवलः
देवस्य पुरतः स्थाप्य पुष्पाक्षतयुतञ्जलम्
चुळुकं पूरयित्वा तु मन्त्रमुच्चार्य तत्करे
प्रदद्यात् सिद्ध्यतां शीघ्रन्तवेष्टम्मन्त्रजञ्जलम्
इति दीक्षा सामाख्याता मया तन्त्रानुसारतः
साधकानां हितार्थाय गोपनीया च साधकैः

इति नारायणात्मके एकादशः पटलः

नारायणात्मके वैष्णवे
द्वादशः पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे

(प्रस..न्त्रनाथस्य पूजनं कथयामि ते)

चतुर्भिश्चतुर्भिश्च पुनरष्टाक्षरैरपि

षड्भिष्षड्भिश्चतुर्भिश्च क्रमादंगानि कल्पयेत्

ब्रह्मा ऋषिस्त्वनुष्टुप् छन्दो वै देवता स्वयम्

सिंहाकारमुखं रौद्रं विद्युत्सन्ततिवत्समम्

अट्टहासं प्रकुर्वाणं दीप्तजिह्वं सुदंष्ट्रिणम्

ह्रस्वनादं सुवृत्ताक्षं पद्मकिञ्चल्कपक्ष्मकम्

अतिरक्तकपोलाढ्यं सिंहश्रोत्रम्महाहनुम्

अग्नीन्दुसूर्यनयनं कुटिलभ्रूविराजितम्

प्रकीर्णाकुलसंयुक्तं किरीटमकुटोज्वलम्

चक्रशंखधरं शुभ्रं वलयांगदभूषणम्

श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्

हारग्रैवेयसंपूर्णं चारुग्रीवाविराजितम्

लसदौदरिकाबद्धभास्वरं वेदिमद्ध्यकम्

विस्तीर्णकटिसंलग्नपीतकौशेयवेष्टनम्

रक्तकाञ्चीगुणोपेतपृथुवृत्तोरुमण्डलम्

अनन्तभोगिभोगाभुजान्वासक्तकरद्वयम्

क्रमवृद्धलसद्वृत्तरक्तजंघाविराजितम्

गूढगुल्फलसद्रक्तप्रपदा जितकच्छपम्

तनु दीर्घाङ्गुलं भास्वन्नखराजिविराजितम्

रोमकूपेषु संस्विन्नस्सुधाबिन्दुविभूषितम्

अमृतार्द्रमिति ध्यायेन्मध्यगन्त्वजशर्वयोः

एवं ध्यात्वा महामन्त्रं वसुलक्षं जपेच्छुचिः

ततः संपूजयेद्देवं नियतन्नियतेन्द्रियः

पूर्ववत् पीठमभ्यर्च्य तत्रावाह्यार्घ्यपूर्वकम्

ध्यात्वा समर्चयेद्देवं गन्धपुष्पादिसाधनैः

दिग्विदिक्षु ततोङ्गानि वैनतेयं विभोः पुरः

पृष्ठेनन्तं शिवं सौम्ये दक्षिणे च चतुर्मुखम्

श्रियं ह्रीन्धृतिञ्च पुष्टिञ्च कोणेष्वग्न्यादिषु क्रमात्

इन्द्रादींश्च तदस्त्राणि शेषं सर्वन्तु पूर्ववत्

एवं वा पूजयेद्देवं तदङ्गैर्मूर्तिशक्तिभिः

कलाद्यैर्नारदाद्यैस्तु लक्ष्म्याद्यैस्तु सुधाधिपैः

कालो जीवन्तथा प्राणः कर्म प्रकृतिरेव च

विश्वकर्मा विधिश्चित्रगुप्तो विश्वस्य साक्षिणम्

नारदस्सनकस्कन्दो याज्ञवल्क्योङ्गिरा भृगुः

कपिलोश्वगिरश्चैव योगिनोष्टौ प्रकीर्तिताः

मूर्ध्नि भ्रूमध्यदृक्श्रोत्रनासाग्ररसनागतः
करसन्ध्यग्रहृत्पार्श्वपृष्ठोदरकटिर्गुदम्
पत्सन्ध्यग्रेषु सर्वांगन्न्यसेदक्षरपद्धतिम्
नवद्वारेषु मूर्ध्नि विन्न्यसेद्दशमेकयुक्
किरीटम् वनमालाञ्च श्रीवत्सं कौस्तुभं क्रमात्
मूर्ध्नि कण्ठकुचोर्ध्वस्थं वामदक्षिणभेदतः
लक्ष्मीं पुष्टिञ्च तुङ्गादि गुल्फान्तं पार्श्वयोर्न्यसेत्
चक्रं शंखं च भुजयोर्न्यस्य मुद्राः प्रबन्धयोः
अंगुष्ठेन कनिष्ठान्तन्नामयित्वाङ्गुलीत्रयम्
ऊर्ध्वं प्रसार्य द्रष्टव्यं मुद्राख्यं गणसंज्ञकम्
बीजत्रययुतं मन्त्रं ध्यायन् नित्यं जपेदिमम्
उद्धरेत् त्रिस्वरं बीजं प्राणजीवा समुद्धरेत्
इराभ्यां संपुटीकृत्य पृथग्विन्दु निवेशयेत्
प्रतिमासममावास्याम्मण्डले देवमर्चयेत्
अष्टाधिकसहस्रं तु जपेत्तस्याग्रतस्थितः
ब्राह्मणान् भोजयेत् भक्तान् सहस्रं जुहुयात्तिलान्
तिलांश्च दक्षिणान्दद्यात् ब्राह्मणेभ्योऽपि शक्तितः
एवमिष्ट्वा हरिं विप्राच्छुक्रपाशे शतं शतम्
उत्फुल्लैर्युत्पलैरग्नौ घृताक्तैः कार्मुको हुनेत्
विप्रेभ्यः प्रददेत् व्रीहीं मोक्षोपायं वदामि ते

हृत्पुण्डरीकमध्यस्थं स्मरेन्मन्त्रं समाहितः

रोमकूपगतैस्सर्वैरन्तर्ज्वालाशतावृतम्

तन्मयञ्च स्वचैतन्यं कृत्वा तद्वह्निरश्मिभिः

भूतदेहं दहेत्कृत्स्नं तद्वियुक्तस्तु साधकः

मुक्ताण्ड इव पक्षीश आस्ते मन्त्ररूपधृक्

अमन्त्राकृतिं स्वां वै ध्यायेत्परिणतां शनैः

तेजो गोलकसंकाशां सर्वांगावयवोसितां

तत्तेजोगोलकं पश्चात् बृहत्परिमितन्त्वपि

सर्वांगं शब्दरूपं तु भावनीयं हि चिन्मयम्

तस्मादप्यभिमानन्त्वप्यस्मिताख्यं शनैश्शनैः

विनिवार्य यथा शश्वत् ब्रह्म संपद्यते स्वयम्

मोक्षोपायमिति प्रोक्तं रक्षामार्गमथोच्यते

विप्रक्षीरद्रुमत्वक् च गोदन्तु पुरुकुंकुमैः

निशारोचनमालेयैस्साधितं समसंख्यया

भस्मेदं पञ्चगव्याग्नौ मेषक्षीरहुतान्नृणाम्

श्रीकरं सर्वदुःखघ्नं वन्ध्यास्त्रीणाञ्च पुत्रदम्

सर्वग्रहनिपीडघ्नमायुष्यं सुखदं नृणाम्

इति श्री नारायणात्मके द्वादशः पटलः समाप्तः ८२-३

श्रीमहागणपतये नमः श्रीकृष्णाय नमः

(आदर्शदोषाम्मतिविभ्रमाद्वा श्रुत्यर्थहीना लिखितं मया यत्

तत् सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यन्ति हि ये लिखन्ति

पाद्याार्घ्याचमनगव्यैर्घृतदधिपयो माक्षिकोष्णो...यैरापूर्या मार्जनाभिः फलयवमणिभिर्लोहतौ कुंभां पुष्पों पुष्पोपमानामव..कयुतैरक्षरैर्न्नाळिकेरैरिक्षूत्थैस्थण्डिलादि्भस्नपनर्मित हरेम्मध्यतस्नायतोये)

नारायणात्मके दौर्गे
प्रथमः पटलः

श्रीमहागणपतये नमः

दौर्गपटलः प्रारभ्यते

त्रयोदशः पटलः

मूलात्मिकायाः प्रकृतेर्यागो नोक्तस्त्वया मुने
वद मे श्रोतुमिच्छामि तन्न श्रान्तोऽसि चेद्गुरो
नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे
दुर्गां देवीं च वक्ष्येहं प्रकृतेर्यागमुत्तमम्
देवतेह परिज्योति ज्योतिषां कारणं पुमान्
स एव बहुधा लोके मायया भिद्यते स्वयम्
पुरुषाख्यस्स्वयं मायां प्रकृतिं व्यज्य सद्द्विधा
पुरुषप्रकृतित्वेन सदा स भगवान् स्थितः
इच्छाज्ञानक्रियाभेदैस्त्रिधा भूयो व्यवस्थितः
ऋग्यजुस्सामथर्वाख्यविद्याभिस्सचतुर्विधः
पञ्चधा परमेष्ठ्यादिशक्तिभिस्संस्थितो विभुः
जातवेदसे तामऽग्ने विश्वानि पृतनाजितम्
पञ्चदुर्गा इति प्रोक्तास्ताभिर्दुर्गा प्रदर्शिता

माया लक्ष्मी च वाग्रूपा वै रवी च सरस्वती

पञ्चसांख्या समुद्दिष्टा दुर्गायाः पारमेश्वरे

देव एव परोज्योति शक्तिरित्यभिधीयते

सा तत्वसंज्ञा चिन्मात्रज्योतिषस्सन्निधेस्तदा

विजिगीर्षुघनीभूता क्वचिदभ्येति बिन्दुकाम्

कालेन पच्यमानस्तु सबिन्दुर्भिद्यते त्रिधा

स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते

स बिन्दुनादबीजत्वभेदेन च निगद्यते

बिन्दोस्तस्माद्भिद्यमानात् त्रयो व्यक्तात्मको भवेत्

सरवश्रुतिसंपन्नैश्शब्दब्रह्मेति कथ्यते

योदितः प्रथमो भावो मूलाधारात्तु संस्मृतः

पराख्यो नाभिगः पश्चात् पश्यन्त्याख्यः सहृत्गतः

मध्यमाख्यस्सवस्थो वै वैखर्याख्यं स पञ्चधा

उदयं पञ्चशक्तीनां विद्वद्भिः परिकीर्तितम्

ततस्तु वैष्णवीं शक्तिं तद्रूपाञ्च तदात्मिकाम्

यजेत विधिवन्नित्यं मनोवाक्कायकर्मभिः

परशब्दाह्वयो जीवो ज्योतिः प्राण उदाहृतः

अव्यक्तं बुद्ध्यहङ्कारौ तन्मात्राणि च पञ्च वै

एकादशेन्द्रियैर्भूतैः क्षेत्रं प्राणमयं विदुः

चत्वारि करणान्यस्य प्रकृतेर्गुणभेदतः

लिङ्गात्मानञ्च कर्तारं नरं चित्तं हि तानि तु
सा सङ्कल्पविकल्पात्मा परेधाम्न्यनुषङ्गिणी
चित्ताख्या सा तदा ज्ञेया ज्ञातारमहमित्यसौ
अहंकृतिस्तदात्मानं वेत्ति निश्चिनुते द्वयम्
तदा सा बुद्धिसंज्ञा स्यात्तत्रैव प्रविलीयते
तदा सा चिद्घना पूर्णा यदा व्यञ्जयितुं स्वयम्
यतेत करणैर्बिन्दोस्फुटोव्यक्तात्मको रवः
तस्मात्तदुद्भवं प्रोक्तं मया ते षडध्वनः
ओं रागकलानिष्ठालोमात्मविद्यासदाशिवमायाकालेचाथ नियति
कलाविद्येति चञ्चलैः रागश्चैव तथाव्यक्तन्त्रिगुणं महदादयः
तारांशविभवास्सर्वे ततो मूलमिदं विदुः
हाल्लेहितं तु यत् बीजन्तारवत् करणात्मकम्
द्विनवञ्चेन्धिकापीठे बिन्दुना तद्विना च तत्
ऊद्ध्वाग्निपृष्ठशेषाभ्यान्त्रितीयन्तु द्वितीयके
ओम्मादेतत्रयोक्तमष्टमञ्च द्वितीयकं
तत् पञ्चमन्ततष्षष्ठषोडशेनात्समन्वितम्
एवमष्टाक्षरो मन्त्रो दुर्गायास्तु समुद्धृतः
व्योम्ना वह्निगतेनैव दीर्घस्वरयुजा क्रमात्
विन्दुनामांगजात्यंशबीजेनांगानि कल्पयेत्
भुवनाद्यद्ध्वषड्कानि हृदयाद्यंगेषु कल्पयेत्

मूलमन्त्रे परंज्जोतिरिरिति दीक्षादिषु स्मरेत्

उद्धरेत् प्रणवं पूर्वं शक्तिबीजमनन्तरम्

द्वादशञ्च महामायां मायाञ्चतुर्द्दशमनुक्रमात्

विन्दुनादविस्सर्गैस्तु भूषयेच्च त्रयं क्रमात्

उद्धरेत् पञ्चमात्रन्तु षष्ठान्तं सत्रयोदशम्

भगवति च दुर्गेति ततो दुर्गतितारिणी

माये महादिमायेऽथ फणावले महिषासुरः

विनाशनि दुष्टभयंकरि विन्ध्यपुनश्चनिलये

महापुनर्ज्जीवञ्चनोपरि चानलं मदिनि

देवासुरदैवायुवीञ्चणात् परं पूजिते वरदे नारायणि दामोदरप्रिये

हल्लेखायुगळन्तद्वद्विष्णुं बीजं यथाक्रमं भूतग्रहादि वेताळदुष्टाद्यं

राक्षसेति च पिशाचान्त्रासयद्वन्द्वं बन्धमारय वीप्सये

भक्तादिवत्सले भक्तप्रिये परबलमथिनीति पुनश्शत्रुकृन्तनीति

निर्वङ्कसौभाग्य जयवित्तेषु स्थातव्यं हि प्रदे पदं

यशोवत्यायुष्यप्रदे कीर्तिश्रीपदयोः प्रदे सर्वं शान्त्योस्तद्योज्य महाभूते

महाबले प्रथमेन द्वितीयेन तृतीयेनावरेण च

स्वरेणभिन्नं व्योमार्णं बिन्द्वन्तं पुनरुद्धरेत्

त्रिवारम्मूलबीजन्तु महामाये नमः पदम्

अष्टाधिकं षष्ट्यधिकं शतमक्षरसंख्यया

उद्दिष्टा परमाविद्या सा विना पञ्चशक्तिभिः

विष्णुभूतायै विद्महे चक्रहस्तायै धीमहे तन्नो दुर्गा प्रचोदयात्

प्रणवद्वयमध्यस्थं बीजमन्त्रोपचारकम्

वैष्णवी सर्वशान्तिकरी सर्वासुरमर्द्दिनी सर्वदुष्टनिर्मन्थिनी

सर्वपापप्रणाशिनी यानप्रियवाहिनी दुर्गादेवी प्रसादं करोतु

सिंहवाहिनी चक्रायुधिनी शंखघोषणी महिषासुरमुख्यप्रमर्द्दिनी

दुर्गादेवी प्रसन्नतां शीघ्रमापादयतु आर्यावर्तिनी सर्वायुधसाधिनी

सर्वविघ्नप्रशमनी सर्वनाशप्रशमनी रौद्ररूपिणी रौद्रकर्मकरी

दुर्गादेवी शीघ्रं सर्वं संपादयतु स्त्रीवल्लभायै मुख्यरूपायै

सर्वदोषप्रशमनायै सर्वभूतगणाधिपतये सर्वास्त्रधरायै सर्वमूर्तिधरायै

सर्वशुद्धकरायै सर्वव्यापारयुक्तायै दुर्गायै देव्यै परायै शान्तिरस्तु

जातवेदाय प्रोक्ता नवमन्त्राय यथाक्रमं

यागमन्त्रमथोवक्ष्ये तेन कर्म समाचरेत्

ओं दुर्गारूपिणि कुमारीरूपिणि आर्यावर्तिनि मायारूपिणि

उत्सववासिनि यागभक्तकारिणि सर्वमन्त्रव्यापिनि सर्वफलप्रदायिनि

सर्वक्रियाभक्तिनिसर्ग्गदोषप्रमर्द्दिनि सर्ववरदायिनि भगवति

प्रसन्नमापादयतु ओं ह्रीं ओं स्वाहा

अङ्गुलीषु च के वक्त्रे हृत्गुह्यकरणेषु च

ऊर्ध्वप्राग्याम्यसौम्याप्य वदनेषु च पञ्चभिः

दुर्गाभिस्तद्वदेवेष्टं हृल्लेखाद्यैस्तु पञ्चभिः

हृल्लेखा गगना रक्ता चतुर्थी च कराळिका

महोच्छुष्मा समाख्याता पञ्चबीजैरलंकृता

गायत्रीमथ सावित्रीं विन्यसेच्च सरस्वतीम्

गळे वामादिकुचयोर्वाङ्मायाद्यैस्त्रिबीजकैः

वामांसहृदयांसेषु ब्रह्माणं विष्णुमीश्वरम्

अळिकांसपार्श्वनाभिपार्श्वांसाळिकहृत्सु च

वामादिसम्यग्विन्यस्येन्मातॄणामपि मण्डलम्

विन्यसेच्च रमासूक्तं मूलञ्च करदेहयोः

व्यापकं विन्यसेत्तारं हृल्लेखां कावटे गळे

मुखहृन्नाभिजान्वाख्यपदे मन्त्राक्षरान् न्यसेत्

अंगानि करशाखासु नेत्रमग्रेषु तैजसम्

ज्ञानाद्यन्नेत्रपर्यन्तं हृदादिषु विचिन्तयेत्

अरिशंखलसत्बाणकार्मुकोद्यत्करांबुजम्

अरिशब्दासिचर्मोद्यत् करपल्लवशासिनीम्

चतुर्भुजां वाष्टहस्तां श्यामळां वारुणोज्वलाम्

त्रिशृङ्गमकुटोपेतान्नीलकुञ्चितमूर्द्धजाम्

नेत्रत्रयलसद्वक्त्राद्विनेत्रां वा शुचिस्मिताम्

सुदतीं सुकपोलाढ्याञ्चारुकुण्डलमण्डनाम्

दन्तज्योत्स्नावितानेनप्रकटीकृतदिङ्मुखाम्

चारुग्रैवेयसंपूर्णाञ्चारुग्रीवाविराजिताम्

हारतारावलीपूर्णवक्षोरुहभरानताम्

वेदिमध्यपृथुश्श्रोणीञ्चारुजंघान्नखोज्वलाम्

रक्तांबरां सतीन्ध्यायेद्विष्णुरूपांञ्च विष्णुवत्

दुर्गान्नारायणीं भक्त्या यजेदहरहस्सुधीः

अर्घ्यपात्रन्तु मूलेन संपूर्यामन्त्र्य वर्णशः

संप्रोक्ष्यादि्भसुगन्धेन ब्रह्मलिंगानि कल्पयेत्

सोहमात्मेति तं ध्यायेदष्टोत्तरशतं सुधीः

प्रकृतिं विन्यसेन्मध्ये दुर्गाबीजेन दीपिताम्

कामबीजेन कूर्मन्तु ब्रह्मेन्द्रनयनेन्दुभिः

सौम्या भद्रा जयार्यास्युर्न्नामाद्यर्णास्तु गात्रकाः

बलश्च प्रबलश्चैव सुबलोऽथ महाबलः

(एतेविनिर्गताः ...दाप चतुर्त्थनपुंसकम्)

परतास्त्रीगुणास्तद्वान् कन्दनाळांबुजा अपि

कन्नलाश्च तथैवोमासूर्याद्यावेदमण्डलाः

आत्मत्रयेण संयुक्ताः पत्रकेसरकर्णिकाः

प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी तथा

सुप्रभा विजया प्रोक्ता मध्यगा सर्वसिद्धिदा

स्वरबीजप्रभावत्यो मुक्त्वाह्रस्वं नपुंसकम्

प्रणवं वज्रशक्तञ्च नखदंष्ट्रायुधाय च

महासिंहाय हुन्नत्या सिंहमन्त्रोयमुद्धृतः

ओं ह्रीं श्रीं अनेनैवोपचारेण पाद्याद्यैः परिपूजयेत्

दिग्विदिक्ष्वग्रतोङ्गानि स्नानाद्यैः पूजयेत् क्रमात्

जया च विजया कीर्तिः प्रीतिर्दिक्षुविदिक्षु च

प्रभा श्रद्धा तथा मेधा श्रुतिर्नामार्णदीपिता

रौप्यताम्रसितापीतरक्तत्रयशुकप्रभा

चक्र शंखादिचर्मोद्यत् करपल्लवशोभिता

चक्रं शंखं गदां खड्गं पाशाङ्कुश शरं धनुः

चक्रं खड्गं सपरशुं शूलं बाणं तथा गदा

शंखञ्चर्मधनुश्चैव पाशमङ्कुशमेव च

घण्डांचेति च षट्द्वन्द्वं दक्षिणादि करेषु च

अस्त्रावरणमुद्दिष्टं संबुद्ध्यन्तं पृथक् पृथक्

दिक्पालानान्तदस्त्राणामन्ते मुण्डीमथार्गळे

विधानमपरं वक्ष्ये देव्याराधनकर्मणि

प्रथमं प्रणवं प्रोक्तन्द्वितीयं बीजमेव च

तृतीयन्नाम ङेन्तं स्यात् चतुर्थन्तु नमः पदम्

विलोमात् पञ्चमन्त्राणां सेकररादीनि योजयेत्

कन्या भगवती देवी ह्यार्या दुर्गा विलोमतः

श्यामा कृष्णारुणा श्वेता पीता वै सर्वभूषणा

यां याम्मध्ये यजेन्मन्त्री दिग्दळेष्ववशेषिता

धर्मं ज्ञानञ्च वैराग्यमैश्वर्यमनलादिषु

कोणेष्वधर्ममज्ञानमवैराग्यन्दिशासु च

अनैश्वर्यं क्रमादिष्ट्वा शेषं सर्वन्तु पूर्ववत्

ओं ह्रीं सें दुर्गायै नमः, ओं ह्रीं दं आर्यायै नमः, ओं ह्रीं वें देव्यै नमः, ओं ह्रीं तं भगवत्यै नमः, ओं ह्रीं जां कन्यायै नमः।

उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं

यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा।

उत्तिष्ठ पुरुषि, किं स्वपिषि, भयं मे समुपस्थितं, यदि शक्यमशक्यं वा, तन्मे भगवति, शमय स्वाहा,

हृदयादयः देवीमावाह्यास्मिन् प्रपूजयेत्

शंखधरां रम्यां श्यामळां पूर्ववत् स्मरेत्

वामेन कटिमालंब्य दक्षिणेनाभयप्रदाम्

कन्यारूपां विशालाक्षीञ्चन्द्रार्धकृतशेखरीम्

के वक्त्रे हृदिगुह्ये च पादयोर्विन्यसेच्च ताम्

दिक्षूद्ध्र्वं प्रयजेच्छक्तिं पञ्चाङ्गानि च पूर्ववत्

दुर्गामभ्यर्चयेत् प्राच्यां आग्नेय्यां वरवर्णिनीम्

आर्याञ्चदिशि याम्यायां नैरृत्यां कनकप्रभाम्

कृत्तिकामथवारुण्यां वाायव्यामभयप्रदाम्

कन्यामभ्यर्चयेत्सौम्ये शांकरे कद्रुमेव च

चक्रशंखगदाखड्गशरेष्वासांङ्कुशां जटाम्

पाशं वाप्युभयं वापि तदग्रे केसरे ध्वजम्

एषां काद्यष्टकं बीजमिन्द्राद्यन्तं बहिर्गणम्
अन्यत्सर्वन्तु पूर्वोक्तमग्निकार्यमथोच्यते
उद्धृत्यापेक्ष्य संत्यज्य शकलं क्षाळयेत् करम्
सैकतस्थण्डिलं कृत्वा स्वगृह्योक्ता च संलिखेत्
पद्मञ्च समिधा दर्भांस्तृषां विन्यस्य विष्टरे
धर्माद्यं पूर्ववत् चेष्ट्वा ततश्शक्तिर्नव क्रमात्
पीताश्वेतारुणा कृष्णा धूम्रतीव्रास्फुलिङ्गिनी
रुचिरा ज्वालिनीचेति कृशानोर्नवशक्तयः
आहूय दुर्गाया शक्तिमाद्यायातां समर्चयेत्
मणिदर्पणसंक्रान्तं सूर्यादादाय पावकम्
अग्निराग्निं विनिक्षिप्य तदंगैर्विष्णुभागवत्
तारदीपिकयुङ्ग्नद्रा सैवक्रोधाद्य कर्णगा
वस्वन्तावल्लभावह्ने सप्तार्णाग्निः पदैर्वपुः
सहस्रार्चिस्वस्तिपूर्ण उत्तिष्ठपुरुषि तथा
धूमव्यापी सप्तजिह्वः षडेते सधनुर्धराः
चित्पिंगळपदं प्रोक्त्वा हनयुक्दहनद्वयम्
पचयुग्मञ्च सर्वज्ञमाज्ञापयशिरः पदम्
अनेनोज्वालयेद्वह्निं पक्ष्मकेण पवित्रवान्
समिद्द्वयं ततः क्षिप्त्वा उपस्थानमनेन तु
वह्निं प्रज्वलितं वन्दे जतवेदं हुताशनम्

सुवर्णवर्णमनलं समिद्धं विश्वतोमुखम्

परिसमूह्य परिस्तीर्य संस्कारमपि सर्पिषः

मार्जनं सुक्स्रुवोः कृत्वा जनयेद्विष्णुभागवत्

तारांगमूलैः कर्तव्यं व्रतबन्धान्तमादरात्

पूर्णा मूलेन दातव्या मूलांगैर्जुहुयात् घृतम्

जातवेदायदिवेति समुपस्थाय तं यजेत्

अंगमूर्तिदिशापालैर्यागं कल्याणरेतसः

षडश्रीषु षडंगानि दिग्विदिक्ष्वग्रतोपि वा

जातवेदस्सप्तजिह्वो हव्यवाहन एव च

अश्वोदरो वैश्वानर तेजाः कौमारशब्दतः

पुनर्विश्वमुखो वेदमुखश्चाग्न्यादिका स्मृता

हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा

बहुरूपातिरक्ता च सात्विकाः परमार्थदा

तन्ध्यायेत्रिमुखं रक्तत्रिनेत्रञ्चन्द्रशेखरम्

शक्तिञ्च स्वस्तिकं पाशमङ्कुशं वरदाभयौ

वहन्तमृतुहस्तैस्तु सर्वाभरणभूषितम्

मुनिर्भृगुश्च गायत्री छन्दोग्निर्द्देवता स्वयम्

अयं हि सर्वदेवानां सामान्योग्नीह कर्मसु

तदात्मस्थितये तस्मिन्नाद्यया समिधं हुनेत्

अष्टाष्टाहुतयः कार्या सुघृतेन च पञ्चभिः

दुर्गामन्त्रैस्तदंगैश्च यागमन्त्रैश्च शक्तितः
एकस्मिन्नेव जुहुयुर्विहृत्यगुरुमूर्तिपाः
स्वगृह्योक्तमार्गेण संपूज्याग्निमुखं हुनेत्
पञ्चताराभ्यां पक्वन्जुहुयाद्वा द्विरुक्तया
तन्त्रोदितं पुनर्हुत्वा पूर्णां मूलेन चान्तरे
उपचारेण वा पश्चाद्धुनेत् स्विष्टकृतादिकम्
अग्निकार्यमिति प्रोक्तं भुक्तिमुक्तिफलप्रदम्

इति श्री नारायणात्मके प्रथमः पटलः

नारायणात्मके दौर्गे
द्वितीय पटलः

दुर्गायां द्वितीय पटलः

नमस्कृत्वा प्रमेयाय विष्णवे प्रभविष्णवे
प्रतिष्ठा प्रकृतेर्वक्ष्ये विष्णुभागोक्तमार्गवत्
भूतानि राक्षसा वाऽपि येऽत्र तिष्ठन्ति केचन
ते सर्वे व्यपगच्छन्तु दुर्गायाः कुर्महे गृहम्
राक्षोघ्नं वास्तुहोमं च कृत्वा वास्तुबलिं किरेत्
धान्यं कुंभं च कूर्मं च स्वाक्षरैरिष्टका न्यसेत्
दुर्गया चाद्यया वास्तो द्रव्याणि जुहुयादिह
व्यस्तैरष्टाक्षरैरस्या दुर्गाभिर्न्नाम मूलभिः
समिदादिचतुष्कं तु दुर्गायां जुहुयात् पृथक्
पूर्णाहुतिं च मूलेन वौषडन्तेन चाक्षरम्
पात्रे द्रव्यस्य विन्यासं मूलार्णैर्मूलविद्यया
सुवर्णमपहायात्र महासिंहं प्रविन्यसेत्
मूलेनैवोपचारेण दुर्गाभिर्म्मूलनामभिः
दिक्पैर्बीजानि धातूनि सर्वलोकाश्च पर्वता
समुद्रा सर्वतीर्थानि नद्याश्चाथ ह्रदास्तथा
पातालाश्चैव नागाश्च दिग्गजा वृषभा अपि
व्याहृतीभिश्च तारेण घृतमन्यं पुरोदितम्

सर्वभूतधरे कान्ते पर्वतस्तनमण्डिते

समुद्रपरिधाने त्वं देवि गर्भं समाश्रय

प्रासादं कारयेत्तक्ष्णा तद्योग्या रूपकामपि

द्विजानाञ्चोपचारेण पावनोक्षणपूजनम्

इन्द्रो दुर्गापराचान्योरिन्द्रवल्लीरसान्धसा

नमस्तेर्चे सुरेशानि प्रतीके विश्वकर्मणः

प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः

त्वयि संपूजयामीशां दुर्गां नारायणीं सदा

रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव

हुत्वा तु पूर्ववच्चाप्सु दुर्गाभिश्शाययेच्च ताम्

ब्रह्मांशे चाष्टमे भागे सम्यक् संस्थाप्य पच्छिलाम्

पीठञ्चादाय भवनं तस्य शुद्धिश्च पूर्ववत्

अस्य मन्त्रैस्तु कर्तव्यं विष्णोर्म्मन्त्रैस्सुभाषितम्

ध्वजञ्च सिंहमन्त्रेण सैंहिकं परिपूजयेत्

मण्डपं दशहस्तं तु तस्याग्रे परिभूषयेत्

पूर्वेण चाश्वत्थमृचानिधाय यज्ञेशमस्मिन्नरुणं यजेच्च

न्यग्रोधजन्तोरणमर्कपर्णं प्रभाकरं वै यजुषाय मे स्यात्

औदुंबरमङ्गलमाप्यदिक्स्थं

साम्ना च नीलन्त्वथ सुप्रभाख्यं

पश्यन्त्वथर्वादि ऋचा निधाय

प्लाक्षः पृथक् शूलगुणान्वितञ्च

अष्टासु दिक्षु क्रमशो ध्वजांस्तु

द्वौद्वौ वा द्वारं प्रति वाष्टशक्तिः

संस्थाप्य संपूज्य यथा क्रमेण

तेभ्यश्च ताभ्यो विकिरेत् बलिञ्च

काळी कराळी विरजा च मन्दरा

विन्ध्यादिवासिन्यथ सुप्रभाह्वया

सिंहादिवक्त्राप्यथ दैत्यमर्दिनी

पूज्या स्वनाम्नादिकृता प्रबीजकैः

तोरणध्वजमूलस्थघटेष्वर्च्या स्वदेवता

दिक्क्रमादष्टकुंभेषु दिगीशान् वा समर्चयेत्

वेदिञ्च देव्या विद्याभिश्शोधयित्वा परिग्रहेत्

भूमिं वह्निं समुत्पाद्य शयनं शक्तिभद्रके

अष्टादशपुटे क्षेत्रे पूर्ववत् भद्रकं लिखेत्

आपीतरक्तपीतानि केसराणि तु मूलतः

रक्तवर्णानि गात्राणि कृष्णवर्णास्तु पादकान्

पीताभा वीथिका सा तु नानामण्डलमण्डिता

पीतेन पूरयेच्छोभान् हरितेनोपशोभिकाम्

कोणानि कृष्णवर्णेन शूलं वा सिंहमालिखेत्

बहिः पंक्त्या ततो वत्स कुर्याच्छक्तिचतुष्टयम्

ब्रह्मसूत्रादुदकोष्ठन्त्यक्त्वा तत्सिद्धिसंस्थितम्
सूत्रं प्रसारयेत् तिर्यक् तत्तृतीयस्य मध्यगम्
आस्फोटयेत्तु वै सूत्रं पश्चिमेप्येवमेव तु
एवं शक्त्याग्रमुद्दिष्टं समासात्तव सुव्रत
ब्रह्मसूत्रं तथा याम्ये कोष्ठन्त्यक्त्वा विचक्षणः
आस्फालयेद्यथापूर्वं पुनरत्र प्रसिद्धये
ब्रह्मसूत्रे तु संस्थाप्य मध्ये कृत्वा तु शोभिकाम्
सूत्रन्तु भ्रामयेद्वत्स दक्षिणाद्यावदुत्तरम्
कोणेत्वंगुलमानेन पश्चिमेप्येवमेव तु
एवमुक्तं मया वत्स लक्षणं कथितं तव
कोणे कोणे तदर्धं स्यात्तेन मानेन पुष्करम्
एवन्तु पश्चिमे याम्ये सौम्ये चैव तु लक्षणम्
शक्तिः प्रपूरयेत् पश्चात् वर्णकैस्तु यथाक्रमम्
लतास्तु रक्तवर्णेन मुष्टिं पीतेन पूरयेत्
असितेन च तत्सन्धिं पूरयेद्रजसा क्रमात्
कोणे कोष्ठचतुष्कन्तु पूरयेद्धरितेन तु
तत्र बिंबं यथाशोभमालिखेदुद्यतः सुधीः
मुष्टेस्सन्धिं च रक्तेन पूरयेदुज्वलेन तु
प्रतिवारणरेखास्तु लिखेत्तिस्रः क्रमाद्बहिः
देवीप्रियमिदं प्रोक्तं शक्तिदण्डन्तु भद्रकम्

गोपनीयं प्रयत्नेन देशिकैस्सिद्धिकांक्षिभिः

कुंभाष्टकं न्यसेद्दिक्षु तस्मिन् शक्त्यष्टकं न्यसेत्

इषेत्वेति शिरस्थाने घृतपूर्णं हिरण्मयः

राजतं मधुवातेति मधुपूर्णन्तु पादतः

कांस्यताम्रेऽर्घ्यपादाढ्ये देव्याः पार्श्वद्वये न्यसेत्

चक्रं दरं गदं खड्गन्धनुषञ्च मुखादितः

मंगलानि पुनर्दीपान् न्यसेद्बीजांकुराणि च

ऐशान्यां मण्डपं कुर्याद्विभजेत्तत् त्रिधास्समम्

स्नानार्थं वेदिकां भागे वलयश्चयुतांगयोः

कलशानां तु पूरणाय च वेदिकां

कलशां पूरयेरतस्यां पञ्चविंशपदेषु च

पञ्चाशत् कोष्ठकेष्वेवमेकाशीति पदेषु च

पञ्चदर्भयुतं कूर्चन्द्रव्यं कुंभेषु विन्यसेत्

पीठन्यासक्रमेणैव रत्नैर्मध्यं प्रपूरयेत्

वज्रमैन्द्रे तु कलशेऽप्याग्नेये मौक्तिकं तथा

याम्ये प्रवाळमुद्दिष्टं नैरृते पुष्यकं तथा

वारुणे पद्मरागं च वायव्ये चेन्द्रनीलकम्

सौम्ये तु ब्रह्मरागंस्यान्महानीलन्त्वथैश्वरे

सर्वाणि मध्यमे दद्याद्देवं सम्यक्कृतं भवेत्

सर्वाभावे तु वज्रं स्यात्तदाभावे तु मौक्तिकम्

तृतीयं पद्मरागं स्यादन्यथा निष्फलं भवेत्

पञ्चगव्यं दधिक्षीरं घृतन्दिक्षु कषायकम्

मृदमूलञ्च सिद्धार्थं विदिक्ष्वथ भृशादिषु

पल्लवन्त्वनवं पुष्पमक्षतं च फलोदकम्

धान्यगर्भाष्टगन्धांबु सर्वौषधिजलं क्रमात्

मूलमन्त्रेण तद्वर्णैर्स्तदंगैः पूरणं भवेत्

शेषां तारेण संपूर्य चक्रिकाभिस्तु घट्टयेत्

दुर्गाभिर्जुहुयादाज्यं शतं वाथ सहस्रकम्

संपातं कलशे सिक्त्वा वासोभिर्वेष्टयेत् पृथक्

तोयादादाय तामर्चां संक्षाळयाच्छाद्य वाससा

ब्रह्मयागेन तां नीत्वा स्नानपीठे निधापयेत्

पञ्चार इति सूक्तेन सांम्ना सारथवाचिना

शाक्वरेण त्रिकेणाथ नयेत् गेहं प्रदक्षिणम्

प्रवेशे शाकुनं सूक्तं गायत्र्यादाय विन्यसेत्

प्राङ्मुखं भद्रपीठे तु भद्रंकर्णेत्यृचा गुरुः

दत्वार्घ्यं लेपयेदर्चां दीर्घायुत्वेति सर्पिषा

मासूरपिष्टेनोद्वर्त्य क्षाळयेत् द्रुपदादिति

मङ्गलानि च सन्दर्श्य च्छित्वा तारेण कौतुकम्

पूर्वादिकलशैर्दिक्स्थैः स्नापयेत् परमेश्वरीम्

पञ्चगव्यं स्वमन्त्रैस्तु स्नापयेत् पञ्चभिस्तु वा

दधिक्राव्णोति मन्त्रेण दधिस्नानमिहेष्यते
पयोवृतेन साम्ना वै स्नापयेत् पयसाम्बिकाम्
घृतस्सुताथा साम्ना वै स्नापयेत् सर्पिषा शिला
आराध्य गन्धपुष्पैस्तु नेत्रे चोन्मीलयेत्ततः
हिरण्यपात्रे त्रिमधुरं कृत्वा वै तच्छलाकया
हिरण्यगर्भेतिमन्त्रेण मन्त्रयित्वा समाहितः
आदित्यश्शुक्र इति च नेत्रे चोन्मीलयेच्छुभे
नेत्रोन्मीलनवेलायां धेनुं दद्यादलंकृताम्
प्लाक्षादीनाञ्चतुर्णाञ्च त्वक्कषायं सखादिरम्
यज्ञा यज्ञेत्यृचा तेन पावमानेन मृज्जलैः
वाल्मीकी संगमी चैव सागरी वृषश्रृंगजा
अग्निकुण्डस्थिता चैव मृदः पञ्च प्रकीर्तिताः
दूर्वा कुशा तथा सिंही व्याघ्री शतगुणायुतम्
तेन गायत्रसाम्ना तु स्नापयेन्मङ्गलांभसा
राक्षोघ्न इत्यृचा पश्चात् स्नापयेदीशगेन तु
बकुळाशोकचूतानां ब्रह्मविल्वकरोस्तथा
वैय्याघ्रेण तु साम्ना वै स्नापयेत् पल्लवोदकैः
बकुळन्नन्दसंज्ञञ्च जातिमल्लिकयोस्तथा
चंपकाशोकनागानामिदं विष्णुरथार्कपैः
शन्नोदेव्यक्षतं तोयं या फलिनी फलोदकम्

नारङ्गं नाळिकेरं च कादळं बीजपूरकम्

बदरञ्जातिसंज्ञञ्च फलषट्कमिहोदितम्

आपोहिष्ठेति तिसृभिस्नापयेत् धान्यवारिणा

यवाश्च व्रीहयश्चैव मुद्गमाषप्रियङ्गुकाः

खलाखलुवलाश्चैव गोधूमाढकिसंज्ञिताः

वामदेव्येन साम्ना वै स्नापयेद्दर्भपाणिना

गन्धद्वारेति गन्धादिभिः श्रीसूक्तेनोषधीजलम्

द्वाभ्यां द्वाभ्यामथर्ग्भ्यां तु रत्नतोयैः परस्य नु

सूक्तस्येन्द्रादिदिग्स्थश्च पुनः कोणगतैरपि

सूक्तेनैकश्च संज्ञेन स्नापयेन्मध्यमेन तु

अपरं बिंबशुद्ध्यर्थं स्नपनं कथयामि ते

गव्यैर्व्यस्तैर्सुगन्धादिभिः पञ्चगव्येन त्वग्रसैः

भस्मपुष्पौषधीतोयैर्मृज्जलैर्दळगान् क्रमात्

नवभिर्मध्यमं कुंभं रत्नादिभिर्मूलविद्यया

वक्ष्ये द्वादशनामानि ताराद्भ्यादन्नयेद्विठः

ताभ्यां पृथिव्यै स्वाहेति ताभ्याञ्च महते द्विठः

तारान्भुवो वायवेति स्वाहा ताभ्यान्तथापरे

अन्तरिक्षाय महते प्रणवञ्च स्तवं पदम्

आदित्याय च दिवे च महते च क्रमात् द्विठः

आदेस्त्रिभ्यश्चन्द्रमसोदित्यश्च महते द्विठः

स्नानमन्त्रानथैतेषां सांप्रतं प्रवदामि ते

दुर्गाभिस्वस्तिसूक्तेन स्त्रुवं सूक्तेन सप्तमम्

अष्टमं शन्नवर्गेण स्नापयेद्विधिपूर्वकम्

गिरिंबिठेन नवकमस्यनामीति तत्परम्

रमासूक्तेन संस्नाप्य पुनरेकादशं परम्

समुद्रज्येष्ठवर्गेण पौरुषेण तु मध्यमम्

तोयपूर्णान् घटान् सर्वान् पावमानीभिरेव च

पूर्ववच्छेषमत्यापि पुनरन्यं वदामि ते

गोमूत्रं गोमयं क्षीरन्दध्याज्यम्मार्जितञ्जलम्

कषायं रत्नतोयञ्च दिग्विदिक्षु प्रपूरयेत्

गन्धाक्षतजलैर्मध्यं होमाद्यं पूर्ववत् स्मृतम्

यागमन्त्रेण होतव्यं समिदादिचतुष्टयम्

गौरसा पञ्चदुर्गाभिर्मृज्जलं पञ्चवारुणे

पावमानानुवाकेन रद्यासूक्तेन विद्यया

मृत्कषायौषधीपुष्पागव्यैर्मध्यादिभिर्शतान्

पाद्यार्घ्याचमनीचाष्टगन्धैः कोणगतान् घटान्

मध्यादि पञ्चदुर्गाभिश्चतुर्भिर्वैणवादिभिः

एवं स्नपनमुद्दिष्टं शेषमत्रापि पूर्ववत्

एषामेकतमेनायं स्नाप्याच्छाद्य वाससा

ध्यात्वा शक्तिस्तु तत्रस्थां गन्धपुष्पैः प्रपूजयेत्

केयूरकटकाद्यैस्तु नैवेद्यन्तु निवेदयेत्

अयं पुरो इति मन्त्रैस्तु देवयोषित्प्रकाशकैः

नीराजनं प्रकुर्वीत पञ्चभिश्च परिक्रमात्

स्तुतिञ्च पश्चात् कुर्वीत साम्न्यावत्याथर्वणेन च

तां हेति यजुषावापि स्तुवीत पुरुषस्थितः

एवं कृत्वा प्रणम्याथ तां नयेच्छयनं प्रति

ब्रह्मघोषेण महतः नृत्तगीतादिवेणु च

नीत्वा प्रदक्षिणं सम्यक् शय्यामारोपयेछनैः

शाययेत्तां पुनस्तत्र शनकैरोमिति ब्रुवन्

इति नारायणात्मके दुर्गाभागे द्वितीयः पटलः

नारायणात्मके दौर्गे
तृतीयः पटलः

दुर्गाभागे तृतीयः पटलः

अथाधिवासनं वक्ष्ये देव्याः परमपावनम्
अर्चाभिमानिनं जीवं संहृत्यात्मनि योजयेत्
संशोष्य मरुता क्षौणीं संदह्य मरुताग्निना
वादिनाप्लाव्य तां ध्यायेत् पीयूषैकस्वरूपिणीम्
तस्यां संचिन्तयेद्विष्णुं जीवसंज्ञं परात्परम्
तस्मादव्याकृतं कूटं प्राणसंज्ञन्तु कारणम्
प्राणसंप्रेरणाद्वर्णास्संभवन्ति कला अपि
प्राण घोषति भेदात्मगुणतत्वं ततो भवेत्
तारेश्वरो गुणस्येशो ब्रह्मा बुद्धेर्हरः परे
अहंकृते शशी ज्ञेयो मनसश्चेति कीर्तिता
शब्दादीनामथादित्यः श्रोत्रयोश्च दिशः स्मृताः
वायुस्त्वपो दृशस्सूर्यो वरुणो रसनानि च
नासायाश्च क्षितिर्वह्निर्वाचः पाण्योस्तु पादयोः
इन्द्राविष्णू च मित्रश्च क्षेत्रज्ञो वायुगुह्ययोः
सदाशिवेश्वरौ रुद्रा विष्णू ब्रह्मा च खादिना
जीवादिक्षोणिपर्यन्ततत्वानां तु यथाक्रमम्

यानि कान्तानि बीजान्दीर्घत्रययुतं गुणम्

विष्णुभागोक्तमार्गेण उद्धारन्न्यासमेव हि

हृत्पद्मं होमसूर्यादि सोमाग्निमण्डलानि च

पूर्ववत् श्रेष्ठादिपञ्चशक्तिस्तु जातवेदादि पञ्चभिः

मन्त्रन्न्यासन्ततः कृत्वा पूर्ववत् तां समर्चयेत्

एवं वा स्वस्तिके देवीमधिवास्य तदुत्तरे

प्रयच्छेत् पङ्कजे देवीं बलिं च विकिरेत् बहिः

दोहनाश्रपणन्त्वेव निवेद्यं होमकर्म च

तारेण नवविप्रांस्तु भोजयेच्चैव पायसम्

उपस्थानं चरेत्पूर्वमग्निंदूतमितीत्यृचा

अग्निमीलेति पूर्वाग्निं त्वमग्न इति दक्षिणम्

अग्न आयाहिना पश्चादग्निमग्निमथोत्तरम्

दुर्गायाञ्जुहुयुः पक्वमाद्यया ससर्ववह्निषु

दुर्गाभिर्नामभिश्चान्त्यं हुततत्वे स्वशक्तितः

पालाशी मद्ध्यमे पूर्वे दक्षिणे चैव पैप्पलम्

खादिरं पश्चिमे सौम्ये बिल्वजाश्च शतं शतम्

अष्टाधिकं सहस्रं वा तदर्धं वा घृतं पुनः

ततोऽपि हि यवव्रीहितिलसिद्धार्थकान् पृथक्

दूर्वाश्च घृतसंसिक्ता वेदाद्यैर्दुर्गयाथवा

वेदाद्यैस्समिधो हुत्वा दुर्गया वा घृतादिकान्

मूलेन वौषडन्तेन पृथक् पूर्णाहुतिं हुनेत्

घृतेन दघ्ना पयसा मधुना मिलितेन च

अष्टाष्टाहुतिभिश्शान्तिं हुनेद्व्याहृतिपूर्वकैः

अंघ्रिं नाभिं च हृदयं मूर्घानं सर्वगात्रकम्

स्रुवेण द्रव्ययुक्तेन स्पृशेद्वा पञ्चशक्तिभिः

तामभ्यर्च्य बलिं दत्वा प्रासादे पच्छिलान्न्यसेत्

आधारशक्तिं प्रकृतिं कूर्मराजं फणीश्वरम्

पृथिवीं धान्यकुंभादिस्थापनेऽभ्यर्चयेत् बुधः

त्वमेव परमाशक्तिस्त्वमेवासनधारिका

संतृप्तया त्वया देवि स्थातव्यमिह सर्वदा

ओमाद्ये वरदे नित्ये माये त्वञ्जगदुद्भवे

जगत्क्षोभकरे श्रद्धे (हृन्निदेवी) जगन्मयी

जातिमाद्यैस्तु वान्तार्णैरौपचारेण शेषितैः

हुत्वा तैर्द्वेव रत्नानि विन्यसेद्विषभागवत्

वज्रमरतकप्रवालमौक्तिकपुष्येन्द्रनीलगोमेदम्

वैडूर्यमपि दिशासु क्रमेण मध्ये च पद्मरागमपि

बीजरत्नमहाधातुलोहानि विनिवेशयेत्

शालिनीवारकौ चैव कंकुमाषकुलत्थकान्

निष्पावतिलमुद्गांश्च पात्रपूर्णान् ससर्षपान्

मनश्शिला हरीतालमञ्जनं श्यामसीसकम्

सौराष्ट्रीं रोचनां चैव गैरिकं पारतं तथा
दिक्षु काञ्चनरौप्यायस्त्रपूण्यथ हिरण्मयम्
सुसिंहं कूर्मरूपञ्च शंखं चक्रं च कोणतः
धनुर्गदांबुजं मध्ये प्रत्येकं च हिरण्मयम्
सिद्धार्थं पद्मरागं च पारतं स्वर्णमेव च
एतच्चतुष्टयम्मध्ये न्यसेत् पुण्याहपूर्वकम्
स्थितं चराचरं यस्यां रत्नानां निधिरव्यया
सा त्वं ब्रह्मशिलारूपा तिष्ठात्र धरणी स्थिरा
प्रधानं पीठमुद्दिष्टं ध्रुवाद्यौरिति विन्यसेत्
पूर्ववत् पीठमभ्यर्च्य वस्त्राभ्यां परिवेष्टयेत्
पूर्वादिदिक्षु होतव्यं प्रासादस्य समन्ततः
अष्टौ कुंभान् प्रतिष्ठाप्य मूलार्णैस्तान् प्रपूजयेत्
अग्निं पूर्ववदाधाय पक्वञ्च जुहुयाददितः
द्वाभ्यां द्वाभ्यामथर्ग्भ्यां तु नामभिर्जुहुयात् घृतम्
इन्द्रो ज्येष्ठादि मन्त्राद्यमिन्द्रायाग्नेस्तु वल्लभ
ज्येष्ठायै ज्येष्ठायाभिजित्यैन्द्रं वा इति चान्तकम्
अग्निं नः पातु मन्त्राभ्यामग्नये चाग्निवल्लभाम्
(कृत्तिकाभ्यस्तथांबायैर्दुलायैवनितन्नियैः)
अभ्रयन्त्यै मेघयन्त्यै वर्षयन्त्यै च ठद्वयम्
(तारादिवपुणीतायैरग्निम्मूर्धादि चानिले)

अपवाम्नायमित्याभ्यां पक्वं हुत्वा यमाय च
अपभरणीभ्यो राज्या याजिच्छित्यै चतुष्टयम्
परे इवांस इत्यादि यमसूक्तेन होमयेत्
मूलं प्रजां वीरवती इति द्वाभ्यां तु राक्षसे
(प्रजापतये मूलाय प्रजाभ्यषषणनमस्तु ते)
क्षत्रस्य राजा वरुण आभ्यान्तु वरुणाय च
शतभिषजेषैज्येभ्यः पावमानस्सुवर्जनः
वायुन्नक्षत्रमित्याभ्यां वायवेति च ठद्वयम्
निष्ठायै कामपारायोभिजित्ये चतुष्टयम्
वायो शतमित्याद्येव सर्पिषा वानिले हुनेत्
सोमो राजेति मन्त्राभ्यां ततस्सोमाय ठद्वयम्
मृगशीर्षायेण्वकाभ्यः ओषधीभ्य इति क्रमात्
राज्याय चाभिजित्यै आप्यायस्वमिदं ततः
आप्यायस्व समेतु ते सोमं राजानमित्यपि
नवो नवो भवतीति हुत्वा सौम्ये समापयेत्
आद्राया रौद्र इत्याभ्यां पक्वमाज्यञ्च होमयेत्
ततो रुद्राय चाद्रायै पिण्डमानामने युता
प्रणवादि पशुभ्यश्चेत्यभित्वा शूरनोनुमम्
नमस्ते रुद्र इत्येवमनुवाकद्वयेन तु
दुर्गया समिदाज्यन्तु शतमष्टोत्तरं हुनेत्

ततस्विष्टकृतं हुत्वा होमशेषं समापयेत्
कुंभेभ्यस्तोयमाहृत्य प्रतिमामूर्ध्नि सेचयेत्
(एवं वा परिहोमास्तु पक्वं सर्वत्र दुर्गया
दुर्गया जुहुयुश्चान्नमार्याया च पशोर्घृतम्
देव्याख्यया च समिधो भगवत्या हुनेत्तिलम्)
सिद्धार्थं कन्यकाख्येन शान्तितोयं समाहरेत्
(इद्ध्मेरन्तेपि चोत्थाप्य जस्त्वैथाग्निं नयेत् गृहम्)
पञ्चम्यादाय विन्यस्य चतुर्थ्यान्तान्तृतीयया
निरोध्याकल्प्य सानिध्यं परया चाद्ययार्चयेत्
नवशक्तिभिश्चाज्यं हुताभिश्चाष्टबन्धनम्
जीवावाहनमन्यच्च सर्वं वै विष्णुभागवत्
प्रणवव्याहृती मूलमन्त्रेण परिविद्यया
संस्थाप्य सकलीकृत्य पुनर्ज्जीवं नियोजयेत्
सकलीकृत्य संपूज्य जपेन्मन्त्रान् पुरोदितान्
श्रीरुद्रमपि होतारं श्रीनारायणमेव च
महोपनिषदं ब्रह्म निर्णयं शान्तिमेव च
ध्रुवसूक्तं रमासूक्तन्देवीसूक्तं रथन्तरम्
गायत्रं शाक्वरं सशिवसङ्कल्पमेव च
द्वास्थादिदेवता स्थाप्याः प्रविश्यान्तः प्रपूज्य ताम्
प्रणम्य द्वारमाघट्य त्रिरात्रं पूजयेत् बहिः

दिशाहोमं तु होतव्यं विष्णुभागोक्तवर्त्मना
इन्द्रो ज्येष्ठादिना वात्र दुर्गाशक्तिभिरेव वा
दक्षिणां गुरवे दद्यादन्नाद्यमनिवारितम्
तृतीयदिवसे रात्रौ पूजयेत् कलशान् गुरुः
कलशानव्रणान्रम्यान् सूत्रेण परिवेष्टितान्
पूर्ववत् भूषयित्वा तु शोधयित्वा तु मण्डपम्
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्
ऐक्षवञ्च रसंतैलमष्टकुंभाश्चाश्वत्थजम्
वाच्यप्लक्षन्यग्रोधमाद्रुमत् उदुंबरम्
(मधूकौपतेषान्त्वग्भिः कषायकम्)
नद्याः क्षेत्रान्मृदस्तीर्था प्रदोषगजवेदिजाः
वात्मीकीं पूरयेदष्टौ बीजाष्टकमथोच्यते
गोधूमयवसिद्धार्थतिलशालिप्रियंङ्गुकम्
माषमुद्गं परं हेम रजतं मौक्तिकं शुभम्
स्फटिकं वज्रकं पद्मरागं वैडूर्यपुष्यकम्
अगरुं कुंकुमं कुष्ठं कर्पूरं वानरं पुनः
लवंकञ्चन्दनम्मांसी गन्धाष्टकमुदाहृतम्
ससमुद्रनदीतीर्थह्रदनिर्झरवापिजम्
तटाककूपजं प्रोक्तञ्जलाष्टकमनन्तरम्
पद्मं नीलोत्पलं रक्तं कैरवं (मातलं) फलम्

रुद्राक्षं कादळं भव्यमष्टमञ्चाष्टकं विदुः
(अष्टघृतिघटेष्वेवं संपूर्याभ्यर्च्य देशिकः)
दुर्गाभिः पञ्चदुर्गास्तु षष्टं स्यात्पौरुषेण तु
सप्तमं तु रमाख्येन स्वस्तिसूक्तेन चाष्टकम्
स्नापयेत्तान् चतुर्थेऽह्नि पुनरुत्सवमाचरेत्
उत्पातेषूपजातेषु विष्णुभागोक्तवर्त्मना
खननाद्यभिषेकान्तदुर्गाभिरभिषेचनम्
जीर्णोद्धारञ्च कर्तव्यन्तत्वज्ञैर्विष्णुभागवत्
चतुरश्रं धनुर्वक्रं वृत्तन्दिक्षु त्रिकोणकम्
कुण्डानि वेश्मगं कुर्याद्दलं यमसोमयोः
मूलांगैरुपचारेण पूर्ववद्वाग्निसंस्कृतिम्
नामभिः पञ्चदुग्गाभिः प्रधानान्ते घृतं हुनेत्
खादिरं ब्राह्ममाश्वत्थं प्लक्षन्यग्रोधसंभवम्
अपामार्गञ्च बैल्वञ्चाप्युदुंबरयुताञ्जलिः
दुर्गाभिर्मूलमन्त्रेण विलोमात्तिसृभिर्हुनेत्
पृथक् त्रिसहस्रन्त्रिशतं वाष्टाधिकं क्रमात्
तिलसर्षपनीवारान्मूलेन दधिमाक्षिकम्
आज्यं मृत्युञ्जयेनैव षड्कमष्टोत्तरं शतम्
होमं समाप्य संपातं कलशैरभिषेचयेत्
शान्तिहोमञ्च कर्तव्यमद्भुते विष्णुभागवत्

दुर्गया पक्वहोमन्तु मूलेन द्रव्यमेव हि
शांकरे वह्निमुत्पाद्य पक्वं हुत्वा तु पूर्ववत्
समिधोश्वत्थवृक्षोत्था चतुर्भिश्च शतं शतम्
औदुंबराश्चतुर्भिस्तु चतुर्भिश्चैव पाटलाः
प्लक्षोद्भवाच्चतुर्भिस्तु पूर्णां तारेण वा हुनेत्
संपातं कलशे सिक्त्वा गत्वा गर्भगृहं गुरुः
(पादजानुकटीचांससवामदक्षिणभूमिषु)
नाभ्युदरहृत्कर्णमुखाक्षिश्रोत्रघर्मसु
एवं पुरुषसूक्तेन न्यस्त्वा तेनाभिषेचयेत्
तद्विधानेन तां देवीमर्चयेत् तद्विधानवित्
आवाहनं तथा चार्घ्यं पाद्यमाचमनीयकम्
मधुपर्कं पुनः स्नानं वस्त्रञ्चैवोपवीतकम्
भूषणं गन्धपुष्पौ च धूपदीपौ निवेद्यकम्
विसर्जनं निवेद्यस्य चार्घ्याद्यं सकलं पुनः
ऋग्भिष्षोडशभिः कुर्यादन्यत्सर्वन्तु पूर्ववत्

इति नारायणात्मके दुर्गाभागे तृतीयः पटलः

नारायणात्मके दौर्गे
चतुर्थः पटलः

दुर्गाभागे चतुर्थः पटलः

अष्टादशांगुलं दण्डं पुष्करं तु षडंगुलम्
कण्ठमेकाङ्गुलन्दैर्घ्याद्विस्तारेद्व्यङ्गुलम्
विस्तारायामतश्चाग्रत्र्यङ्गुलं कुल्ययान्वितम्
अङ्गुलाभ्यां खनेत्गार्त्तम्मेखलाद्वितयं मुखम्
अधस्तात् कमलं कुर्याद्दण्डमूले तथा घटम्
(अष्टाविंशाङ्गुलायायास्त्रागिद्धं परिकीर्त्तिताम्)
स्नपनं संप्रवक्ष्यामि दुर्गाया सार्वकामिकम्
हेमरत्नौषधीपुष्पफलगन्धादिभरादितः
पूरयेन्मध्यमे कुंभन्तस्मिन्नाहूय तां यजेत्
मूलञ्च पञ्चदुर्गाभिश्शन्नवर्गैश्च होतृभिः
श्रीरुद्रं पौरुषं सूक्तं श्रीसूक्तं प्रजपेत्स्पृशेत्
सक्तुकं भस्मकं क्षौद्रन्तैलं शुद्धन्तथा गुळम्
अश्वत्थांङ्कुरकं दूर्वाजलं रजतवारि च
दिवादिमूलमन्त्रैस्तु पूरयेत् दैविके घटम्
पाद्यार्घ्यगव्यगोमूत्रगोमयञ्च पयोदधि
सर्पिःकौशं कषायञ्च रत्नकाञ्चनधातुकम्

गन्धं पुष्पं फलं बाह्ये दिग्विदिक्ष्वन्तराळकान्

अंगैश्चतुर्भिरस्त्रेण नेत्रेण परिपूरयेत्

प्लक्षादिनाञ्चतुर्णाञ्च दग्धं भस्म करीषयुक्

एषां सखादिराणां वै त्वग्भिरेव कषायकम्

मणिमुक्ताप्रवाळानि वज्रपुष्याख्यनीलकम्

ब्रह्मरागं महानीलं रत्नाष्टकमुदाहृतम्

(बकुळन्नद्रिस्थ ज्त्रञ्च जातिमल्लिकयोरपि)

चंपकाशोकचूतानां सप्त पुष्पाणि चात्र वै

नारकं नाळिकेरञ्च कादळं बीजपूरकम्

बदरञ्जातिसंज्ञञ्च फलषड्कमिहोदितम्

सिंहीं व्याघ्रीं कुशां दूर्वां शतमौलीमथौषधीम्

गन्धपुष्पाक्षतजलैस्तारेणान्यान् प्रपूरयेत्

विहृत्य पूर्ववद्वाग्निं जुहुयुः पक्वमृत्विजः

दुर्गाभिर्मूलमन्त्रेण रमासूक्तेन मध्यमे

अनुवाकेन पूर्वस्यां नमस्ते रुद्रमन्यवे

दक्षिणे स्वस्तिसूक्तेन पुरुषसूक्तेन पश्चिमे

उत्तरे शन्नवर्गेण जुहुयुश्च घृतं क्रमात्

पलाशखदिराश्वत्थबिल्वानां समिधः क्रमात्

मध्यादिपञ्चदुर्गाभिरष्टोत्तरशतं शतम्

आज्यं हवियवव्रीहितिलसिद्धार्थदूर्वकान्

अष्टपूर्णाहुतीश्चात्र होतव्या सर्व वह्निषु

संपातं कलशे सिक्त्वा कुंभानाच्छाद्य पूजयेत्

इन्द्रोज्येष्ठादिभिः पक्वन्तन्नामाद्यैस्तथा घृतम्

समिदाद्यमिहोदिष्टं दिक्पालानाञ्च नामभिः

कृत्वैवन्तु दिशाहोमान् स्नानान्ते चाथ विष्णुवत्

ओं इदं विष्णुरापोहिष्ठाग्निमीळे तत्सवितुः

गन्धद्वारमाप्यायस्व दधिक्राव्ण इषेत्वा सवितुरश्वत्थेवस्त्र्यंबकं

हिरण्यगर्भं मानस्तोके शन्नोदेवी पुष्पावती पुष्पावती सुमित्रान

भूतिश्रीमधुवाता विश्वानिनोग्नेत्वमश्वत्थेव शन्नोदेवी अग्नेत्वं

चित्तिस्त्रुगिति मध्यमं

पाद्यादीनामिमेमन्त्रा जादिवर्णैः प्रदीपिता

पादिविंशतिभिश्चान्त्यं विद्यया स्नापयेत् शिवाम्

ब्रह्मसूक्तेन कर्तव्यं अन्तरास्नानमंबुभिः

दुर्गाभिस्तोयपूर्णास्तु कलशानभिषेचयेत्

प्रोक्षयेत् शन्नवर्गैस्तु बाह्ये वस्त्रान्वितांबुभिः

अथ सप्तदशद्रव्यैस्सूक्तेन पुरुषात्मना

विष्णुभागे तु यत्प्रोक्तं तदिहैवातिशोभना

उत्सवञ्चापि कर्तव्यं यथाविभवविस्तरम्

पुण्याहं वाचयेत्पूर्वं ततो बीजनिवापनम्

ध्वजमग्रे च दिक्ष्वष्टौ त्रिसन्ध्यं विकिरेत् बलिम्

चण्डिकां अंबिकां द्वारि सिंहमग्रे त्रयीमयम्

गणेशं दक्षिणामूर्तिर्दक्षिणे दिक्षु वै सुरान्

मातृभूताधिपं स्कन्दं कुबेरं मुण्डिरर्गळे

ह्लादिनीं मोदिनीं द्वारि जयां कार्त्यायनीं बहिः

काळयाद्यादिषु चाष्टासु बलिपीठस्य दिक्षु च

ब्रह्मघोषीं सुघोषीं च यज्ञवेष्टीं सुरंगिणीम्

सुभुजां प्रादिमोदिनीं ब्रह्मवादिनीं च यथेष्टनी

एषनित्यञ्चलाप्रोक्तं तन्मध्ये भूतवल्लभा

चण्डिकामंबिकामन्तर्विजयन्तीं जयां बहिः

नमस्तो द्वारियुक्तायै विजयन्त्यै ज्वालयावृते

दृष्ट्या निहतदैत्यायै कार्तायिन्यै नमो नमः

नमस्ते द्वारियुक्तायै विजयायै त्रिशूलिने

दृष्ट्या निहतदैत्यायै कार्त्यायिन्यै नमो नमः

दैत्यदर्पविनाशाय सहस्राक्षाय वृत्रहन्

कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो

ओं इन्द्राय वज्रहस्ताय सुराधिपतये दुर्गापार्षदे नमः।

नमोभूतेभ्यो दुर्गापार्षदेभ्यो दुर्गापार्षदीभ्यो नमो नमः स्वाहा।

पूर्वस्यां दिशि दुर्गाशक्तेर्येगणाः वज्रपाणयः। येभूता।

मातृशास्तृगुहादीनां बलिर्वै विष्णुभागवत्

द्वारयो पूर्ववद्दत्वा काळयादीनां ध्वजेषु च

अष्टाष्टशक्तिभिः साकमष्टकोटिभिरन्वितम्

सुदुर्गा च विदुर्गा च निदुर्गा सुविलोचना

सुलोचना सुभद्रा च त्रिदुर्गा दुर्गविक्रमा

प्राक्स्थितेभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

अकन्या च सुकन्या च रविकन्या च सकन्यका

रक्षः कन्या मातरकन्या सुरकन्या रविप्रभा

अग्निदिक्स्थिताभ्यो असुरग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

कृत्तिका कार्तिका सर्वकार्तिका कार्तिकायिनी

कृत्यान्तका कृत्यकन्या कृत्तिनी कृर्त्तिकोद्भवा

दक्षिणदिक्स्थिताभ्यो गन्धर्वग्रहशक्तीभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

वामा सुवामा वामार्हा वामाङ्गी वामलोचना

वामोद्भवा वामसमा वाममूर्त्तिधरा पुनः

निरृति दिक्स्थिताभ्यो यक्षग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

देवी सुदेवी यादेवी समदेवी सुमर्द्दिनी

विदेवी रविदेवी च देवदेवीति कीर्तिता

प्रत्यक्स्थिताभ्यो पितृग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

अदण्डा च विदण्डा च सुदण्डा दण्डविक्रमा

शतदण्डा महादण्डा दुर्द्दण्डा दुरतिक्रमा

वायुदिक्स्थिताभ्यो नागग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

अगौरी च विगौरी च सुगौरी गौरिविक्रमा

निग्गौरी चैव दुर्गौरी सुगौरी गौरिवल्लभा

उदक्स्थिताभ्यो राक्षसग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

जया च विजया चैव अजया च जयावती

सुजया च जयाक्रान्ता जयन्ता जयविक्रमा

ईशदिक्स्थिताभ्यो पिशाचग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

काळी चैव सुकाळी च विकाळी कारकाळिका

दुर्गाळी कार्त्तिकाकाळी निष्काळी भद्रकाळिका

उपरिस्थिताभ्यो ब्रह्मग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

समेदिनी सुमेदिनी वसुधा च वसुन्धरा

भूमिरुर्वीधरा पृथिवीति क्रमात् परिकीर्त्तिताः

अधस्थिताभ्यस्सर्वग्रहशक्तिभ्यो दुर्गाकोटिपार्षदीभ्यो नमो नमः

ब्रह्मघोषीं सुघोषीञ्च यज्ञवेष्टीं सुरंगिणीम्

सुमुखीं सुभुजां प्रादिमोदिनीं ब्रह्मवादिनीम्

अधोर्ध्वं वेदमाताञ्च ह्रीं पूर्वां भूतवल्लभाम्

पूर्ववत् तीर्त्थयात्राया पूर्वेद्युर्निशि वै बलिम्

नमो भूतादिना ग्रामे गृह्णन्तु बलिमित्यपि
विकीर्य च बलिं देवीं मूलबिंबे नियोजयेत्
तीर्थयात्रा त्वया देवि श्वः कर्तव्या सुरारिणि
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि
इति विज्ञाप्य बध्नीयात् कौतुकं दौर्गयाद्यया
आदाय शाययेत्तद्वै मण्डपे समलंकृते
प्रातस्संयोज्य संपूज्य घृतेनाभ्यज्य चूर्णकैः
द्रुपदादिना चोद्वर्त्य चाग्निमीळेति तां यजेत्
वास्तोष्पतिशाकुनञ्च स्वस्तिसूक्तञ्च दुर्गया
समिदाज्यं क्रमाद्धुत्वा तीर्थतीरन्नयेच्छनैः
संस्नाप्य यजुषाभ्यर्च्य दुर्गाभिस्तु शतं घृतम्
हुत्वादाय पुनर्मज्जेदब्लिंगैः प्रोक्ष्य चांभसि
कृत्वाघमर्षणं भक्तैराप्लाव्य पुरुषात्मना
संपूज्य साम्ना पाद्याद्यैर्निवेद्य च बलिं हरेत्
पूर्ववत् सिंहमारोप्य देवीं तां स्वगृहं नयेत्
मूले संयोज्य दुर्गाभिश्शन्नोदेवीतृचा यजेत्
स्नपनं कारयेदद्यात् सशक्त्या चाविळंबितम्
पञ्चताराद्यया पक्वं दुर्गया जुहुयात् घृतम्
दुर्गाभिस्समिधं चाज्यमन्नाद्यं च शतं शतम्
मूलेन तेन पूर्णान्तु व्याहृतीः पुनरेव तु

चतुर्गृहीतेन हुनेद्व्याहृतीभिर्विधानवित्

चतुर्गृहीतेन हुनेत्तारेणैकामथाहुतिम्

ततः संपातमासिच्य कलशैरभिषेचयेत्

आचार्यं पूजयेत्कर्ता प्रतिष्ठा सा समाप्यते

इति श्री नारायणात्मके चतुर्थः पटलः समाप्तः

नारायणात्मके शास्तरि
प्रथमः पटलः

श्री गणपतये नमः

वक्ष्ये प्रतिष्ठां प्रणिपत्य शंभुम्
सर्वेश्वरन्देवमजम्मुकुन्दम्
पठतां प्रभाया सकलार्त्थसिद्ध्यै
शास्तुर्ज्जनानां परिरक्षकस्य
पर्वते वा वने नद्यां तीरे तीरे महोदधौ
ग्रामे वा नगरे भूमिन्दृष्ट्वा विज्ञापयेदिदम्
यत्राऽशुभकरा सन्ति भूतवेताळराक्षसाः
व्यपगच्छन्तु ते शास्तुः कुर्महे भवनन्त्विह
बलिं दत्वा भुवं खात्वा धान्यकुंभञ्च कच्छपम्
निधाय सुदृढीकृत्य वास्तुमभ्यर्च्य पावके
हुत्वा पक्वन्तु गायत्र्या महाव्याहृतिभिर्घृतम्
व्याहृतीभिश्च मूलेन समिदाज्यचरून् घृतम्
पूर्णाहुतिं च मूलेन व्याहृतीभिरथेष्टकाम्
शिवनारायणे यद्वत् पात्रे रत्नानि विन्यसेत्
मध्ये शरं च सौवर्णन्तोमरं पङ्कजन्यसेत्
निद्ध्यष्टकैश्च मूलेन हुत्वाज्यं पूर्ववत् परम्

सर्वभूतधरे कान्तेत्युक्त्वा संस्थाप्य पूजयेत्

शालागृहं हस्तिपृष्ठं भवनं वा चतुष्करम्

पञ्चदशकादर्वाद्वितलं त्रितलं तु वा

रत्नधातुश्शिलालोहमृत्काष्ठैः कारयेत्तनुम्[१५४]

संशोध्य च शिलालोहकृता[१५५]न्तोयेऽधिवासयेत्।

उत्सेधं पालिकादीनां विकारमनुभास्करैः।

अंगुलैरेव विस्तारं दशरन्ध्राष्टसंख्यकैः।।

आयामविस्तृतैरर्धमुखगर्त्तञ्च पीठिका।

यवप्रियङ्गुनिष्पावशालिमाषतिलांबुजान्।।

कुलत्थवेणुगोधूमान् गायत्र्या वापयेत्पुरा ।

भूतग्रहेभ्यः प्रथमं भूतकूरबलिं हरेत् ।।

तैलमांसनिशासक्तुहविः पैशाचमिष्यते।

धानोडुंबिकलाजैस्तु दध्ना याक्षमुदाहृतम्।।

निशातण्डुलपूर्णादिभिः सार्पं पद्माक्षतांबुभिः।

दूर्वाङ्कुरयवव्रीहितिलचन्दनसर्षपैः।।

ब्राह्मं निशागुळापूपैः शैवं दध्याज्यपायसम्।

आर्यरात्रं पुनश्शेषं वैष्णवं स्कन्दमेव च।।

त्रिकालमर्चयेदार्यं रात्रौ तेभ्यो बलिं हरेत्।

सेचनं चेह गायत्र्या प्रातः कर्म दिने बलिः।।

---

154 Missing pages from 81 to 231 in PS (See footnote 136)

155 PL ० कृत्वा ०

ध्वजमश्वात्मिकं चाग्रे बलिपीठाद्बहिर्भवेत्।
प्रासादद्विगुणोत्सेधं नीलाश्वस्तस्य देवताः।।
द्वारोत्सेधं त्रिधा भङ्क्त्वा द्वाभ्यां पीठस्य विस्तृतिः।
एकेनैवोन्नतिस्तस्य त्रिकालं परिपूजयेत्।।
प्रासादमादाय च नागमन्त्रेणाबध्य सूत्रेण च दर्भदाम्ना ।
पूर्वोक्तमार्गेण विधाय शुद्धिं रक्षार्थमस्त्रेण घटे न्यसेच्च ।।
राक्षोघ्नं विष्णुभागोक्तं वास्तुहोमं च शांकरे ।
स्वास्त्रेण दक्षिणे द्रव्यं बीजमन्त्रेण चोत्तरे ।।
तत्र वास्तुबलिर्देयः पुण्याहं स्वस्तिवाचनम् ।
अभिधास्ये विभोरस्त्रं तारं विष्णुं नृकेसरीम् ।।
भूबीजं घृणिफट्स्वाहा नवाक्षरमुदाहृतम् ।
ओं हूं नमः पराय गोप्त्रे घ्रूं वौषट् ।।
सर्वहोमेष्वनेनैव पूर्णाहुतिरुदाहृता।
ओं श्रीं ह्रीं क्ष्रीं हूं घ्रूं शंबराय परमात्मने[१५६] स्वाहा ।।
जीवमन्त्रं समुद्दिष्टं सम्यक् सप्तदशाक्षरम् ।
मण्डपं कारयेदग्रे चतुर्द्वारं सभूषणम् ।।
नव कुण्डं शिवे यद्वद्वेष्टितं तन्तुमालया ।
प्रासादभित्तिमानेन तोरणानि चतुर्दिशम् ।।
तोरणाद्विगुणोत्सेधा ध्वजाश्चाष्टौ यथादिशम् ।
रक्ताः पताकाः कोणेषु दिक्षु कृष्णाश्च भूषिताः ।।

[156] PS पद्मने

नीलाश्च दैवतं पूर्वे चाश्वत्थं तोरणं यमे ।
नीललोहितदैवत्यं विकङ्कतसमुद्भवम् ।।
औदुंबरन्तु वारुण्यां श्वेतमत्रांङ्गदैवतम् ।
रत्न[१५७]मालाधरोद्दीप्तं पाटलं बैल्वमेव वा ।।
गोप्तारं पिङ्गळाक्षं च वीरसेनं च शांभवम् ।
त्रिनेत्रं शूलिनं दक्षं भीमरूपं ध्वजेश्वरान्[१५८] ।।
वीरबाहुं महावीरं विद्युदास्यं विलासिनम् ।
तीक्ष्णं च तीक्ष्णदंन्तं च ताराक्षं च भवोद्भवम् ।।
एते द्वाराधिपाः प्रोक्ताः कलशेषु समर्चयेत् ।
दीप्तवन्तं तमोरूपं घोषवन्तं विरूपिणम् ।।
कोणेषु कलशेष्विष्ट्वा सर्वानुक्तक्रमाद्यजेत् ।
सम्मार्ज्य वायुनालिप्य शकृतास्त्रेण सर्षपान् ।।
गायत्र्या पञ्चगव्येन मूलेन विकिरान् कुशान्।
पुष्पाणि धूपदीपञ्च गन्धद्वाराममिति ब्रुवन्।।
गन्धपङ्केन चालिप्य सूत्राण्यस्त्रेण पातयेत्।
प्रथमा कर्णिका रक्ता चतुरङ्गुलविस्तृता।।
मञ्जिष्ठा केसरास्युस्तत् भुवं पञ्चाङ्गुलायता[१५९]।
(सन्धिं षडङ्गुलापत्र भूमिश्च तावती)।। १०१

[157] PL रक्त o

[158] PL PS ध्वजेश्वराः

[159] PL भुवञ्चाङ्गुलायता, PS o तत्तु पञ्चाङ्गुलायता

द्व्यङ्गुलाग्रगाभूमि[१६०] दळानि[१६१] सुसितानि च।

श्यामान्युपदळान्येषां बाह्येनाभिस्त्र्यङ्गुला।।

पूर्ववत्द्वादशारन्तु पीतमष्टाङ्गुलेर्मतम्।

नाभिपीतारुणानेमिश्चतुर्भिर्वृत्तमीरितम्।।

चतुर्भिर्वीथिका रम्या द्वाराभ्यां द्विगुणाङ्गुलैः।

आर्यचक्रं समुद्दिष्टं तस्मिन् शय्यां समास्तरेत्।।

कुंभेशं मूलमन्त्रेण स्वास्त्रेण करकं यजेत्।

प्रभां गायत्र्याभ्यर्च्य वह्निमूलेन निक्षिपेत्।।

अष्टाष्टाहुतिभिः स्वाङ्गैः कर्म कृत्वाशनान्तिकम्

साधयेत् भूतनाथाग्निं तारव्याहृतिमूलकैः।।

उपनयनविधौ सूत्रं सौवर्णं तु हृदा नयेत्।

पञ्चविंशत्पदस्थाने कलशान् पूरयेत् पुनः।।

गव्यैर्व्यस्तैः समस्तेन मृत्कषायाष्टगन्धकैः।

शेषा नद्युदकैः सर्वान् शास्त्रबीजेन पूरयेत्।।

मूलेन समिधं हुत्वा गायत्र्याज्यं शतं शतम्।

सम्पातस्पर्शनं कृत्वा प्रतिमामानयेज्जलात् ।।

वाल्मीकीमथ वाराहीं क्षोत्रजां पार्वतीं मृदम्।

अश्वत्थोदुंबरप्लक्षपलाशोत्थं कषायकम्।।

उदुंबरकृते पीठे स्थापयेत्प्रतिमां शुभाम्।

---

160 PS ग्रहाभूमि

161 PL बलानि

नमस्तेऽर्चेत्युपस्थाय बीजेनाबद्ध्य कौतुकम्।।

आज्येन मधुनालिप्य मृत्भिस्त्वग्भिश्च लेपयेत्।

नयनोन्मीलनं कुर्यात् बीजाभ्यां पूर्ववच्च गाम्।।

अस्त्रेण कौतुकं च्छित्वा कलशैरभिषेचयेत्।

अङ्गैर्मूलेन बीजाभ्यां गायत्र्या चाभिषेचनम्।।

अर्घ्यं पाद्यं तथाचामं मधुपर्कं प्रदाय च।

वस्त्रं सौवर्णकं सूत्रं गन्धं पुष्पं च भूषणम्।।

सर्वं मूलेन दातव्यं कौतुकं बन्धयेद्बुदा।

छत्रं च पादुकं दत्वा रथेन गृहमानयेत्।।

मूलेन सकलीकृत्य बीजमन्त्रेण शाययेत्।

संहृत्योत्पाद्य विन्यस्य मातृकां तत्वमेव च।।

मन्त्रांस्तदङ्गसंयुक्तां पूजयेत्तं यथाविधि।

ओं घ्रूं नमः पराय क्षेत्रज्ञात्मने नमः।

ओं घ्रूं नमः पराय प्रकृत्यात्मने नमः।

ओं घ्रों नमः पराय आकाशात्मने नमः।

ओं घ्रें नमः पराय वाय्वात्मने नमः।

ओं घ्रुं नमः पराय अग्न्यात्मने नमः।

ओं घ्रिं नमः परायाबात्मने नमः।

ओं घ्रं नमः पराय पृथिव्यात्मने नमः।

ओं हूं नमः पराय गोप्त्रे भूताधिपतये नमः अयं मूलमन्त्रः[१६२]।

ओं हूं घ्रां रेवन्ताय हृदयात्मने नमः।

ओं हूं घ्रीं शास्त्रे शिरसे स्वाहा।

ओं हूं घ्रूं गोप्त्रे शिखायै वौषट्।

ओं हूं घ्रैं प्रभवे कवचाय ह|ुं

ओं हूं घ्रौं दीप्तिमते नेत्राभ्यां वौषट्।

ओं हूं घ्रः प्रशास्त्रे अस्त्राय फट् षडङ्गास्समुदीरिताः ।।

रेवन्तः प्रथमश्शास्ता गोप्ता च प्रभुरेव हि।

दीप्तिमांश्च प्रशस्ता च षण्मन्त्राः समुदाहृताः ।।

ओं रं ज्वल ज्वल हुं फट्।

अयमष्टाक्षरो मन्त्रः पूर्ववच्चाङ्गमूर्त्तयः।

ओं ह्रीं शास्त्रे नमो गोप्त्रे भूताधिपतये नमः।।

षोडशाक्षरमुद्दिष्टं पूर्ववच्चाङ्गमूर्त्तयः।

ओं ह्रीं आर्याय विश्वगोप्त्रे सेनान्यै नमः।।

चतुर्दशाक्षरो मन्त्रः पूर्ववच्चाङ्गमूर्त्तयः।

ओं नमस्ते भवपुत्राय भवतुल्य बलाय च।।

हूं वरदाय नमस्तेऽस्तु भक्तप्रियाय हिताय ।

घ्रूं पदैः समस्तेनाङ्गानि मन्त्रस्यानुष्टुभस्मृतः।।

---

162 PL मुखमन्त्रः

ओं घ्रूं नमः पराय गोप्त्रे ह्रूं नमः अयं मूलमन्त्रः।

भूताधिपाय विद्महे भवपुत्राय धीमहे तन्नः शास्ता प्रचोदयात्।

मूर्तयोऽष्टौ समाख्याता ध्वजसंस्थापने पुरा।।

गोप्तारं पिङ्गलाक्षं च वीरसेनं च शंबरम्।

आर्यं चैव तु शास्तारं भवपुत्रं महागुहम्।।

भवोत्भवं महाशान्तं भूतेशं भूतिदं क्रमात्।

मूर्त्तयो द्वादश प्रोक्ताः षण्मूर्त्तिवदुदाहृताः ।।

आर्यश्शास्ता गुहासन्नः सेनानीः भूतवल्लभः।

रुद्रजो रूपवान् कामी वरदो लोकपूजितः।।

नीलाश्वश्वेतमातङ्गश्यामी पीतानुलेपनः।

रक्तमालाधरः शूरो मायी मातृगणप्रियः।।

कालवासाः गणाध्यक्षः खड्गहस्तो धनुर्धरः।

सहजायो जनावेशः साधुः संसाररक्षकः ।।

एतानि शास्त्रृनामानि मूर्तिमन्त्रवदुद्धरेत्।

मन्त्रैरिहोदितैः सर्वैर्गन्धपुष्पैस्तमर्चयेत्।।

ईशानशक्रयोर्मध्यकुण्डस्थं पावकं गुरुम्।

विहृत्य चाग्निमीलेति सर्वकुण्डेषु निक्षिपेत्।।

गायत्र्या जुहुयुः पक्वमाज्यमार्यादिनामभिः।

प्राग्याम्यवारुणोदीच्यकुण्डेषु समिदादिकम्।।

वेदाद्यैर्जुहुयुः सर्वे मूलेन गुरुरेव च।

अष्टमूर्तिभिरष्टासु जुहुयुर्वाष्टमूर्तिपाः ।।

पैप्पला वटजा प्लक्षा[१६३] राजवृक्षोत्भवा अपि।

मूलमन्त्रेण वा सर्वे जुहुयुर्द्दिक्क्रमेण तु।।

ततश्चाज्यं चरुं लाजान् व्रीहीन् शुद्धतिलान् क्रमात्।

सिद्धार्थांश्च पुनर्मुद्गान् सक्तुकं च ततो घृतम्।।

प्ळक्षमौदुंबरं शुभ्रं खादिरञ्च विकङ्कतम्।

शमीमयं त्वपामार्गन्यग्रोधं च पलाशजम्।।

अश्वत्थमितिमद्ध्यादि शिवान्तं समिध स्मृताः ।

पूर्ववच्छान्तिहोमं तु क्रमाद्व्याहृतिमूलकैः।।

ततोऽभ्यर्च्य निवेद्यान्नं बलिं दत्वा द्विजान्यजेत्।

नागमन्त्रेण संबद्ध्य[१६४] प्रासादं परिशोधयेत्।।

ओं नां रां गां नागात्मने पराय परमात्मने नमो वेष्टयामि रक्ष रक्ष हुं फट्।

दैविके नवमे भागे पूर्ववच्च शिलां न्यसेत्।

अष्टाक्षरेण होतव्यं समिदाज्यशतं शतम्।।

अष्टाक्षरैस्तु रत्नानि पूर्ववत्तेन विन्यसेत्।

एवं गायत्र्या हुत्वा पीठिकान् विन्यसेत्तया।।

एवं मूलेन होतव्यं कलशैर्द्दिक्षु वेश्मनः।

कुंभेभ्यस्तोयमाहृत्य प्रतिमामूर्ध्नि सेचयेत्।।

---

[163] PS वृक्ष

[164] PS संबुद्ध्य

उत्तिष्ठेति समुत्थाप्य शाकुनेन गृहं नयेत्।

मूलमन्त्रेण संस्थाप्य ध्रुवसूक्तं जपेच्छनैः।।

सिद्ध्यष्टकेन मूलमन्त्रेण संस्थाप्य [१६५]।

योजयेत् परमं तत्वं श्वासेन प्रणवात्मना।।

व्यापकं विन्यसेन्मूलं त्रिवारं तेजसां निधिम्।

हृन्मुखांसोरुयुग्मेषु मूर्तिषट्कं प्रविन्यसेत्।।

कदृग्वदनहृत्कुक्षिगुह्योरुचरणेषु च।

मूर्त्यष्टकं तु सञ्चिन्त्य व्यापकं प्रथमेन तु।।

पादजानुकटीतुंगे वामे च हृदयान्तरे।

मूर्ती[१६६] द्वादशकन्न्यस्त्वा पुनरार्यादिकं हृदि।।

अङ्गानि च पुनर्न्यस्त्वा पाद्यमर्घ्यं प्रदापयेत्।

द्वादशारेषु ये कुंभाः पूर्वमेव प्रतिष्ठिताः।।

मूर्तिपैस्तान् समादाय तैर्मन्त्रैरभिषेचयेत्।

कुंभेशेन च सम्मार्ज्य जीवप्राणसमाह्वयौ।।

व्यापकं विन्यसेन्मूर्ध्नि वदने हृदये परान्।

नाभ्यां पादद्वयेऽङ्गानि हृदयादिषु विन्यसेत्।।

अञ्जलीं[१६७] वन्दनीं चैव क्षुरिकां खड्गमेव च ।

धनुर्बाणं च सन्दर्श्य पूजयेत्तं सुभावितम् ।।

आसीनं वा स्थितं सौम्यं द्विभुजं वा चतुर्भुजम् ।

---

165 मूलमन्त्रेण संस्थाप्य............. मूलमन्त्रेण संस्थाप्य] Missing in PL

166 PS मूर्ध्नि

167 PS, PL अञ्जनीं

शरन्तु दक्षिणे हस्ते वामहस्ते धनुर्वरम् ।।

खड्गं च तोरणं चोर्ध्वं भुजाभ्यां विधृतं स्मरेत् ।

सर्वाभरणसंयुक्तं नीलकुञ्चितमूर्धजम् ।।

श्यामवर्णं विलोलाक्षं नीलवाससमुज्ज्वलम् ।

पत्रकुण्डलमालेयकण्ठाभरणनूपुरैः ।।

कटिसूत्रनिलीतादि हेमपुष्पैरलंकृतम्[१६८] ।

ध्यात्वा समर्चयेद्देवं परिवारसमन्वितम् ।।

यजमानः समृद्धात्मा नत्वाचार्यं प्रसन्नधीः ।

गवां सहस्रं प्रददेद्धिरण्यं गां समूर्तिपम् ।।

इति नारायणात्मके शास्त्रभागतन्त्रे प्रथमः

[168] PL कटिसूत्रेनिपातानि देहपुष्पैरलंकृतम्

नारायणात्मके शास्तरि
द्वितीयः पटलः

शास्तृभागे द्वितीयः पटलः

आयातु शास्ता सगणो मुदेन हयेन नानानुचरेण शीघ्रम् ।
भवात्मजो वारिनिधीश्वरोऽयं सकेतुना कृष्णनिभेन गोप्ता ॥
आवाहयामीत्यावहनमन्त्रः
गोप्तारं विश्वगोप्तारं शास्तारं शांभवं प्रभुम् ।
अमेयमद्भुतं शान्तं स्थापयाम्यहमच्युतम् ॥
अयं स्थापनमन्त्रः
अथ वक्ष्यामि संक्षेपाच्छास्तृयागमनुत्तमम्[१६९] ।
स्नात्वाचम्य शुचिर्भूत्वा प्रविशेद्यागमन्दिरम् ॥
तालत्रयदिग्बन्धं कृत्वासीनः सुखासने ।
प्राणायामत्रयं कृत्वा मातृकां विन्यसेत्तनौ ॥
तत्वन्यासं पुनः कृत्वा मन्त्रन्यासमथाचरेत् ।
मूलमन्त्रं न्यसेत् पाणौ तच्छाखास्वङ्गपञ्चकम् ॥
तलद्वये तथाचास्त्रं मूलं देहे तु सर्वगम् ।
पूर्ववन्न्यस्य मूर्तीस्तु पुनरंगानि पुर्ववत् ॥
ध्यात्वा जप्त्वा शतं मूलमष्टाधिकमनन्यधीः ।

---

[169] PS संक्षेपाच्छास्तृभागमनुत्तमम्

संक्षाळयास्त्रेण मूलेन पात्रमापूर्य वारिणा ।।

तत्वमायोज्य तारेण मूलजप्तेन चांभसा ।

आत्मानं तेन संप्रोक्ष्य साधनानि पवित्रवान् ।।

आत्मानमर्चयित्वास्मै योगपीठं प्रकल्पयेत् ।

धर्मं ज्ञानं च वैराग्यमैश्वर्यमनलादिषु ।।

पूर्वाद्यधर्ममज्ञानमवैराग्यमनैश्वरम् ।

सत्वंरजस्तमश्चैव मायाविद्ये क्रमाद्येजेत् ।।

ओं प्रभूतसिंहासनाय सर्वशक्तिमयाय योगपीठाय पद्माय नमः

अनेनेष्ट्वा च तन्मध्ये मूलेनार्यं विचिन्तयेत् ।

पाद्यादिदीपपर्यन्तं तस्मै गायत्र्या ददेत् ।।

तत्र न्यासादिकं कार्यं ध्यानमुद्रासमन्वितम् ।

गोप्तारं मूलमन्त्रेण कर्णिकायां प्रपूजयेत् ।।

हरं चैव महाकायं महाकालं सुलोचनम् ।

दीर्घबाहुं महानादमूर्ध्वकेशमधोमुखम् ।।

पूर्वादिकेसरेष्विष्टा मूर्तीरष्टौ महात्मनः ।

प्रभां पूर्णां सत्यकं च पुष्कळामुत्तरादितः ।।

स्कन्दं सेनापतिं शूरं विघ्नेशमनलादिषु ।

दळमध्ये समभ्यर्च्य दळाग्रेषु समर्चयेत् ।।

अग्नीशरक्षोवाय्वग्रे दिक्षु चांगान्यनुक्रमात् ।

क्षुरिकां पूर्वतोऽभ्यर्च्य दक्षिणे खड्गमेव च ।।

धनुषं पश्चिमेभ्यर्च बाणमुत्तरतोऽर्चयेत् ।।
कोणेषु तोमरन्त्वेव पीठीये दिक्चतुष्टये ।
मधुकरं बहिः पीठमीशे[१७०] चाग्नौ तु शंबरम् ।।
इन्द्रादींश्च तदस्त्राणि पूजयेच्च बहिर्बहिः ।
कल्पयेद्योगपीठन्तु धर्माधर्मसमन्वितम् ।।
प्रभूतसिंहासनाय सर्वशक्तिमयाय पद्माय नमः
मूलेनावाह्य संस्थाप्य निरोध्याकल्प्य तत्स्थितम् ।
सकळीकृत्य सन्दर्श्य मुद्राः संपूजयेद्विभुम् ।।
प्रभां सत्यकमभ्यर्च्य वामदक्षिणपार्श्वयोः ।
अग्नीशरक्षोवाय्वग्रे दिक्षु चांगानि पूजयेत् ।।
क्षुरिकां च महाखड्गं धनुर्बाणं दिशासु च ।
मधुकरं च बहिः पीठादीशेचाग्नौ च शंबरम् ।।
गणेशं स्कन्दयुक्तं वा देवी पुत्रयुतन्तु वा ।
युक्तं चतुर्भिर्वाभ्यर्च्य दिक्पालं दिक्षु पूजयेत् ।।
वज्रादीन् घोषवन्तश्च सोमेशानान्तरेऽर्चयेत्[१७१]।
एवं वा पूजयेद्देवं पुनर्द्वारं तु घट्टयेत् ।।
आर्याधिवासनोद्दिष्टं द्रव्यैश्च समिदादिकैः ।
दिशाहोमांस्तु जुहुयुर्विष्णुभागोक्तवर्त्मना ।।
चतुर्थदिवसे स्नानं कर्तव्यं चोत्सवान्वितम् ।

---

170 PS पीठं दिशे
171 क्षुरिकां च............. सोमेशानान्तरेऽर्चयेत्] Missing in PL

भूमे[१७२]श्शुद्धिः समुद्दिष्टा घननाद्यैः क्षाळनादिभिः ।।
मूलाङ्गैरभिषेकं तु बिंबशुद्धिस्तु पूर्ववत् ।
अल्पबिंबे समायोज्य भग्नं त्यक्त्वा परन्यसेत् ।।
मूलबिंबे समाहृत्य पूर्ववद्द्वेश्मदेवताः ।
प्रासादं शिल्पिनोत्पाद्य शुद्धिं[१७३] कृत्वा विसर्जयेत् ।।
वेश्मशुद्धिं पुराकृत्वा बिंबशुद्धिं च युक्तितः ।
बीजाङ्कुरार्पणं चाग्रे ध्वजसंस्थापनं पुनः ।।
प्रायश्चित्तं ततः कुर्यात् सर्वदोषस्य शान्तये ।
खण्डेन्दुसदृशं कुण्डं दक्षिणस्यान्तु वेश्मनः ।
मूलाङ्गप्रणवैर्वह्निमुद्पाद्य जुहुयाच्चरुम् ।।
स्वकीययाथ गायत्र्या तारव्याहृतिपूर्वया ।
षण्मन्त्रैर्जुहुयादाज्यमार्याद्यैरपि नामभिः ।।
द्वाभ्यां शतं तद्विगुणं त्रिगुणं[१७४] कन्यसादितः ।
समिदाज्यचरून् लाजांसर्षपांश्च यवांस्तिलान् ।।
बिल्वजाः समिधश्चात्र षण्मन्त्रैः सकलानि तु ।
घृतं क्षीरं दधि क्षौद्रं पृथगष्टोत्तरं शतम् ।।
व्याहृतीभिस्त्रिसाहस्रं हुनेन्मृत्युञ्जयेन तु ।
क्षीराज्यमधुसंसिक्ताः पुनर्दूर्वाः समापयेत् ।।
संपातकलशेनार्यमभिषिच्य समर्चयेत् ।

---

[172] PL भूमौ o
[173] PL बलिं
[174] PL त्रिशतं

बहुळां गुरवे दद्यात् हेमशृङ्गीं पयस्विनीम् ।।
ऐशान्यां वह्निमुद्पाद्य पक्वं कृत्वा घृतं हुनेत् ।
मन्त्रैर्यागोदितैः सर्वैः षण्मन्त्रैरष्टनामभिः ।।
पुनर्द्वादशभिः पञ्चविंशद्भिरपि नामभिः ।
शाकुनस्वस्तिसूक्ताभ्यां पुनः पूर्णाहुतिं हुनेत् ।।
ब्रह्मवृक्षोद्भवा बैल्वा क्षीरवृक्षसमुद्भवाः ।
षण्मन्त्रैर्जुहुयात् षड्कं षण्मन्त्रैस्तु घृतं पुनः ।।
घृतेन दध्ना मधुना पयसा व्याहृतीर्वदन् ।
गायत्र्या त्रिशतं दूर्वा संपातेनाभिषेचयेत् ।।
ईशानशक्रयोर्मध्ये कुण्डस्थे जनितेऽनले ।
तत्वैः सप्तशतं हुत्वा समिदाद्यं मूलविद्यया ।।
आज्यशेषमपांशेषं हुतभस्मसमन्वितम् ।
तत्वोदके समालोड्य तत्वैस्तमभिषेचयेत् ।।
गवां दशकमर्ध[१७५] वा दापयेद्गुरवे शुचिः ।
तन्तुवेष्टनमारभ्य जनिनान्तं विभावसोः ।।
कर्म कृत्वा पदान्यत्र कल्पयेत्घटसंख्यया ।
इन्द्रादिद्वादशं बाह्ये मध्यमे तु चतुष्टयम् ।।
अग्न्यादिपञ्चगव्येन पूरयीत चतुष्टयम् ।
इन्द्रादि सोमपर्यन्तं पावकादीशपर्यया ।।

[175] PL शतकमर्धं

कषायेणाष्टकं तोयै भृशाद्यं पूरयेत्सुधीः ।
शतं वाऽथ सहस्त्रं वा समिदाज्यं हुनेत् पुनः ।।
न्यासक्रमेण चोधृत्य स्नापयेद् बीजविद्यया ।
बिंबशुद्धौ चतुर्थेऽह्नि[१७६] प्रायश्चित्तविधावपि ।।
इदं स्नानं समुद्दिष्टं सकलं शास्तृ[१७७]विद्यया ।
नवानां नवकं कृत्वा पूरयेन्मध्यमं घटम् ।।
रत्नगन्धसुगन्धाभिर्मूलेन परिपूजयेत्[१७८] ।
गन्धपुष्पाक्षततिलैः सदोषैः पाद्यमैन्द्रके ।।
गन्धपुष्पाक्षतकुशाराजीतिलपयोऽर्घ्यकम् ।
पङ्कजो तिलतक्कोलगन्धैराचाममाप्यके ।।
उत्तरे पञ्चगव्येन चतुष्कं चास्त्रविद्यया ।
गायत्र्याग्न्यादि गोमूत्रं क्षीरं दधि घृतान्न्यसेत् ।।
द्वासप्ततिघटान् गन्धसलिलैः[१७९] परितस्थितान् ।
पूरयेन्मूलमन्त्रेण सर्वानाच्छाद्य चांबरैः ।।
नव वा पञ्च वा होमान् जुहुयुर्गुरुमूर्तिपाः ।
पूरणक्रमयोगेन तैर्मन्त्रैरभिषेचयेत् ।।
पाद्यमर्घ्यमथाचामं पञ्चगव्यं स्वमन्त्रकैः ।
सावित्र्या च पशोर्मूत्रमाप्यायस्वेति वै पयः ।।

---

176 PS चतुर्थेऽग्निं
177 PS शान्त o
178 PL परिपूरयेत्
179 गव्येन चतुष्कं चास्त्र..... द्वासप्ततिघटान् गन्धसलिलैः] Missing in PL

दधिक्राविण्णेति दधि तेजोऽसीति घृतं पुनः ।
मधुवातत्रिकैः क्षौद्रं षण्मन्त्रैः पूरयेज्जलैः ।।
कषायं याज्ञिकैर्वृक्षैर्यज्ञायज्ञेति पूरयेत् ।
कदळीनाळिकेराम्रधात्रीपनसडाडिमैः ।।
सबिल्वभव्यैश्चूतोत्थपल्लवैश्च फलोदकैः ।
या फलिनीरिति संपूज्य मार्जनं चाप्यके न्यसेत् ।।
इन्द्रवल्ली सदा भद्रा[१८०] कुशाग्ररजनी वचा ।
गन्धपुष्पयुतं चैतद्द्रुपदादिति मन्त्रवित् ।।
नद्याः कूलद्वयाद्वेद्याः क्षेत्राद्वृषविषाणतः ।
समुद्रात् पर्वतात् ग्रामान्मृदमादाय चोत्तरम् ।।
मूर्धानमिति संपूर्य[१८१] बीजेनाग्नेयमर्चयेत् ।
शालिनीवारकश्यामकङ्कुमाषकुलत्थकान् ।।
निष्पावतिलमुद्गाश्च[१८२] बीजानि कथितानि तु ।
गन्धद्वारेति गन्धाम्भः पुष्पं पुष्पावतीरिति ।।
यवोदकं यवोऽसीति मूलं सर्वत्र चान्ततः ।
एतैः सर्वैः समायुक्तैरन्यस्तु विधिरुच्यते ।।
गुळमिक्षुरसं चैव नाळिकेररसोदके ।
रत्नोदं लोहतोयं च तीर्थोदं चाक्षतोदकम् ।।
षण्मन्त्रैः स्नापयेदेतैरष्टोत्तरघटैस्तु वा ।

180 PS मुद्रां
181 PS संपूज्य
182 PS ० पुष्पाश्च

नव वा पञ्च वा होमान् पूर्ववज्जुहुयाद् घृतम् ।।
कलशेषु निषिच्याज्यं स्नापयेदर्घ्यपूर्वकम् ।
यवोदकान्तं पाद्यादि केचिदिच्छन्ति सूरयः ।।
अनेन बहुधास्नानं विष्णुभागवदाचरेत्[१८३] ।
कोणस्थनवके हीनं मध्यमं चाधमं पुनः ।।
केवलं मध्यखण्डेन स्नानं जलविवर्जितम् ।
अपरं स्नपनं वक्ष्ये नवकान्नव कल्पयेत् ।।
घृतमुष्णोदकं पाद्यमर्घ्यमाचमनीयकम् ।
रत्नोदकं शान्तिवारि लोहाम्भो मङ्गलोदकम् ।।
तैलं दधि मधु क्षीरं नाळिकेररसं शुभम् ।
पञ्चगव्यं गुळं भस्म मध्याद्दिक्षु विदिक्षु च ।।
भवपुत्रं च शास्तारं भूतप्रेताधिपाभिधौ ।
श्वेताश्वं गिरिपुत्रञ्च भूतनाथं गणेश्वरम् ।।
भवपुत्रञ्च खण्डेषु क्रमादेतान् प्रपूजयेत् ।
उत्तरे कलशक्षेत्रे तैरेवाष्टाधिकं शतमम् ।।
पृथक् पूर्णाहुतिं कृत्वा संपाताज्यन्तु संस्पृशेत् ।
तैरेव स्नापयेद्देवं गायत्रीभिरथापि वा ।
अवस्त्रावितितोयेन प्रोक्षणीयाश्च देवताः ।।
ऊनपञ्चाशता यत्तन्मध्यमं परिकीर्तितम् ।

---

183 PS विष्णुगर्भवदाचरेत् , PL विष्णुभागोक्तुव आचरेत्

घृतं क्षीरं गुळं क्षौद्रं भस्मोदं मध्यमादिषु ।।
कोणे गन्धोदकं सर्वान् पूरयेच्छुद्धवारिभिः ।
अन्यत्सर्वन्तु पूर्वोक्तमध्यमं[१८४] स्नपनं ब्रुवे ।।
दिक्षु त्रिकं विदिक्ष्वैकं नवान्तं पञ्चविंशतौ ।
मध्यमं पञ्चगव्येन गन्धतोयैरथाष्टकम् ।।
दिक्ष्वेकैकं ततो दध्ना शेषानन्यांस्तु वारिभिः ।
कलशस्थांस्ततो देवान् सर्वाञ्छास्तरि योजयेत् ।।
पूर्ववच्च दिशाहोमं ततश्चोत्सवमारभेत् ।
बीजानि वापयेद्विद्वान् ध्वजानष्टौ यथादिशम् ।।
बलिपीठान् बहिः स्थाप्य ध्वजं नीलाश्वमर्चयेत् ।
त्रिकालमर्चयेदार्यं पञ्चमा शब्दसंयुतम् ।।
दक्षिणे क्षुरिकापाणिं खड्गहस्तमथोत्तरे ।
वीरबाहुं महावीरं बहिर्द्वास्थौ बहिर्मुखौ ।।
अश्वं विघ्नं शिवं दिक्पान् मातृश्चांबां धनेश्वरम् ।
घोषवन्तं पुनर्द्वारि तीक्ष्णं वै तीक्ष्णदन्तकः ।।
गोप्तारं पिङ्गळाक्षं च वीरसेनं च शांभवम् ।
त्रिनेत्रं शूलिनं दक्षं भीमरूपं क्रमाद्दिशि ।।
ओं नमः शास्तृभूतेभ्यः सकलजन्तुहितकरेभ्यो नमः
दिक्ष्वष्टासु च तन्मध्ये पीठस्य विकिरेद् बलिम् ।

184 PL ० मधमं

एष नित्यबलिः प्रोक्तश्चोत्सवः कथ्यतेऽधुना।।
सिंहास्यं सिंहनादं च खड्गिनौ द्वारपालकौ।
वीरबाहुर्महावीरमश्वं विघ्नं शिवं यजेत्।।
दैत्यदर्पविनाशाय सहस्राक्षाय धीमते।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो।।
इन्द्राय सुराधिपतये शास्तृपार्षदे नमः।
नमो भूतेभ्यो भूतकृद्भ्यः सद्भ्योऽसद्भ्यो नमो नमः ।
मुखं यः। अग्नये नमो। येन कालाग्निना। ईशानाय नमो नमः।
वीरभद्रनमस्तेऽस्तु नमो विघ्नेश्वराय च।
ब्राह्म्यादिभ्योऽथ मातृभ्यः सर्वाभ्यो वै नमो नमः।।
ब्रह्माण्यै नमः। ब्रह्मभूतायै नमः तत्। नानारूपा मातरः आर्याज्ञया। चांबादीनां गणाः। षण्मुखाय। धनदपूर्व घोषवते नमः। तीक्ष्णाय तीक्ष्णदन्ताय। ये समस्तं जगत् । ओं घ्रूं गोप्त्रे नमः।

सर्वेभ्यः पिङ्गलेभ्यो बहुरूपेभ्यो नमः[१८५] महागणेभ्यो घोररूपेभ्यो मृगेभ्यो मृगरूपेभ्यो विनायकेभ्यो मूकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यो स्थूलेभ्यो कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो मुण्डेभ्यः स्त्रीभ्यो नपुंसकेभ्यो बहुरूपेभ्यः सर्वगणेभ्यो नमो नमः ।

[185] तीक्ष्णाय तीक्ष्णदन्ताय....... बहुरूपेभ्यो नमः] Missing in PL

एवं तु पिङ्गलादीनां ध्वजमूले बलिं हरेत्।
महानादं महाकालं भूतनाथं महाबलम्।।
यक्षं दक्षं विशालाक्षं रुद्रवक्त्रं भवोद्भवम्।
दिक्ष्वष्टासु च तन्मध्ये बलिपीठस्य तान्यजेत्।।
पूर्वेद्युस्तीर्थयात्रायां निशि दद्यान्महाबलिम्।
पिङ्गलाद्येन मन्त्रेण ग्रामादिषु किरेत् बलिम्।।
तीर्थयात्रा त्वया कार्या भूतनाथहिताय नः।
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि ।।
एवं विज्ञाप्य पुण्याहं कृत्वा संबद्ध्य कौतुकम्।
शयने शाययित्वार्यं प्रातः संयोज्य चूर्णकैः[१८६]।।
उद्वर्त्याभ्यर्च्य हुत्वाग्नौ शाकुनस्वस्तिमेव च।
आवाह्य कौतुके मूलाद्रथे वा पुरुषोत्तमे ।।
वज्रगेहे[१८७] गजे पार्श्वे स्थापयित्वा नदीं व्रजेत्।
सम्पूज्य चानले हुत्वा मूलाङ्गार्यादिनामभिः।।
स्नपनं प्रोक्षणं दोषवेपनं चाघमर्षणम्।
प्लावनं मार्जनं यागं होममार्यादिनामभिः।।
हरादिभिर्बलिं दत्वा वाहनेन गृहं नयेत्।
पूजयेत् कलशैः सार्धं रात्रौ च विकिरेत् बलिम्।।
स्त्रुवन्तु कारयेत्तक्ष्णा पर्णेनोदुम्बरेण वा ।

[186] PS पूर्णकैः
[187] PL वस्त्रगेह

स्रुचपञ्चांङ्गुलं दण्डं पुष्करं चतुरङ्गुलम्।।
ललाटं त्र्यङ्गुलं तस्माद् गळमर्धाङ्गुलं भवेत्।
आयामसदृशं तारमायामद्विगुणां गळे ।।
विस्तारायामतस्तुल्यपुष्करं पञ्चधा भजेत्।
अंशाभ्यां मेखलागर्तं त्र्यंशैर्निम्नमर्धतः ।।
पुष्करस्य त्रिभागेन दण्डं गोपुच्छवच्छुभम्।

इति नारायाणात्मके शास्तृभागे द्वितीयः पटलः शास्तृभागः समाप्तः

नारायणात्मके शाङ्करनारायणे प्रथमः पटलः

शाङ्करनारायणे प्रथमः पटलः

श्रीगणपतये नमः

नमः शिवाय शान्ताय विष्णवे प्रभविष्णवे ।

श्रीपार्वतीवल्लभाय हंसाय परमात्मने नमः।।

ओंकाररूपस्य परस्य पुंसस्तन्त्रं[१८८] प्रवक्ष्ये परमार्थसिद्ध्यै ।

यथापूर्वं भगवानाह मह्यं गौरीभर्ताकं तथैवाहमद्य ।।

चतुर्दशेन षष्ठेन नादं बिन्दुसमन्वितम्।

ऊष्माद्यं बिन्दुसंयुक्तं शंकरनारायणाय च।।

प्रणवादिनमोन्तोयं मन्त्रं सर्वार्थदायकम्।

ओं ओं ओं हृदयाय नमः।

ओं ह्रीं शिरसे स्वाहा।

ओं ह्रों शिखायै वषट्।

ओं हूं कवचाय हुं। ओं शङ्कराय नेत्रत्रयाय वौषट् ।

ओं नारायणाय अस्त्राय फट्।

ओं[१८९] शङ्कराय विद्महे नारायणाय धीमहे तन्नो हंसः

प्रचोदयात् । ओं श्लीं पशु हुंफट् सहस्रारहुं फट् ।

---

[188] PL ० मन्त्रं

आधारशक्तिं चानन्तं धर्माधर्मादिकान् गुणान्।

मायाविद्येंबुजे सूर्यसोमाग्निमण्डलम्।।

आत्मानमन्तरात्मानं परमात्मानमेव च।

वामा ज्येष्ठा च रौद्री च शङ्करार्णप्रदीपिका।।

विमलोत्कर्षणीज्ञाना क्रियायोगेति नादिजाः।

मनोन्मन्यनुग्रहान् मध्ये ह्रीङ्कारेण समर्चयेत्।।

मूलेनावाह्य देवेशं सकलीकृत्य पूजयेत्।

दिक्ष्वंङ्गान्यग्रतो नेत्रं कोणेष्वस्त्रं चतुर्ष्वपि।।

मुखादिदक्षिणामूर्तिं रुद्रमूर्तिं समर्चयेत्।

ततो भैरवमूर्तिं च नृत्तमूर्तिं शिवस्य तु ।।

वासुदेवं सङ्कर्षणं प्रद्युम्नं चानिरुद्धकम्।

एवं मूर्तीः दळेष्विष्ट्वा शक्तिरग्रदळेषु च।।

विद्याविद्येश्वरी स्मृत्वा[१९०] पार्वती श्रीश्च लक्षिता।

वागीश्वर्यैरतिर्बाह्ये शूलं परशुमेव च।।

पिनाकं च कपालं च चक्रशंखौ गदांबुजौ।

इन्द्रादींश्च तदस्त्राणि चण्डसेनं बहिर्यजेत्।।

कर्पूराञ्जनसंकाशं भूषितं स्वस्वभूषणैः।

चतुर्भुजं चाष्टभुजं ध्यायेज्योतिर्मयं विभुम्।।

एवं सम्पूज्य देवेशं स्तोत्राभ्यां परितोषयेत्।

---

[189] PL ओं ओं ओं

[190] PL सूक्ष्मा

प्रस्थोद्वहं ताम्रकुंभं सविधानमलंकृतम्।।
रत्नकाञ्चनधान्यैस्तु पूरितं तु शिलावटे ।
स्थापयेत् प्रणवेनादौ कूर्मराजं तथोपरि ।।
गायत्र्या जुहुयात् पक्वं मूलेन च शतं घृतम् ।
ईशित्वादि क्रमादष्टशक्तिरष्टाष्टसंख्यया ।।
समिदाज्यचरूनाज्यं मूलेनाष्टशताधिकम् ।
पुण्याहपूर्वं शाद्यैर्णैरिष्टकामन्त्रजैर्न्यसेत् ।।
द्रव्याणि विन्यसेत्पात्रे ताम्रक्लृप्ते तु पूर्ववत् ।
मृण्मूलधातुरत्नानां बीजानां पूर्ववत् स्मृतम् ।।
दिक्षु काञ्चनरौप्यायास्त्रपूण्यथ हिरण्मयम् ।
शूलं परश्वधं शंखं चक्रं मध्ये गदांबुजम् ।।
सुवर्णं कूर्मरूपं च वृषं मालां धनुर्वरम् ।
खट्वाङ्गं बालचन्द्रं च मूलमन्त्रेण विन्यसेत् ।।
हुत्वा गायत्र्या पक्वं मूलेनसमिदादिकम् ।।
घृतं मूलाक्षरैर्दीपैस्तथा नामद्वयेन च ।
बीजानि सर्वधातूनि सर्वलोकाश्च पर्वताः ।।
समुद्राः सर्वतीर्थानि नद्यश्चाथ ह्रदास्तथा ।
पाताळाश्चैव नागाश्च दिग्गजा वृषभा अपि ।।
एते व्याहृतिभिर्मन्त्रैस्तारेण च घृतं हुनेत् ।
पुनः स्विष्टकृतं हुत्वा सिक्त्वाज्यमभिघार्य च ।।

सर्वभूतधरेत्युक्त्वा न्यसेत् पुण्याहपूर्वकम्।

वृत्तं वा चतुरश्रं वा प्रासादं कारयेत् पुनः ।।

प्रतिमां कारयेद्भूम्यां दशतालेन निर्मिताम् ।

शूलं चक्रं कुठारञ्च शंखं च विधृतांबुजैः ।।

मौलिबद्धेन्दुखण्डेन किरीटे मकुटेन च ।

केसरीमकरोदीप्तकुण्डलाभ्यामलंकृतम्।।

स्वस्वभूषणसन्दीप्तामादाय स्थपतेः करात् ।

पूर्ववत्तां समादाय शोधयित्वा हुनेद्गुरुः ।।

अलंकृत्य पञ्चभिः सलिलैकृताम् ।

महोपनिषदैर्विद्वान् शाययेदोमिति ब्रुवन् ।।

ततः प्रासादमादाय शुद्धिं कृत्वास्य भूयसीम् ।

द्वादशाक्षरमन्त्रेण घटं संस्थाप्य पूजयेत् ।।

रक्षोहणादिमन्त्राभ्यां पक्वमाज्याहुतीर्हुनेत् ।

कृणुष्वाष्टादशैर्भूयो ये देवा इति पञ्चभिः ।।

दुर्गाभिर्व्याहृतीभिश्च समिदादिचतुष्टयम् ।

तेनैवास्त्रेण पूर्णान्तु मूलेन च हुनेत्सदा ।।

तमेवेशे निधायाग्निं पूर्ववच्च घटे न्यसेत् ।

वास्तोष्पतेतिमन्त्राभ्यां पक्वं हुत्वा घृतं हुनेत् ।।

वास्तोष्पतेर्ध्रुवेत्याद्यैः षड्भिः सद्यादि पञ्चभिः ।

दुर्गाभिश्शन्नवर्गैश्च व्याहृतीभिरु[१९१]मध्यया ।।

शमीमयश्चसमिधो घृतमन्नं पुनर्घृतम् ।

शन्नोदेवीत्यृचा दूर्वा मूलेनाष्टोत्तरं शतम् ।।

द्रव्याक्ताः पूर्ववत्पूर्णं वौषडन्तेन चान्तरे ।

नमो रुद्राय तच्छेषं त्वं विप्रे यजुषोक्षणम् ।।

विकीर्य च बलिं वास्तोः पुण्याहमपि मन्दिरे ।

विष्णुभागोक्तमार्गेण गायत्र्या बीजवापनम् ।।

ध्वजाग्रे सौरभेयन्तु वैनतेयमथांशुके ।

उल्लिख्य स्थापयेदग्रे ध्वजं देवस्य संमुखम् ।।

तोरणं तन्तुनावेष्ट्य मालया दर्भक्लृप्तया ।

अश्वत्थोदुंबरवटप्लक्षक्लृप्तादिकान् क्रमात् ।।

स्योना पृथिविमन्त्राभ्यां[१९२] तोरणानि निधापयेत् ।

सुशोभनसुभद्राख्यौ सुकर्मा च सुहोत्रकः ।।

नामानि कथितास्तेषां नन्द्याद्यास्ते[१९३] ध्वजाधिपाः ।

द्वारेषु च घटा स्थाप्याः पूजयेच्च दिगीश्वरान् ।।

मार्जनं वायुना लेपं गायत्र्या गोमयांभसा ।

अस्त्राभ्यामथ सिद्धार्थां दशभिर्गव्यसेचनम् ।।

विकिरान् मूलमन्त्रेण साक्षतान् साङ्कुशानपि ।

गन्धपुष्पैश्च संमार्ज्य गन्धपङ्केन लेपयेत् ।।

---

191 PL ० र ०

192 PS पृथिविनामाभ्यां

193 PL नद्याद्यास्ते

सर्वनाम्ना पुनश्चैशे मूलेन स्थापयेद् घटम् ।
वा घटिर्मन्त्रशस्त्रेण परिभ्राम्यास्थाप्य पूजयेत् ।।
गर्भाधानादि कर्माणि मूलाष्टार्णैस्तु पूर्ववत् ।
स्वस्तिके धान्यराशौ तु पूर्ववच्छयनं स्तरेत् ।।
शिवविष्णोस्तु विद्येशान्द्वौ द्वौ कुंभाष्टकेषु च ।
कलशान् पूरयेत्पश्चात् स्नानार्थं मण्डपे परे ।।
प्रतिमामानयेत्तीर्थादुपस्थाय स्वलंकृताम् ।
भद्रपीठे[१९४] समास्थाप्य भद्रंकर्णेभिरित्यृचा ।।
घृतवतीत्यृचालिप्य घृतेनोद्वर्त्य चूर्णकैः ।
नमस्त इति मूर्धानं मृज्जलेनाभिषेचयेत् ।।
कषायं यज्ञायज्ञेति गव्यमन्त्रेण गव्यकम् ।
फलोदकं याः फलिनीरब्लिंगैश्शुद्धवारिभिः ।।
मधुरत्रयमायोज्यं मधुवातत्रिकेण तु ।
चित्रंद्देवानामित्याद्यं विश्वतश्चक्षुरन्यतः ।।
हिरण्यगर्भो ललाटं नेत्राणि प्रोक्षयेज्जलैः ।
कयानश्चित्र आप्यायस्वेति ताङ्गां प्रदापयेत् ।।
नमः शंभवमन्त्रेण स्नापयेदोषधीजलैः ।
इषेत्वेति च धान्यादिभिर्नमोवाचेति रत्नजैः ।।
गन्धद्वारां च गन्धादिभः कोणस्थैः स्नापयेदिति ।

194 PS तद्पीठ

गन्धपुष्पाक्षतजलैः पूरितां दिग्विदिक्क्रमात् ।।
नवकानथ वा षड्कान्[१९५] चतुष्कान् स्नापयेत्पुनः ।
तत्वायामीति पूर्वस्थान् समुद्रं गच्छेति याम्यगान् ।।
आपोहिष्ठेति प्रत्यक्स्थान् गायत्र्या सोमगान् घटान् ।
समुद्रज्येष्ठवर्गेण कोणगाननलादिति ।।
आवाह्य प्रणवेनास्यां पाद्यमर्घ्यं प्रदापयेत् ।
गन्धमाल्यपवित्रं च सोमारुद्रेति मन्त्रतः ।।
युवं वस्त्राणि वस्त्रन्तु वेदाहमिति चोत्तरम् ।
गायत्र्या भूषणं दत्वा समिद्ध्वञ्चिति चाञ्चनम् ।।
रोचना ये नाकस्येति सोमारुद्राय दर्पणम् ।
अग्नाविष्णवादिना स्तुत्वा पुण्याहमपि कारयेत् ।।
पादुकं व्यजनं छत्रं यानं तारेण दापयेत् ।
उत्तिष्ठेति समुत्थाप्य रथे तिष्ठन् रथं नयेत् ।।
नमो हिरण्यबाहवे सेनान्य[१९६] इति शाययेत्।
संहृत्य पञ्चभूतानि शोषणाद्यैर्विशोध्य ताम् ।।
तस्यां संयोजयेत्तत्वं शिवनारायणात्मकम् ।
वर्णाध्वानं न्यसेत्पूर्वं तत्कलाः[१९७] सकला अपि ।।
तत्वत्रयं न्यसेत्पश्चात् पुरुषादि यथाक्रमम् ।
पृथिव्यन्तं कजं पश्चान्मण्डलत्रितयं पृथक् ।।

195 PS नवकानथ वर्मकान्
196 PL हिरण्यवाहवेयं स इति, PS हिरण्यवाहेयं स इति
197 PS , PL तत्कालः

शिवादिपञ्चब्रह्माणि परमेष्ठ्यादिपञ्चकम् ।

शिरोललाटदृग्वक्त्रगळहृन्नाभिचोरुषु ।।

जानुजंघापदेष्वर्णा विद्युत् समन्त्रभेदिताम् ।

जाग्रदादीनि हृद्देशे व्याहृतीस्तास्तु[198] पूर्ववत् ।।

अंगान्यपि च मुद्राश्च सन्दर्श्येशं समर्चयेत् ।

निवेद्यान्नं बलिं दत्वा जुहुयुर्गुरुमूर्तिपाः ।।

मध्ये मूलेन वेदाद्यैर्दिक्षु चाष्टाधिकं शतम् ।

समिदाज्यतिलानाज्यं सर्षपांश्च घृतं यवान् ।।

सर्पीलाजान् घृतं हुत्वा पुनः शान्तिं च पूर्ववत् ।

व्याहृतीभिश्च मूलेन पूर्णान्तेनैव सर्वदा ।।

पूर्ववत् पूजयेद्विष्णुं चक्राब्जे द्वादशात्मना ।

अरेषु केशवादींस्तु वामदेवादि पूर्वगान् ।।

दोहनं श्रपणं होमं निवेद्यं भोजनं बलिम् ।

पूर्ववच्चात्र गायत्र्या जपेयुः संहिता द्विजाः ।।

ईशित्वादि[199] क्रमादाज्यं रत्नानामष्टसंख्यया ।

गायत्र्याः समिदाज्यन्तु पीठस्य नवशक्तिभिः ।।

अष्टबन्धस्य होतव्यमाज्यं द्रव्याणि मूलतः ।

परिहोमेषु मूलेन गायत्र्या च समिद्घृतम् ।।

इन्द्रनीलं पद्मरागं नपुंसकशिलोपरि।

---

198 PL व्याप्यतीस्तास्त

199 PS , PL ईशत्वादि

मरतकाख्यं वैडूर्यं मौक्तिकं च प्रवाळकम्।।

वज्रं गोमेदकं दिक्षु ब्रह्मरागं तु मध्यतः ।

पूर्वं ब्रह्मशिला न्यस्येत् पुनर्विज्ञाप्य मूर्तिपैः।।

पुण्याहं वाचयित्वार्णैर्मूलेन विनिवेशयेत्।

सम्पातस्पर्शनं कृत्वा ध्रुवाद्यौरिति पीठिका।।

गायत्र्या च पुनः पीठं शक्तिपर्यन्तमर्चयेत्।

कुंभेभ्यस्तोयमाहृत्य परिहोमान्विधानतः।।

आहृत्य मूर्तिकुंभेभ्यः प्रतिमामूर्ध्नि सेचयेत्।

शाकुनस्वस्तिसूक्ताभ्यां गृहमानीय शंकरम् ।।

ब्रह्मोपनिषदैर्मन्त्रैर्दशभिर्मूलविद्यया ।

प्रतिष्ठाप्य पुरुषं हंसं जीवमायोज्य विष्णुवत् ।।

सकलीकृत्य सम्पूज्य परिवारसमन्वितम्।

बलिं च सर्वतो दत्वा नमस्ते रुद्र मन्यवे।।

पुरुषसूक्तेन च स्तुत्वा द्वारमाघट्टयेत्पुनः ।

चतुर्थदिवसे स्नानमुत्सवं चापि कारयेत्।।

जीर्णोद्धारविधिश्शंभोर्विष्णोस्तन्त्रोक्तवर्त्मना।

सत्येशयोस्तथा शान्तिं शान्तिमद्भुतसंज्ञकाम्।।

भृशे जयन्ते होतव्यं तथा तत्वद्वयं द्वयोः ।

एवं वा पूर्वकुण्डे तु ब्रह्मोपनिषदैर्गुरुः ।।

पश्चिमे वृत्तकुण्डे तु वह्निमुत्पाद्य पूर्ववत्।

अश्वत्थैः खादिरैः प्ळक्षैः पलाशैः पाटलैर्वटैः।।

नमस्ते रुद्रसूक्तेन पौरुषेण विचक्षणः।

सहस्राणि सहस्रशस्तथा नारायणात्मना।।

अतो देवेति सूक्तेन नासदम्होमुचस्तथा ।

संसमिदादिमन्त्रैश्चः पदमन्त्रैश्चतुर्विधैः।।

ब्रह्मोपनिषदैर्मन्त्रैर्मूलव्याहृतिसप्तकैः ।

महाव्याहृतिभिश्चैव पुनर्व्याहृतिभिर्हुनेत्।।

षडावृत्यो समिद्धोमाघृतहोमस्तदन्तरे।

पूर्णाहुतिस्तु मूलेन क्रमाद्वादश चान्तरे।।

सम्पातकलशेनेशमेभिरेवभिषेचयेत्।

प्रायश्चित्तानि सर्वाणि नन्दीनारायणाह्वयोः ।।

उदितानीह कार्याणि निमित्तार्थानुसारतः ।

इति नन्दीनारायणात्मके हरहरितन्त्रे प्रथमः पटलः

नारायणात्मके शाङ्करनारायणे द्वितीयः पटलः

शाङ्करनारायणे द्वितीय पटलः

नत्वा सदाशिवं शान्तमुमेशं श्रीपतिं हरिम्।
आनन्तममृतं हंसं प्रवक्ष्ये स्नापनं विभोः ।।
प्रासादस्याग्रतः कुर्यान्मण्डपं सुपरिच्छदम्।
ध्वजतोरणदिक्पालकलशैर्भूषणैर्युतम्।।
कुंभेशकर्करीपञ्चकुण्डैर्वह्निभिरन्वितम्।
मूर्तिभिः सहितोऽस्त्रेण गुरुः सूत्राणि पातयेत्।।
विष्णुभागोक्तमार्गेण विष्णुभागे प्रकीर्तिताः ।
सप्तदशमहाद्रव्यैः पूरयेत्कलशान् नवान् ।।
द्रव्याष्टकैश्चतुर्भिर्वा संयुक्तैः पूर्वभाषितैः ।
अन्तद्रव्यगणस्यास्य बाहुल्यमधुनोच्यते।।
पद्मरागञ्च वैडूर्यमिन्द्रनीलं च गारुडम्।
पुष्यरागं ब्रह्मरागं वज्रं मौक्तिकमेव च।।
सूर्यकान्तेन्दुकान्दौ च प्रवाळं स्फटिकं विदुः ।
कदलीनालिकेराम्रधात्रीपनसडाडिमैः ।।
सबिल्वभव्यबदरमातुलुङ्गकपित्थकैः ।
कुटजेन समुद्दिष्टं फलवारि च षड्द्वयम्।।

सुवर्णं रजतं ताम्रमायसं त्रपु कांस्यकम्।

आरकूटं सुपित्थञ्च सीसं लोहं नवात्मकम्।।

सहा निशा सदा भद्रा शिरीषं सूर्यवर्तिनी ।

कुशाग्रं भूतृणं सेव्यं क्रान्ता च तुळसीद्वयम्।।

सुरसामार्जनं प्रोक्तं द्वादशाङ्गं सुशोभनम्।

उशीरं कुङ्कुमं कुष्ठं मांसी मलयजं तथा।।

देवदारुं हि रिवेरुमगरुं राजमुस्तकम्।

गन्धाष्टकमितिप्रोक्तमक्षताष्टकमुच्यते।।

यवतण्डुलव्रीहिमाषनीवारवैणवान्।

सकङ्कुसर्षपाः[२००] प्रोक्ताः अक्षतार्थं मनीषिभिः ।।

दूर्वाश्यामाकपद्मानि विष्णुपर्णी सुतण्डुलान्।

गन्धपुष्पकुशाबिल्वतुळसी पाद्यमुत्तमम्।।

गन्धपुष्पदधिक्षीरमाप कुशं यवं चार्घ्यं दशं दशाङ्गं

तत्सुयोजितम्।।

कर्पूरजातितक्कोललवंगंगन्धपुष्पकम्।

षड्भिराचमनं प्रोक्तं चतुर्दशयुतं परम्।।

शमीपलाशखदिरबिल्वाश्वत्थविकङ्कतम्।

उदुंबरञ्च न्यग्रोधपनसप्लक्षजंबुकम्।।

मधूकं निम्पशम्याख्यं कषायार्थमुदाहतम्।

[200] Missing in PL

वेदाद्यैर्दिक्षु वर्मान्तैः कोणेषु हृदयादिभिः।।

मूलेन मध्यकुण्डे तु पूर्ववत् पञ्चकेषु वा।

गायत्र्या जुहुयुः पक्वं नमस्ते रुद्रमन्यवे।।

अनुवाकेन सूक्तेन पौरुषेण च ऋत्विजः।

पञ्चभिर्ब्रह्मभिश्चाज्यं पञ्चोपनिषदैरपि।।

अश्वत्थोदुंबरवटप्लक्षोत्था दिक्षु कीर्तिता।

कोणेषु च शमीबिल्वखदिराः सविकङ्कताः।।

पालाशीर्वाथ सर्वत्र समिधश्च तिलान्घृतम्।

सर्षपांश्च यवां लाजान् घृतमष्टाधिकं शतम्।।

कलशेषु समर्प्याज्यमाच्छाद्य परिपूजयेत्।

नमस्ते रूद्रसूक्तस्य प्रथमामुच्चरेदृचम्।।

सहस्रसीर्षा पुरुष इति सूक्तस्य वेधसः ।

एवं त्वथाभ्यां मूलेन पाद्येन स्नापयेत्विति।।

एवमेव पराभ्यां तु पराभ्यां तु पुनः पुनः।

यवोदकं तु सूक्ताभ्यां तोयं पूर्णानशेषतः।।

समुद्रज्येष्ठवर्गेण पूर्ववच्चाधिकान्यदि।

एभिर्द्रव्याष्टकोपेतैः पञ्चविंशतिधा स्थितैः।।

पञ्चविंशतिमारभ्य सहस्रान्तं प्रपूर्य च।

पदानि पूर्ववत्कृत्वा स्नापयेत् सकलेश्वरम्।।

पूर्ववच्च दिशाहोममुत्सवं चापि कारयेत्।

अत्र वैशेषिकं वक्ष्ये मन्त्राणामुभयात्मनः ।।

नन्दीशचण्डौ सम्पूज्यौ द्वास्थावन्तर्बहिर्मुखौ।

जयत्सेनविष्वक्सेनौ द्वारपालौ बहिस्थितौ।।

सौरभेयं वैनतेयं पूजयेदग्रमण्डपे।

अनन्तं पृष्ठभागे तु विघ्नेशौ दक्षिणे गृहात्।।

दशदिक्षु च लोकेशान्मातृशास्तारमंबिकाम्।

षण्मुखं धनदं चेष्ट्वा चण्डसेनं बहिर्यजेत्।।

शंखपुष्पादिनिध्यौ च शूलचक्रादिपाणिनौ।

नन्दी चैव महाकालौ भूतनाथो महीधरः।।

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।

एभिर्दिक्षु बलिं दत्वा संप्राप्य बलिपीठिकाम्।।

तत्रापि दिक्ष्विमानिष्ट्वा बलिपीठे बलिं हरेत्।

पर्वतेशो गुहेशश्च कालपाशकपालिनौ।।

शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः।

हरसेन महाबलाभ्यां नमः

एष नित्यबलिप्रोक्तश्चोत्सवश्चापि कथ्यते।।

नमस्ते द्वारियुक्ताय परशुव्यग्रपाणये।

दृष्ट्या निहतदैत्याय शांकराय नमो नमः।।

जयत्सेनाय नमः।

नमस्ते द्वारपालाय चण्डायामिततेजसे।

नरसिंहतनूजाय चक्रेणाङ्कितमौलये।।

विष्वक्सेनाय नमः।

वाहनाय महाशंभो ऋषभाय नमः।

पक्ष[२०१]विक्षोभवित्रस्तगरुडाय नमः।

शय्या यो जगत[२०२] अनन्ताय नमः।

दैत्यदर्पादिकैर्मन्त्रैरुपस्थाय दिगीश्वरान्।

बलिर्नामादिकैर्मन्त्रैस्तेषां[२०३] च विकिरेत् पृथक् ।।

वीरभद्र नमस्तेऽस्तु नमो विघ्नेश्वराय च।

ब्राह्म्यादिभ्यश्च मातृभ्यो वै नमो नमः।।

उपस्थाय च मातॄस्तासां नामभिरेव च।

गायत्रीभिश्च लोकादिमन्त्रैश्च विकिरेद् बलिम्।।

पूर्ववत् भूतनाथं तु दुर्गां स्कन्दमथोत्तरे।

मातॄः सप्त समभ्यर्च्य चण्डसेनं समर्चयेत्।।

चण्डेश्वराय विद्महे विष्वक्सेनाय धीमहे तन्नश्चण्डसेनः प्रचोदयात्।

ह्रींकार्यै नमः। श्रींकार्यै नमः। शूलाय नमः। चक्राय नमः।

ये समस्तं जगद्रुद्र पार्षदादि। नन्दिने नमः।

विंशद्भूतगणेभ्यः। कुमुदाय नमः।

---

[201] PL º चण्ड

[202] PS जयत, PL जयतः

[203] º रुपस्थाय दिगीश्वरान्। बलिर्नामादिकैर्मन्त्रैस्तेषां] Missing in PL

पञ्चाशत् भूतगणेभ्य।

हरसेनाय विद्महे महाबलाय धीमहे तन्नः शक्तिः प्रचोदयात्।

आयान्तु पार्षदा सर्वे शाङ्कराः वैष्णवा इह।

गृह्णन्तु परितुष्टास्ते बलिं तेभ्यो नमो नमः।।

देवादीनां ग्रहाणान्तु दिक्ष्वष्टासु बलिं हरेत्।

गृह्णन्तु बलिमित्युक्त्वा ग्रामेषु नगरेषु च।।

पूर्वेद्युस्तीर्थयात्रायाः शयने शाययेन्निशि।

प्रातः संयोज्य चूर्णैस्तमुन्मृज्य परिपूजयेत्।।

यात्राहोमे तु गायत्र्या पक्षे यत्र स्वकीयया।

षड्भिः कनिक्रदाद्यैस्तु घृतं स्वस्त्यादिपञ्चभिः।।

समिदाज्य चरूनाज्यं मूलेनैव समापयेत्।

यानमारोप्य देवेशं पूर्ववत्सरितं नयेत्।।

स्नानं तु पूर्ववत्कृत्वा पञ्चोपनिषदैर्हुनेत्।

निवेद्य च बलिं दत्वा देवदेवं गृहं नयेत्।।

श्वो भूते स्नापयेद्देवं स्वशक्त्या कलशैर्गुरुः।

गुरुं च पूजयेत्कर्ता दक्षिणाभिः समूर्तिपम्।।

सदस्यान् पूजयेत् भक्तानन्नाद्यमपि कारयेत्।

श्रीपार्वतीपतेर्योगमुक्तं[२०४] सम्यगनुत्तमम्।।

गोपनीयं सदा वत्स भुक्तिमुक्तिफलप्रदम्।

---

[204] PL ° र्भागमुत्तमं

विशेषपूजा कर्तव्या या तयोस्तत्र चोदिता ।।

मिथो भावं न कर्तव्यं देवस्य परमात्मनः ।

शिवनारायणं तत्वमक्षरं परमं पदम्।।

यदा तु शक्तिरूपेण विष्णोर्वा भगवाञ्छिवः ।

तिष्ठत्यनन्यरूपेण तदा नारीश्वरं वपुः ।।

लक्ष्मीनारायणं वा स्याच्छिवनारायणं वपुः।

हंसरूपन्तु बीजं यत्तन्मयः सकलं जगत्।।

नित्यशुद्धं परं बुद्धं तत्वं सोऽहं सदोमिति[२०५] ।

इति श्री नारायणात्मके शिवनारायणतन्त्रे द्वितीयः पटलः

[205] PL समोदिनि

नारायणात्मके ब्रह्मकल्पः

पाद्यार्घ्याचामगव्यैर्घृतदधिपयोमाक्षिकोष्णोदकषायैरापूर्यमार्जनादि्भः
फलयवमणिभिर्लोहकौशेयगन्धैः कुंभाः
पुष्पोपमानामलकयुतैरक्षतैर्नाळिकेरैरिक्षूत्थैस्तण्डुलादि्भ स्नपनमिति
हरेर्मद्ध्यतः स्नानतोयैः[206]

जातो वा षड् ते वास्तोष्पते बृहस्पते एवापनस्नानो[207]
नियुदि्भर्हिरण्यवर्णो अश्वावतिस्त्वं वरुणस्त्वं वरुण इति
दशस्वस्तयः जपनोदयः कार्या अमीभिर्विघ्नशान्तये।
नमः सकलरूपाय निष्कलायोभयात्मने।
ब्रह्मणे वेदगर्भाय शाश्वताय परात्मने।।
यजनं संप्रवक्ष्यामि ब्रह्मणः परमात्मनः।
स्नात्वाचम्य शुचिर्भूत्वा योगपीठं समर्चयेत्।।
धर्माधर्मादिपादेषु सत्वादिगुणपङ्कजम्।
मण्डलात्मत्रयोपेतं नवशक्तिभिरन्वितम्।
विरक्तिश्शान्तिरुत्प्रेक्षा संस्मृतिश्च महाद्युतिः।
संस्मृतिर्विरतिः सिद्धिश्शक्तीरस्य प्रकीर्तिताः।।
हिरण्यगर्भाय विद्महे शतानन्दाय धीमहे तन्नो ब्रह्मा प्रचोदयात्।
उपचारादिकं सर्वमनया प्रददेत् प्रभोः

---

[206] पाद्यार्घ्याचामगव्यै...... हरेर्मद्ध्यतः स्नानतोयैः] Missing in PS
[207] PL एवामन्तस्थानो

मन्त्रस्तारनमोनाम चतुर्त्थ्यन्तष्षडक्षरः
अंगानिनामजात्यन्तैर्नेत्रान्तानि[208] षडक्षरैः ।
दिग्विक्षु पुरोंगानि वासुदेवादिकांस्तथा।।
शान्तिश्रीश्च सरस्वत्यौ रतिः कोणेषु कीर्तिताः।
इन्द्रादींश्च तदस्त्राणि विष्वक्सेनमथोत्तरे।।
प्रासादे स्थापितं देवं पूजयेद्विष्णुभागवत्।
उत्पातेषूपजातेषु जीर्णोद्धरविधावपि ।।
विष्णुभागवदुद्दिष्टं विशेषमधुनोच्यते ।
खननाद्यैः क्षितेः शुद्धिं क्षाळनाद्यैस्तु बिंबतः ।।
मोदः प्रमोदो हंसश्च सामगः सत्यलक्षणः ।
एतास्तुमूर्तयः प्रोक्ताः ब्रह्मणः स्नानहोमयोः ।।
मोदाद्यैर्स्त्रिसहस्राज्यं जुहुयुः सर्ववह्निषु ।
ततः समिद्घृतव्रीहितिललाजसहस्रकम् ।।
षडक्षरेण मूलेन जुहुयुः सर्वशान्तये ।
मोदाद्यैर्द्वादशाष्टार्णगायत्रीजितपूरुषैः ।।
चतुर्विंशतिशो हुत्वा शतशो वा सहस्रशः ।
अपामार्गसमिच्छिन्ना सहैन्द्रीभद्रिकाञ्जली ।।
दूर्वासिद्धार्थकव्रीहियवांस्तिलहविर्घृतम् ।
वापनं सेचनं बीजे गायत्र्या विष्णुवद्बलिः ।।

---

[208] सर्वमनया प्रददेत्……… अंगानिनामजात्यन्तैर्नेत्रान्तानि] Missing in PS

हंसध्वजं पुरस्तात्तु तोरणानि चतुर्दिशम् ।
कुमुदाद्यैर्ध्वजानष्टौ घटांद्दिक्पालनामभिः ।।
भूमिं संशोध्य कुंभेशं मूलेनास्त्रेण वा घटिम् ।
परिभ्रम्याग्निमुद्पाद्य षडंगैर्विष्णुभागवत् ।।
तीक्ष्णैः सप्तदशद्रव्यैर्यत्स्नानं परिकीर्तितम् ।
तदेव ब्रह्मणः कर्ता परमस्नपनं ब्रुवे ।।
प्रायश्चित्तद्वयस्यान्ते तत्वहोमंन्तु होमयेत् ।
णकाराद्येषु वर्णेषु पृथिव्यादीनि योजयेत् ।।
प्रणवाद्येषु वर्णेषु क्षेत्रज्ञानी हि योजयेत्[२०९]
एकैकेन शतं हुत्वा पूर्णां मूलेन होमयेत् ।
एकाशीतिपदस्थाने मध्यखण्डे तु मध्यमम् ।।
रत्नैर्लोहैः सुगन्धैश्च पूरयेन्मूलविद्यया ।
अक्षस्त्रक्कुण्डलापद्मयुगळोद्यत्करांबुजे ।।
शोभितं पीतवर्णं तु ध्यात्वा तत्परिपूरयेत् ।
सूर्यकान्तं पद्मरागं तत्प्राच्यां कलशेन्यसेत् ।।
चन्द्रकान्तं च वैडूर्यं दक्षिणे मध्यमे न्यसेत् ।
अयस्कान्तं चेन्द्रनीलं न्यसेत्पश्चिममध्यमे ।।
प्रवाळं गारुडं सौम्ये मध्यमे कलशे यजेत् ।
स्फटिकं पुष्यरागं च वह्नौ निक्षिप्य मध्यमे ।।

[209] प्रणवाद्येषु वर्णेषु क्षेत्रज्ञानीहि योजयेत्] Missing in PS

ब्रह्मरागं सुवर्णं च नैरृत्यां निक्षिपेत्घटे ।
वज्रं च रजतं क्षिप्त्वा वायव्यं मध्यमे घटे ।।
ताम्रं च मौक्तिकं क्षिप्वा पूरयेच्छांकरे घटे ।
वासुदेवादिकान् ध्यात्वा वराहान्तं प्रपूजयेत् ।।
मुक्ताफलन्तु निक्षिप्य पूरयेन्नवकाष्टकम् ।
दिक्षु वेदादिकं मध्ये जुहुयुर्मूलविद्यया ।।
पक्वं गायत्र्या पूर्णाञ्जुहुयुश्शतेशते ।
उत्सवं तीर्थयात्रां च सर्वं वै विष्णुभागवत् ।।
त्रिमूर्तिसंगमैर्यागमेकपीठे निगद्यते ।
अंगावरणमाद्यन्तु द्वितीयं परिवारकम् ।।
त्रितीयावरणं शक्तिं चतुर्थमार्षमुच्यते ।
श्रुतिस्मृतीतिहासं च पञ्चमं परिकीर्तितम् ।।
षष्ठमिन्द्रादिकं शस्त्रं सप्तमं चाष्टमं पुनः ।
भक्तानां नवमं प्रोक्तं कुमुदाद्यं दशमं विदुः ।।
ब्रह्मारुद्रश्च विष्णुश्च[२१०] ईश्वरश्च सदाशिवः ।
सर्वात्मा चास्त्रमुद्दिष्टं दिग्विदिक्ष्वग्रतः स्थितम् ।।
हिरण्यगर्भो विष्णुश्च गौरीशश्च प्रजापतिः ।
लक्ष्मीशो रुद्रमूर्तिस्तु भैरवो नरसिंहकः ।।
प्रकृतिर्निवृत्तिशान्तिर्मोहिनी हर्षणी रमा ।

[210] PL विष्णुश्चरुद्रश्च ईश्वरश्च o

मयाचान्यविभूतिश्च शक्तयोऽष्टौ प्रकीर्तिताः ।।

नारदश्च वसिष्ठश्च विश्वामित्रः पराशरः ।

भृगुश्च वेदव्यासोऽथ दुर्वासाः कौशिकोऽष्टमः ।।

ऋग्वेदश्चेतिहासश्च यजुर्वेदः पुराणकः ।

सामश्शिक्षोऽप्यथर्वाणो ज्योतिश्शास्त्रमथाष्टमम् ।।

इन्द्राद्य कुलिशाद्याश्च नारदो बादरायणिः ।

विष्वक्सेनस्तु चण्डेशः क्षेत्रपालो भगीरथः ।।

यक्षराजोऽम्बरीषश्च भक्ता स्त्रीपुरुषार्चने ।

कुमुदाद्यास्तथाचाष्टौ स्त्रुवं शंखं त्रिशूलकम् ।।

स्त्रुवं चक्रं पिनाकं च गदिता दशमावृतिः ।

एवं संपूज्य कलशान् समुद्धृत्याभिषेचयेत् ।।

आद्यया मध्यमं कुभमष्टकन्तु द्वितीयया ।

तृतीया दक्षिणं कुभं चतुर्थ्या च तथाष्टमम् ।।

एवमेव तु संस्नाप्य मध्यमे नवकेन तु ।

हिरण्यगर्भमन्त्रेण ब्रह्मसूक्तेन मध्यमम् ।।

मन्त्राणामवसाने तु मूलमन्त्रं नियोजयेत् ।

ओं चतुर्मुखाय विद्महे नारायणाय धीमहे तन्नो रुद्रः प्रचोदयात्

।।

त्रिमूर्तिर्यागेऽनया सर्वं कर्म कुर्याद्विचक्षणः ।

नाभिहन्मस्तके ध्येया मूर्तयो मण्डलत्रये ।।

पुनर्ज्योतिर्मयं ध्यात्वा परे व्योम्नि विचिन्तयेत् ।
संक्षेपाद्ब्रह्मणस्तन्त्रं कथितं परमात्मनः ।।
भक्तलोकहितार्थाय नमः सर्वात्मने सदा।

सकलदुरितनाशे विष्णुसंपद्यतां मे
प्रतिदिनमनुसेव्ये वैष्णवे पुस्तकेऽस्मिन्
गुणगणनिलयास्ते लेखितुः कृष्णनाम्नः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः
ओं नमो नारायणाय समाप्तश्चायं पुस्तकः[२११]

[211] सकलदुरितनाशे......... समाप्तश्चायं पुस्तकः] Missing in PS